

Almira 3
Shelf 2
8

४२२३

९५१

त्रिपुरसुन्दर्यादिदेव्याः कोटिहोमकर्मणि उत्तराङ्ग हस्य

आन्धुनारणम्: प १
अग्नौ षोडशोपचार पूजनं प ५
पात्रासंस्कार
ब्रह्मासनम्: प ३
प २१
[illegible]नरूपाभिषेकप्रयोगः प २१

श्री ५ को सरकार
[illegible] संस्कृत [illegible]

कोटिहोमपद्धतिः

1. Koti Homa Paddhati
2. Vinayaka Stava Kadamba
3. Mantra Dosha Shanti
4. Saptashati Rahasya
5. Anusruti
6. A Part Of Shanti Parva
7. Tara Stotra
8. Shala Grama Prarthana
9. Advaita Khandana Karika Of Ramanuja
10. Yantroddhara Kavaca
11. Harivamsha Shravaṇa Vidhi
12. Adityahrdaya Stotra
13. Vishnu Sahasra Nama Stotra 1708
14. Tara Kula Stotradi
15. Dasha Dina Piṇḍa Dana Vidhi
16. Devya Kavacha By Hari Hara Brahma
17. Indrakshi Stotra Mantra
18. Rudra Shadanga Sukta Vidhana
19. Gajendra Moksha In Bhagavata Purana 1790
20. Kalika Sahasra Nama Stotram
21. Kakaradi Sahasra Nama Stotra Of Maha Kala Bhairava 1890
22. Haritalika Puja Vidhi 1849
23. Rishi Panchami Vidhi
24. Rudra Nyasa
25. Arya Stotra
26. Bala Grahastava In Prayoga Sara 1877

पन्तुहेतयः पावकोऽअस्मभ्यꣳ ।शिवोभव नृषदे
वेडप्सुषदेवेड्बर्हिषदेवेड्वनसदेवेट्स्वर्विदेवेट् ९ येदेवा
देवानांय्यज्ञियायज्ञियानाꣳसम्वत्सरीणमुपभागमा
सते। अहुतादोहविषोयज्ञेऽअस्मिन्त्स्वयम्पिवन्तु
मधुनोघृतस्य १० येदेवादेवेष्वधिदेवत्त्वमायन्येब्रह्म
णःपुरऽएतारोऽअस्य। येभ्योनऽऋतेपवतेधामकिञ्च
ननतेदिवोनपृथिव्याऽअधिष्णुषु ११ प्राणदाऽअ
पानदाव्यानदावर्चोदावरिवोदाः। अन्याँस्तेऽअस्म
त्तपन्तुहेतयःपावकोऽअस्मभ्यꣳ·शिवोभव १२ इत्य
ग्न्युत्तारणंकृत्वा- स्वच्छवस्त्रेणसंशोध्य. मूलमंत्रो
क्तासनमंत्रेणपुष्पाद्यासनंदत्वा. पीठमध्येसंस्थाप्य.
प्राणप्रतिष्ठां च कुर्यात ॥

~~मालासंस्कारः~~ —

तत्रादौ कुशोदकसहितैः पञ्चगव्यैर्मालां प्रक्षाल्य. अश्वत्थपत्रनवकरचिते कमले स्थापयित्वा. ॐ ह्रीं अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं इत्येतानि मातृकाक्षराणि मूलमन्त्रेण मालायां विन्यस्य. पुनः पञ्चगव्येन संप्रोक्ष्य. ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः। भवे भवे नाति नाति भवे भवस्व मां भवोद्भवाय नमः। इति मन्त्रेण शीतलजलेन प्रक्षालयेत्। पुनः ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः इति मन्त्रेण चन्दनागुरुकर्पूरादिसुगन्धद्रव्यैर्घर्षयेत्। ॐ अघोरेभ्यो थघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। इति मन्त्रेण तां धूपयेत्। ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। इति मन्त्रेण मालायाश्चन्दनं लेपयेत्। ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। इति मन्त्रेण मेरुसहितं

प्रत्येकमणिं सकृत्सकृद्वाभिमन्त्रयेत्. ॐ अस्य श्री प्राण
प्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुः
सामानि छन्दांसि क्रियामयवपुः प्राणाख्या देवता आं
बीजं ह्रीं शक्तिः क्रौं कीलकं अस्या मालायाः प्राणप्रति
ष्ठापने विनियोगः इति जलं क्षिपेत् । ततः करेणाच्छाद्य·
ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहमस्या वाला देवता
मालायाः प्राणा इह प्राणाः । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं
हंसः सोहमस्या वाला देवता मालायाः जीव इह स्थितः ।
ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हंसः सोहमस्या वाला देवता
याः सर्वेन्द्रियाणि इह स्थितानि । ॐ आं ह्रीं क्रौं यं रं लं वं
शं षं सं हंसः सोहमस्या वाला देवता मालाया वाङ्मन
श्चक्षुः श्रोत्र जिह्वा घ्राण पाणिपाद पायूपस्थानि इहैवा
गत्य सुखं चिरं तिष्ठन्तु स्वाहा । इति प्राणान्प्रतिष्ठाप्य·
ॐ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो वभूव ॥
य ऽईशे ऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा वि
धेम । इति मंत्रं त्रिवारं पठेत् । ततः ॐ मां माले माले महा
माये सर्वशक्तिस्वरूपिणि । चतुर्वर्गस्त्वयि न्यस्तस्तस्मा
न्मे सिद्धिदा भव । इति प्रार्थयेत् ॥ इति मालासंस्कार
विधिः ॥

अग्निपूजनम्:—

रक्तपुष्पाञ्जलिं गृहीत्वा ध्यायेत् ॥

रुद्रं शक्ति स्वस्तिकाभीति मुच्चै
दीर्घैर्दोर्भि धारयन्तं वराब्जम् ।
हेमाकल्पं पद्मसंस्थं त्रिनेत्रं
ध्याये वह्निं वद्धमौलिं जटाभिः ॥

स्वाहास्वधासहित हुताशनाग्नयेनमः ।

पाद्यम्— नमस्ते भगवन्देव वह्ने नारायणात्मक ।
सर्वलोकहितार्थाय पाद्यं च प्रतिगृह्यताम् ॥

अर्घ्यं— हुताशन परं धाम ज्योतीरूप सनातन ।
गृहाणार्घ्यं मयादत्तं विश्वरूप नमोस्तुते ॥

स्नानम्— धनञ्जय नमस्तेस्तु सर्व पाप प्रणाशन ।
स्नानीयं ते मयादत्तं सर्वकामार्थ सिद्धये ॥

वस्त्रम्— हुताशन महावाहो देवदेव सनातन ।
अंशुकं ते प्रयच्छामि देहि मे परमं पदम् ॥

गन्धम्— देव्यो देवा मुदं यान्ति यस्य सम्यक्समागमात् ।
सर्व दोषोपशान्त्यर्थं गन्धोयं प्रतिगृह्यताम् ॥

पुष्पम्— त्वं विष्णुस्त्वं हि ब्रह्मा च ज्योतिषां गतिरीश्वरः ।
गृहाण पुष्पं देवेश हुताशन नमोस्तुते ॥

धूपम्- देवतानां पितॄणां च मुखमेकं सनातनम् ।
धूपोयं देवदेवेश गृह्यतां मे धनञ्जय ॥
दीपम्-त्वमेकः सर्वभूतेषु स्थावरेषु चरेषु च ।
परमात्मा पराकारः प्रदीपः प्रतिगृह्यताम् ॥
नैवेद्यं- नमोस्तु यज्ञपतये प्रभवे जातवेदसे ।
सर्वलोकहितार्थाय नैवेद्यं प्रतिगृह्यताम् ॥
पुष्पाञ्जलि-हुताशन नमस्तेस्तु नमस्ते हव्यवाहन ।
लोकनाथ नमस्तेस्तु नमस्ते जातवेदसे ॥
अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् ।
सुवर्णवर्णममलं समिद्धं सर्वतोमुखम् ॥
प्रार्थना- श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं बलं श्रियम् ।
आयुष्यं द्रव्यमारोग्यं देहि मे हव्यवाहन ।
त्वदर्थोयं समारम्भः कृष्णवर्त्मन्नमोस्तु ते ॥
मुखं त्वमसि देवानां वेदानां च हुताशन ।
पावनात्पावकश्चासि वहनाद्धव्यवाहनः ॥
वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ।
अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे ॥
पृथिवी बलमादध्याच्छिवं चापो दिशन्तु मे ।
ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैर्नृपैः ॥
नित्यं सुहुत यज्ञोसि सत्वेन विपुनीहि माम् ॥

प्रधानदेवता वलिः—

वालाया मूलमंत्रं पठित्वा - वालायै साङ्गायै सपरिवारायै
मधुशर्करापायस
सशक्तिकायै इमं सदीपं दध्यन्न वलिं समर्पयामि. भो वाले इमंवलिं गृहाण मम यजमान्याः सकुटुम्बाया आयुष्यकर्त्री क्षेमकर्त्री पुष्टिकर्त्री तुष्टिकर्त्री निर्विघ्नकर्त्री भव।

यावद्धोमं प्रतिदिनं ग्रहादिपूजाकार्या. कोटिहोमे प्रति सहस्रं पूर्णाहुतिरपि. होमसमाप्तावग्निं सम्पूज्य. स्विष्टकृदादि प्रायश्चित्तहोमान्तंकृत्वाऽग्नेः समन्ताद्दिक्पालेभ्यो, वेदेंसमन्तान्नवग्रहेभ्यो, वेदेरुत्तरतो विनायकादि सप्तभ्यो गरुत्मते च, प्रधानदेवतायै च तत्तन्मन्त्रैर्माषभक्त वलिं दत्वा, क्षेत्रपालवलिं दुर्ब्राह्मणेन शूद्रेण वा चतुष्पथे क्षेपयेत॥

कोटिहोमे दशसहस्त्र पूर्णाहुतयो भवन्ति. अन्ते पूर्णाहुतिर्भिन्ना. साच प्रक्षालितपाणिपादः आज्यस्थाल्यामन्यदाज्यं निरूप्याग्नावधिश्रित्य. स्रुक्स्रुवौ प्रतप्य. संमृज्याऽभ्युक्ष्याज्यमुद्वास्योत्पूयावेक्ष्य. गन्धाक्षतवस्त्रशोभितां स्रुचं कृत्वा. स्रुवेण द्वादशवारं चतुर्वारं वा गृहीतेनाज्येन स्रुचं पूरयित्वा. तदुपरि नारिकेलफलं पूगीफलं वा संस्थाप्य समिधमाधाय—

ॐ समुद्रादूर्म्मिर्म्मधुमाँ२उदारदुपाᳫंशुना सममृतत्वमानट्। घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥१॥ वयन्नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः। उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोवमीद्गौर एतत्॥२॥ चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ आविवेश॥३॥ मूर्द्धानन्दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआजातमग्निम्। कविᳫं सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः॥४॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः॥५॥ पूर्णादर्विपरापत सुपूर्णा

पुनरापत । वस्नेव विक्रीणावहा ऽइषमूर्ज्जं शतक्रतो
॥६॥ सप्त ते ऽअग्ने समिधः सप्त जिह्वाः सप्तऋषयः सप्त
धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त यो
नीरा पृणस्व घृतेन स्वाहा ॥७॥ धामन्ते विश्वं भुवनम
धिश्रितमन्तः समुद्रे हृद्यन्तरायुषि । अपामनीके
समिथे यऽ आभृतस्तमश्याम मधुमन्तं त ऊर्म्मिम् ॥ स्वाहा
इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे
सप्तवते ग्नये ऽद्भ्यश्च न मम ॥ इति त्यागः ॥ पृष्ठ १४

ततो वसोर्धारापातनम् -

तत्र मन्त्राः - अग्निमीळे सूक्तम् - विष्णोर्नुकं सूक्ते - आ ते पितः सूक्तम् - स्वादिष्ठया सूक्तम् - महा वैश्वानर ज्येष्ठसाम नीच । ततः शुक्रियं पठित्वा, लक्ष्मीसूक्तम् ॥ × पृष्ठ १५ [illegible]

संस्रवप्राशनम् -

यस्माद्यज्ञरसात्पूता यज्वानो ब्रह्मरूपिणः ।
तं संस्रव पुरोडाशं प्राश्नामि सुखपुण्यदम् ॥

इत्यनेन संस्रवप्राशनं कृत्वा - आचमनम् ॥

१- [illegible]

क्षेत्रपालबलिः—

ॐ क्षेत्रपालाय भूत प्रेत पिशाच राक्षस शाकिनी
डाकिनी वेतालादि परिवारयुतायेमं वलिं समर्पयामि.
भो भो क्षेत्रपाल इमं वलिं गृहाण मम यजमानस्य
आयुष्कर्ता क्षेमकर्ता पुष्टिकर्ता पुष्टिदस्तुष्टिदो भव।

स्मार्तकर्माधिकारसिद्धये गोदानम्

आचम्य कर्मपात्रजलेन प्रोक्षेत्—

अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ॥

गोपूजनं—नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमोनमः ॥

[illegible]—गवे नमः. गोप्रत्याम्नाय द्रव्येभ्यो नमः ॥

ब्राह्मणपूजनं—नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

सङ्कल्प—हरिः ॐ तत्सत् विष्णुः २ श्रीमतो भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्धे श्रीश्वेतवाराहकल्पे प्रह्लादाधिपत्ये वैवस्वतमन्वन्तरे अष्टाविंशतितमे युगे सत्यत्रेताद्वापरान्ते कलियुगस्य प्रथमचरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे आनन्दकानने महाश्मशाने गौरीपीठे त्रिकण्टकविराजिते अविमुक्तवाराणसीक्षेत्रे भागीरथ्याः पश्चिमेकूले इहपुण्यभूमौ. षष्ठिसंवत्सराणां मध्ये नन्दननाम संवत्सरे श्रीसूर्ये उत्तरायणे ।शिशिरर्तौ
स चान्द्रामाघ मासे
मासोत्तमे सौरा चान्द्राच फाल्गुनेमासि शुक्ले पक्षे

कुम्भराशिस्थे सूर्ये मीनराशिस्थे गुरौ सिंह राशिस्थे चन्द्रे शेषेषु ग्रहेषु यथायथस्थानस्थेषु सत्सु मघा नक्षत्रे अतिगण्ड योगे पालव करणे एवं ग्रहगुणयोगविशिष्टायां शुक्र वासरान्वितायां पूर्णिमायां पुण्यतिथौ. वत्सगोत्रा वत्सभार्गवच्यावनाप्नवानौर्व जामदग्न्येति पञ्चप्रवरा देवी पुत्रपरिवार समन्विता अहं मम, इष्टदेवता वात्सलादेवी प्रीत्यर्थं ब्राह्मणद्वारा कृतेस्मिन्कोटिहोम कर्मणि यज्ञदीक्षिताया मम भक्ष्याभक्ष्य वाच्यावाच्य कर्तव्याकर्तव्यादि विचाराभाव जनित भोजन शयन विहार व्यवहारादि गत शास्त्रोदित नियमापरिपालन जन्य प्रत्यवाय परिहार पूर्वकं, परिसमापितैतत्कोटिहोम यज्ञोत्तराङ्ग·तया करिष्यमाणेषु तत्तद्देवता पूजनादि दक्षिणादान यज्ञान्त स्नान मण्डपदानान्त समस्त कर्मसु, देहशुद्धिद्वारा अधिकारसिद्ध्यै, इदं गोप्रत्याम्नाय रजत द्रव्यं चन्द्रदैवतं काश्यप गोत्राय शर्मणे आचार्याय तुभ्यमहं सम्प्रददे.

प्रार्थना– कपिले सर्वदेवानां पूजनीयासि रोहिणि ।
तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ।

दानप्रतिष्ठा – अद्य कृतैतद्गोप्रत्याम्नाय द्रव्यदान प्रतिष्ठार्थमिमां दक्षिणां रजतं चन्द्रदैवतं काश्यप गोत्राय ....

शर्मणे आचार्याय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे. तत्सन्नमम ॥

पूर्णपात्रदानम्- पूर्णपात्रायनमः इति सम्पूज्य- पूर्वसङ्कल्प सिद्धिरस्तु. वत्सगोत्रा वत्सभार्गव च्यावनाप्नवा नौर्व जामदग्न्येति पञ्चप्रवरा देवी पुत्र परिवार समन्विता अहंमम, इष्टदेवता वालादेवी प्रीतये ब्राह्मणद्वारा कृतैतत्कोटि होम कर्मण स्साङ्ग भूत स्विष्टकृद्धोमान्त तत्तद्देवता हवन पूजनादि कर्मणां च साङ्गता सिद्ध्यर्थं, कृता कृतावेक्षण रूप ब्रह्मकर्म प्रतिष्ठार्थ मपूर्ण पूरणार्थ मिदं (षट्पञ्चाशदधिक द्विशत मुष्टि परिमित) तण्डुल पूर्णपात्रं सवस्त्र फल दक्षिणं प्रजापति दैवतं कौण्डिन्य गोत्राय रविनाथ शर्मणे ब्रह्मणे तुभ्यमहं संप्रददे.

प्रणीतोदकेनाभिषेकः:- ॐ सुमित्रियानऽ आपऽ ओषधयः सन्तु।

ऐशान्यां प्रणीताविमोकः:- ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि
यञ्च वयं द्विष्मः ॥ x — x

स्तरणाक्रमेण वर्हिः प्राप्य आज्येनाभिघार्य-

ॐ देवागातु विदो गातुं वित्वा गातुमित।
मनसस्पत इमन्देव यज्ञꣳ स्वाहा वाते धाः।
इत्यग्नौ जुहुयात्

मेधा—

ॐ सदसस्पतिमद्भुतं प्रियमिन्द्रस्यकाम्यम् ।
सनिम्मेधामयासिषꣳ स्वाहा ।
याम्मेधान्देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥
मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधान्धाता ददातु मे स्वाहा ॥
इदम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥

वस्त्रहोम—

ॐ एधोस्येधिषीमहि समिदसि तेजोसि तेजो मयि धेहि ।
समाववर्ति पृथिवी समुषाः समु सूर्यः समु विश्वमिदं जगत् ।
वैश्वानरज्योतिर्भूयासं विभून्कामान्व्यश्नवै भूः स्वाहा ॥

चरुहोम—

ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतञ्च श्रद्धाञ्चोपैमीन्धे त्वा दीक्षितोऽअहम् स्वाहा ॥

अग्नेर्नमस्कारः—

श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं बलं श्रियम् ।
आयुष्यं द्रव्यमारोग्यं देहि मे हव्यवाहन ॥
त्वदर्थोयं समारम्भः कृष्णवर्त्मन्नमोस्तु ते ॥

अङ्गालम्भनम् — अधोमुखमग्नौ पाणी प्रताप्य —

ॐ तनूपा अग्नेसि तन्वं मे पाहि ।
ॐ आयुर्दा अग्ने स्यायुर्मे देहि ।
ॐ वर्चोदा अग्नेसि वर्चो मे देहि ।
अग्ने यन्मे तन्वा ऊनन्तन्म आपृण ।
मेधां मे देवः सविता आदधातु ।
मेधां मे देवी सरस्वती आदधातु ।
मेधामश्विनौ देवा वाधत्तां पुष्करस्रजौ ॥

सर्वाङ्गे — ॐ अङ्गानि च म आप्यायताम् ।
मुखे — वाक्च म आप्यायताम् ।
नासिकयोः — प्राणश्च म आप्यायताम् ।
नेत्रयोः — चक्षुश्च म आप्यायताम् ।
श्रोत्रयोः — श्रोत्रश्च म आप्यायताम् ।
बाह्वोः — यशो बलश्च म आप्यायताम् ।

घृतच्छाया -

अलक्ष्मीर्यच्च दौस्थ्यं मे सर्वगात्रे व्यवस्थितम् ।
तत्सर्वं शामयाज्य त्वं लक्ष्मीं पुष्टिं च वर्धय ॥
याः क्षीरसागरोत्पन्ना दूर्वाः पीयूषसम्भवाः ।
तासां स्पर्शनमात्रेण आयुर्वृद्धिर्यशोवलम् ॥ स्पर्शमंत्र.
आज्यं तेजः समुद्दिष्टमाज्यं पापहरं परम् ।
आज्ये हि सर्वदेवानां प्रियमाज्ये स्थितं जगत् ॥
तदाज्यवीक्षणे भक्त्या कृते मङ्गलमाप्नुयात् ।
दुःस्वप्नं दुर्निमित्तं च विघ्नौघो नश्यति ध्रुवम् ॥
तेजः प्रज्ञा च शौर्यं च बलमायुः प्रवर्धते ।
पुण्यं सप्ताङ्ग राज्यं च भवेदन्यदभीप्सितम् ॥
ज्ञात्वा वाऽज्ञानतो वापि मनोवाक्काय कर्मभिः ।
कृतं यत्पातकं तन्मे घृतस्पर्शाद्विनश्यतु ॥
आज्ये चैव मुखं दृष्ट्वा सर्वं पापं विनश्यतु ।

इति छायां निरीक्ष्य आज्यकांस्यपात्रायनमः इति पूजयेत् ।

सङ्कल्पः — पूर्वोक्त सङ्कल्प सिद्धिरस्तु. वत्सगोत्रा वत्स
भार्गव च्यावनाप्नवानौर्व जामदग्न्येति पञ्चप्रवरा
देवी पुत्र परिवार समन्विता अहं मम, दीर्घायुरारोग्या
नन्द क्षेमादि सकलाभीष्ट सिद्ध्ये, इष्टदेवता वालामन्त्रेण
ब्राह्मण द्वारा कृतस्य कोटिहोम कर्मण उत्तराङ्गतया

इदमवलोकिमाज्यं मृत्युञ्जयदैवतं हिरण्यं वह्निदैवतं कांस्यपात्रं विश्वकर्मदैवतं महामृत्युञ्जय प्रीतये .... गोत्राय .... शर्मणे ब्रह्मणे तुभ्यमहं सम्प्रददे.।

प्रार्थना – कामधेनोः समुद्भूतं देवानामुत्तमं हविः।
आयुर्वृद्धिकरं दातु राज्यं पातु सदैव मे॥

दानप्रतिष्ठा – कृतैतत्सुवर्ण कांस्यपात्र घृतदानकर्मणः प्रतिष्ठा साङ्गता सिद्ध्यर्थमिमां दक्षिणां रजतं चन्द्र दैवतं कौशिक गोत्राय रविनाथ शर्मणे ब्रह्मणे तुभ्यमहं संप्रददे.

छायादर्शनं पापनाशनमरिष्टं हन्तु॥

सवत्सगोदानम् –

गोपूजनम् – नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥

ब्राह्मणपूजनं – नमो ब्रह्मण्यदेवाय गोब्राह्मण हिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥

सङ्कल्पः – पूर्वोक्त सङ्कल्प सिद्धिरस्तु. वत्सगोत्रा वत्स भार्गव च्यावनाप्नवानौर्व जामदग्न्येति पञ्चप्रवरा .... देवी पुत्र परिवार समन्विता अहं मम, इष्टदेवतायाः

वोलायाः प्रीतिद्वारा सकलेष्टावाप्तये, ब्राह्मणद्वारा
यथाकालेन विहितेस्मिन्कोटिहोमकर्मणि तदङ्ग
कर्मसु च मन्त्रोच्चारणवैकल्याङ्गवैगुण्यादिजनित
न्यूनातिरिक्तत्वादि समस्तदोषनिरसनपूर्वकं यज्ञ
साद्गुण्यसिद्धिद्वारा श्रुतिस्मृतिपुराणागमोक्त साङ्गो
पाङ्ग फलावाप्तये, इमां स्वर्णशृङ्गीं रौप्यखुरां ताम्र
पृष्ठां कांस्यदोहां सुवर्णतिलकोपेतां घण्टाभूषितां
शुभ्रवस्त्राच्छन्नां सुपूजितां (सवत्सां पयस्विनीं) गां
रुद्रदेवताकां (तन्मूल्योपकल्पितं द्रव्यं रजतं चन्द्रदैवतं) काश्यप
गोत्राय ··· शर्मणे आचार्याय तुभ्यमहं सम्प्रददे.

प्रार्थना– यज्ञसाधनभूताया विश्वस्याघप्रणाशिनी।
विश्वरूपधरो देवः प्रीयतामनया गवा ॥

दानप्रतिष्ठा– कृतैतद्यज्ञान्तगोदानकर्मणः प्रतिष्ठा
साङ्गतासिद्ध्यर्थमिमां दक्षिणां रजतं चन्द्रदैवतं
काश्यपगोत्राय ··· शर्मणे आचार्याय दानप्रतिष्ठा
त्वेन तुभ्यमहं सम्प्रददे. तत्सन्मम. ॥

प्रदक्षिणा– यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे ॥

गोपुच्छोदकेनाभिषेक– शान्तिरस्तु. पुष्टिरस्तु. वृद्धिरस्तु.
यच्छ्रेयस्तदस्तु. यत्पापं तत्प्रतिहतमस्तु (भूमौ) अमृता
भिषेकोस्तु। शान्तिः सुशान्तिर्भवतु ॥



भद्रासन

अभिषेकः –

कुण्डस्येशानभागे वेद्याः पश्चिमतो भद्रासनोपविष्टं प्राङ्
मुखं यजमानं साचार्या उदङ्मुखा ऋत्विजः ग्रहकलशो
दकेन कुण्डकलशोदकेन च मन्त्रैरभिषिञ्चेयुः –
ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः ॥
आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ॥
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥१॥
इमन्देवा असपत्नꣳ सुवध्वम्महते क्षत्राय महते ज्यैष्ठ्या
य महते जानराज्यायेन्द्रस्येन्द्रियाय ॥ इमममुष्य पुत्रम
मुष्यै पुत्रमस्यै विश ऽ एष वोमी राजा सोमोस्माकं ब्राह्म
णानाꣳ राजा ॥२॥ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथि
व्या ऽ अयम् ॥ अपाꣳ रेताꣳसि जिन्वति ॥३॥ उद्बु
ध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते सꣳ सृजेथामयञ्च।

अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्विश्वेदेवायजमानश्चसी
दत ॥४॥ बृहस्पतेऽअतियदर्य्यौऽअर्हाद्द्युमद्विभातिक्र
तुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्र
विणन्धेहिचित्रम् ॥५॥ अन्नात्परिस्रुतोरसंब्रह्मणा
व्यपिबत्क्षत्रंपयःसोमंप्रजापतिः ॥ ऋतेनसत्यमिन्द्रि
यंविपानꣳ·शुक्रमन्धसऽइन्द्रसेन्द्रियमिदंपयोमृतंमधु ॥
६ ॥ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्यो
रभिस्रवन्तुनः ॥७॥ कयानश्चित्रऽआभुवदूतीसदा
वृधःसखा ॥ कयाशचिष्ठयावृता ॥ केतुङ्कृण्वन्नकेतवेपे
शोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथा ॥८॥ त्र्यंब
कंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्ध
नान्मृत्योर्मुक्षीयमामृतात् ॥१॥ श्रीश्चतेलक्ष्मीश्च
पत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥
इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण ॥
२ ॥ यदक्रन्दःप्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवा
पुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूऽउपस्तुत्यं
महिजातन्तेऽअर्वन् ॥३॥ विष्णोरराटमसिविष्णोः
श्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णव
मसिविष्णवेत्वा ॥४॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसी

जायतामाराष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमहारथो
जायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्यो
षाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यवीरोजा
यतान्निकामेनिकामेनः पर्ज्जन्योवर्षतुफलवत्योनऽ
ओषधयः पच्यन्तांयोगक्षेमोनःकल्पताम्॥५॥
सजोषाऽइन्द्रः सगणोमरुद्भिः सोमम्पिबवृत्रहाशूर
विद्वान्॥जहिशत्रूँ१॥रपमृधोनुदस्वाथाभयङ्कृणुहि
विश्वतोनः॥६॥यमायत्वामखायत्वासूर्य्यस्यत्वा
तपसे॥देवस्त्वासवितामध्वानक्तुपृथिव्याःसꣳस्पृ
शस्पाहि॥अर्चिरसिशोचिरसितपोसि॥७॥कार्षि
रसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि॥सममापोऽअ
द्भिरग्मतसमोषधीभिरोषधीः॥८॥चित्रावसोस्वस्ति
तेपारमशीय॥९॥अग्निन्दूतंपुरोदधेहव्यवाहमुपब्रुवे॥
देवाँ२॥ऽआसादयादिह॥१॥अप्स्वग्नेसधिष्टवसौ
षधीरनुरुध्यसे॥गर्भेसञ्जायसेपुनः॥२॥स्योना
पृथिविनोभवानृक्षरानिवेशनि॥यच्छानःशर्मसप्र
थाः॥३॥इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्॥समू
ढमस्यपाꣳसुरे॥४॥त्रातारमिन्द्रमवितारमिन्द्रꣳ
हवेहवेसुहवꣳशूरमिन्द्रम्॥ह्वयामिशक्रंपुरुहूत

मिन्द्रꣳ स्वस्तिनोमघवाधात्विन्द्रः ॥५॥ अदित्यैरा
स्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्मायदीष्व ॥
६॥ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिता
वभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳ
स्यामपतयोरयीणाम् ॥७॥ नमोस्तुसर्पेभ्योयेके
चपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यःसर्पे
भ्योनमः ॥८॥ व्रह्मयज्ञानंप्रथमंपुरस्ताद्विशीमतः
सुरुचोवेनऽआवः ॥ सवुध्न्याऽउपमाऽअस्यविष्ठाः
शतश्चयोनिमशतश्चविवः ॥९॥ ~~ऽनिमन्वाधिरेतना~~ ॥
देवस्यत्त्वासवितुःप्प्रसवेश्विनोर्व्वाहुभ्याम्पूष्णो
हस्ताभ्याम् ॥ सरस्वत्त्यैवाचोयन्तुर्य्यन्त्रियेदधा
मिवृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ ॥
देवस्यत्त्वासवितुःप्प्रसवेश्विनोर्व्वाहुभ्यांपूष्णोह
स्ताभ्याम् ॥ अश्विनोर्भैषज्ज्येनतेजसेव्रह्मवर्च्चसा
याभिषिञ्चामिसरस्वत्त्यैभैषज्ज्येनवीर्य्याऽयान्ना
द्यायाभिषिञ्चामीन्द्रस्येन्द्रियेणवलायश्रियै
यशसेभिषिञ्चामि ॥ कोसिकतमोऽसिकस्मैत्वा
कायत्त्वा ॥ सुश्लोकसुमङ्गलसत्त्यराजन् ॥ शि
रोमेश्रीर्य्यशोमुखन्त्विषिःकेशाश्चश्मश्रूणि ॥

राजामेप्प्राणोऽअमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रम्॥ जिह्वा
मेभद्रंवाङ्महोमनोमन्युः स्वराड्भामः॥ मोदाःप्प्रमोदाऽ
अङ्गुलीरङ्गानिमित्रम्मेसहः॥ बाहूमेबलमिन्द्रियꣳ
हस्तौमेकर्म्मवीर्य्यम्॥ आत्माक्षत्रमुरोमम॥ पृष्ठी
र्म्मेराष्ट्रमुदरमꣳसौग्रीवाश्चश्रोणी॥ ऊरूऽअरत्नी
जानुनीविशोमेङ्गानिसर्व्वतः॥ नाभिर्म्मेचित्तंविज्ञानं
पायुर्म्मेपचितिर्भसत्॥ आनन्दनन्दावाण्डौमेभगःसौ
भाग्यम्पसः॥ जङ्घाभ्यांपद्भ्यांधर्म्मोस्मिविशिराजा
प्रतिष्ठितः॥ प्रतिक्षत्रेप्प्रतितिष्ठामिराष्ट्रेप्प्रत्यश्वेषुप्र
तितिष्ठामिगोषु॥ प्रत्यङ्गेषुप्प्रतितिष्ठाम्यात्मन्प्रति
प्प्राणेषुप्प्रतितिष्ठामिपुष्टेप्प्रतिद्यावापृथिव्योःप्प्रति
तिष्ठामियज्ञे॥ त्रयादेवाऽएकादशत्रयस्त्रिꣳशाः
सुराधसः॥ बृहस्प्पतिपुरोहितादेवस्यसवितुःसवे॥ देवा
देवैरवन्तुमा॥ प्रथमाद्वितीयैर्द्वितीयास्तृतीयैस्तृती
याःसत्येनसत्त्यंयज्ञेनयज्ञोयजुर्भिर्य्यजूꣳषिसाम
भिःसामान्यृग्भिर्ऋचःपुरोनुवाक्याभिःपुरोनुवा
क्यायाज्याभिर्य्याज्यावषट्कारैर्व्वषट्काराऽआ
हुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा॥ ॥
ॐसमुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायन्त्यनिविशमानाः॥

इन्द्रोयावज्रीवृषभोररादता ऽ आपोदेवीरिहमामवन्तु॥
याऽआपोदिव्याऽउतवास्रवन्तिखनित्रिमाऽउतवायाः
स्वयञ्जाः॥ समुद्रार्थायाः शुचयः पावकास्ताऽआपोदे
वीरिहमामवन्तु॥ यासांराजावरुणोयातिमध्येसत्यानृ
ते अवपश्यञ्जनानाम्॥ मधुश्चुतः शुचयोयाः पावका
स्ताऽआपोदेवीरिहमामवन्तु॥ यासुराजावरुणोयासु
सोमोविश्वेदेवायासूर्जंमदन्ति॥ वैश्वानरोयास्वग्निः प्र
विष्टस्ताआपोदेवीरिहमामवन्तु॥ त्रायन्तामिहदेवास्त्रा
यतांमरुतांगण ः॥ त्रायन्तांविश्वाभूतानियथायमर
पाअसत॥ आपइद्वाउभेषजीरापोअमीवचातनीः॥
आपः सर्वस्यभेषजीस्तास्तेकृण्वन्तुभेषजम्॥ हस्ताभ्यां
दशशाखाभ्यांजिह्वावाचपुरोगवीः॥ अनामयित्नुभ्या
न्त्वाताभ्यान्त्वोपस्पृशामसि॥ इमाआपः शिवतमाइमाः
सर्वस्यभेषजीः॥ इमाराष्ट्रस्यवर्द्धनीरिमाराष्ट्रभृतोजनाः॥
याभिरिन्द्रम भ्यषिञ्चत्प्रजापतिः सोमंराजानंवरुणंयमं
मनुं॥ ताभिरद्भिरभिषिञ्चामित्वामहंराज्ञांत्वमधि
राजोभवेह॥ महान्तंत्वामहीनांसम्राजेचर्षणीनाम्॥
देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्॥ देवस्यत्वा
सवितुः प्रसवेश्विनोर्वाहुभ्यांपूष्णोहस्ताभ्याम्॥ अग्ने

स्तेजसासूर्य्यस्यवर्चसेन्द्रस्येन्द्रियेणाभिषिञ्चामिबला
यश्रियैयशसेन्नाद्याय॥
ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः
शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्तिर्विश्वे
देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव
शान्तिः सामा शान्तिरेधि॥ तच्चक्षुर्द्देवहितं पुरस्ताच्छु
क्रमुच्चरत॥ पश्येम शरदः शतꣳ जीवेम शरदः शतꣳ
शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः
स्याम शरदः शतम्भूयश्च शरदः शतात॥ स्वस्ति नऽइ
न्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः॥ स्वस्ति नस्ता
र्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु॥ विश्वा
नि देव सवितर्द्दुरितानि परासुव॥ यद्भद्रन्तन्नऽआसुव॥

ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवोजगन्नाथस्तथा सङ्कर्षणोविभुः॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयायते।
आखण्डलोग्निर्भगवान्यमो वै निर्ऋतिस्तथा॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा॥
कीर्तिर्लक्ष्मीधृतिर्मेधा पुष्टिः श्रद्धाक्रियामतिः।
बुद्धिर्लज्जावपुः शान्तिस्तुष्टिः कान्तिस्तु मातरः॥

एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो वुधजीव सितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुकेतुश्च तर्पिताः ।
देवदानव गन्धर्वा यक्ष राक्षस पन्नगाः ॥
ऋषयो मुनयो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सर साङ्गणाः ॥
अस्त्राणि सर्व शस्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥
आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
अभिषिञ्चन्तु ते सर्वे धर्मकामार्थसिद्धये ॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थ घोराणि तै रक्षास्मां तथा भुवम् ॥
खड्गशूलगदादीनि यानि चास्त्राणि तेम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥

ॐ शान्तिरस्तु. ॐ पुष्टिरस्तु. ॐ वृद्धिरस्तु. ॐ यच्छ्रेयस्तदस्तु. ॐ यत्पापं तत्प्रतिहतमस्तु. इति भूमो. ॐ द्विपदे चतुष्पदेभ्यः शान्तिर्भवतु. ॐ सर्वारिष्ट शान्तिरस्तु. ॐ अमृताभिषेकोस्तु. शान्तिः सुशान्तिर्भवतु ॥ इति

Nepal Sanskrit University, Balmandir, Kathmandu

अभिषेकसमाप्तौ-
उत्तराङ्गपूजा–

गणपतयेनमः। ब्रह्मादिभ्योनमः। आदित्यादिनवग्रहेभ्योनमः। ईश्वराद्यधिदेवेभ्योनमः। अग्न्यादिप्रत्यधिदेवेभ्योनमः। विनायकादिलोकपालेभ्योनमः। इन्द्रादिदिक्पालेभ्योनमः। ग्रहमण्डलोपरि कलशोपरि सर्वतोभद्रमण्डलोपरि द्वारेषु चावाहिताभ्यो देवताभ्यो नमः। वास्तुदेवताभ्योनमः। गरुत्मनेनमः। प्रधानदेवतायै साङ्गायै सावरणायै सायुधायै सवाहनायै बालात्रिपुरसुन्दर्यै इष्टदेवतायैनमः।

इति गन्धाक्षत पुष्प धूपदीप नैवेद्यादिभिः संपूज्य नीराजनं कुर्यात्॥

अर्घ्यनिवेदनम्–

विश्वेशि करुणामूर्ते भक्तानुग्रहकारिके।
अर्घ्यं निवेदयामीदं प्रसीद प्रणतप्रिये॥

प्रार्थना–

कारुण्यनिलये देवि सर्वसम्पत्तिसंश्रये।
शरण्ये वत्सले मातः कृपां मयि सदा कुरु॥
आणव प्रमुखैः पाशैः पाशितानां सुरेश्वरि।
दीनानां करुणाधारे कुरु कारुण्यमीश्वरि।

ऐहिकामुष्मिकैर्भोगैः संवर्द्धास्यामहं शिवे ।
त्वद्भक्तिः सकला मह्यं दीयतां निष्कला श्रया ॥
कर्मणा मनसा वाचा विश्वेशि त्वं गतिर्मम ।
अन्तश्चारेण भूतानां द्रष्ट्री त्वं परमेश्वरि ॥
यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् ।
निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ॥
आवाहनं नजानामि नजानामि तवार्चनम् ।
पूजामर्चां नजानामि त्वं गतिः परमेश्वरि ॥
स्नानं सन्ध्यां जपं होमं ध्यानं पूजनमेव च ।
नजानामि नजानामि विश्वेशि त्वं गतिर्मम ॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादात्सुरेश्वरि ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं च यन्मम ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥

देवप्रतिमादानम्—

पूर्वोक्त सङ्कल्पसिद्धिरस्तु— वत्सगोत्रा वत्सभार्गव च्यावनाप्नवा और्व जामदग्न्येति पञ्च प्रवरा ··· देवी पुत्रपरिवार समन्विता अहं मम, इष्टदेवता वात्मदेवता प्रीतये ब्राह्मणद्वारा कृतस्य कोटिहोम कर्मणः साद्गुण्य सिद्ध्ये

तदङ्ग· तया सुपूजितां तत्तत्स्थान स्थापित गणपतिमातृका वास्तुदेवता मण्डपदेवता ग्रहाधिदेवता प्रत्यधिदेवता गरूडादीनां सुपूजिताभिः सौवर्ण प्रतिमाभिः समन्वितां सौवर्णी मिष्टदेवता बाला यन्त्रप्रतिमां सोपस्करां काश्यपगोत्राय · · · शर्मणे आचार्याय तुभ्यमहं सम्प्रददे.

प्रार्थना- अनेन प्रतिमादान कर्मणा जगदीश्वरि ।
भक्तकल्पलतादेवी श्रीबाला प्रीयतां मम ।

दानप्रतिष्ठा- अद्यकृतैतद्गणपत्यादि प्रतिमा समन्वित सोपस्कर बालादेवता प्रतिमादानकर्मणः प्रतिष्ठासाङ्गता सिद्ध्यर्थमिदं सुवर्ण वह्निदैवतं काश्यपगोत्राय · · · · शर्मणे आचार्याय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ।

हेमदक्षिणादानम्-

अग्नेः पश्चिमभागमागत्य प्राङ्मुखउपविश्य देयद्रव्यं पूजयेत्-

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलद मतः शान्तिं प्रयच्छ मे ॥
देयद्रव्येभ्यो नमः ।

सङ्कल्पः — हरिः ॐ तत्सत् विष्णुः ३ श्रीमद्भगवतो
महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकल
जगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेत
वराहकल्पे प्रह्लादाधिपत्ये वैवस्वतमन्वन्तरे अष्टा
विंशतितमे युगे सत्यत्रेताद्वापरान्ते कलियुगस्य प्रथम
चरणे जम्बूद्वीपे भारतवर्षे आर्यावर्तैकदेशे आनन्द
कानने महाश्मशाने गौरीपीठे त्रिकण्टकविराजिते
विश्वेश्वराधिष्ठिते अविमुक्तवाराणसीक्षेत्रे भागीरथ्याः
पश्चिमे कूले इहपुण्यभूमौ, षष्टिसंवत्सराणां मध्ये
नन्दननाम संवत्सरे श्रीसूर्ये उत्तरायणे शिशिरर्तौ मासो
चान्द्रमानाधे माघि
त्तमे सौरात चान्द्रस्य फाल्गुने मासि शुक्ल पक्षे कुम्भरा
शिस्थे सूर्ये मीनराशिस्थे गुरौ सिंह राशिस्थे चन्द्रे
शेषेषु ग्रहेषु यथायथस्थानस्थेषु सत्सु मघा नक्षत्रे
आतिगण्ड योगे बालव करणे एवंग्रहगुणयोगविशिष्टायां
शुक्र भासरान्वितायां पूर्णिमा पुण्यतिथौ. वत्सगोत्रा वत्स
भार्गव च्यावनाप्नवा नौर्व जामदग्न्येति पञ्चप्रवरा
देवी पुत्रपरिवारसमन्विता अहं मम, इष्टदेवताया बाला
देव्याः श्चरण पङ्कज प्रसादसिद्धिद्वारा पूर्वसङ्कल्पित
प्रीतिफलावाप्तये गतमाघकृष्णपञ्चमीमारभ्याद्य

पर्यन्तं ब्राह्मणद्वारा कृतस्य स्वेष्टदेवता मूलमंत्रेण
चर्वाज्यादिद्रव्यैः कोटिहोमकर्मणः तदङ्गतया आचार्य
गणपति ब्रह्म सदस्य होतृत्विग्द्वारपाल जापकद्वारा
कृतानां मण्डपस्थापित गणपत्यादि तत्तद्देवता सहित
प्रधानदेवता पूजन तत्तत्सूक्त जपपाठ पूजितदेवतास्नान
पूर्णाहुत्यादि पूर्वोत्तराङ्ग कर्मणां च साङ्गुण्यसिद्धि
पूर्वकं श्रुतिस्मृतिपुराणागमोक्ताभीष्टफलावाप्तये
आचार्यदक्षिणात्वेन, महत गोशङ्कु(~~भूमि तुला रथ गृह सोप~~
~~स्कर शय्या) वस्त्रालङ्कारादि~~ निष्क्रयत्वेन चोपकल्पित
मिदं रजतं चन्द्रदैवतं काश्यपगोत्राय केशरी शर्मणे
आचार्याय, तथा गणपति ब्रह्म सदस्य होतृत्विग्द्वार
पाल जापक परिचारक दक्षिणात्वेन चोपकल्पितमिदं
द्रव्यं रजतं चन्द्रदैवतं नानानामगोत्रेभ्यो गणपति ब्रह्म
सदस्य होतृत्विग्द्वारपाल जापक परिचारकेभ्यो यथा
भागं विभज्य दातुमहं जले समुत्सृजे. तत्सन्मम. ॥
~~भोजनसङ्कल्पः~~ :– देयद्रव्येभ्यो नमः इति सम्पूज्य.
पूर्व सङ्कल्पसिद्धिरस्तु. वत्सगोत्रा वत्सभार्गव च्याव
नाप्नवा नौर्व जामदग्न्येति पञ्चप्रवरा . . . देवी पुत्र
परिवार समन्विता अहं मम. इष्टदेवता वाला प्रीतये

ब्राह्मणद्वारा कृतेस्मिन्कोटिहोमकर्मणि मन्त्रोच्चारणवैकल्यादि जनित न्यूनत्वातिरिक्तत्वादि समस्तदोष निरसनपूर्वकं साद्गुण्यसिद्धिद्वारा कोटिहोमकल्पोक्त साङ्गोपाङ्ग फल प्राप्तये नानानाम गोत्रा सहस्त्रब्राह्मणानेभिर्गन्धपुष्पाक्षतादिभिर्वृत्वा, तेभ्यो यथा संपादितमिदं मिष्टान्न ताम्बूलादि भोज्यवस्तु, भोजनदक्षिणात्वेनेदं द्रव्यं रजतं चन्द्रदैवतं च, यथा भागं विभज्य दातुमहं समुत्सृजे. तन्सन्नमम. ॥

कन्याकुमारपूजनम् –

सङ्कल्पः – पूर्व सङ्कल्पसिद्धिरस्तु. वत्सगोत्रा वत्स भार्गव च्यावनाप्नवानौर्व जामदग्न्येति पञ्चप्रवरा …… देवी पुत्र परिवार समन्विता अहं मम, इष्टदेवता वाला प्रीतये ब्राह्मणद्वारा चर्वाज्यादिद्रव्यैः स्विष्टदेवता मंत्रेण कृतस्य कोटिहोमकर्मणस्तदङ्गभूत पूजनादि कर्मणां च साद्गुण्यसिद्धये, तदुत्तराङ्गतया देवीरूपाणामासां नवविप्रकुमारीणां वटुकरूपस्यास्य विप्रकुमारस्य च पाद्यार्घ्याचमनीय गन्धपुष्पाक्षत माल्य परिधानीय वस्त्र सौभाग्यद्रव्य भूषण धूपदीपनैवेद्य दक्षिणादिभिर्यथा सम्पादितोपचारैः पूजनमहं करिष्ये.

अर्घ्यं संस्थाप्य आवाहनादि पूर्वकमुपचारैः पूजां कुर्यात्.

कुमारीणाम्- मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ।
जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ।
पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते ॥
कुमारीभ्यो नमः ॥

कुमारस्य- जगत्पूज्य जगद्वन्द्य सर्वशक्तिस्वरूपक ।
पूजां गृहाण कौमार जगद्भ्रातर्नमोस्तु ते ॥
वटुकाय नमः ॥

पूजां समाप्य अर्घ्यं निवेदयेत्.
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादात्सुरेश्वरि ॥
मंत्रहीनं क्रियाहीनं भक्तिहीनं च यन्मम ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥

भूयसीदक्षिणादानम्—
हिरण्यगर्भ गर्भस्थं हेमवीजं विभावसोः ।
अनन्त पुण्य फलद मतः शान्तिं प्रयच्छ मे ॥

देयद्रव्याय नमः. इति देयद्रव्यं संपूज्य—

सङ्कल्पः— पूर्व सङ्कल्प सिद्धिरस्तु. वत्सगोत्रा वत्स

भार्गवच्यावनाप्नव: नौर्वजामदग्न्येति पञ्च प्रवरा ···· देवी पुत्र परिवार समन्विता अहं मम, इष्ट देवता बाला प्रीतये ब्राह्मणद्वारा कृतेस्मिन्कोटिहोमकर्मणि, तदङ्गतया कृतेषु अखण्डदीपस्थापन कलश गणेश मातृका पूजनाभ्युदयिक वास्तु ग्रहाधिदेव प्रत्यधिदेव मण्डपदेवता मण्डलदेवता गरुत्मदादिदेवता प्रधानदेवता वरुणदेवतादि स्थापन नित्यार्चनाग्निस्थापनाग्नि पूजन पूजितदेवता हवन तत्तत्सूक्त जपपाठादि समस्त कर्मसु च, मंत्रवर्णोच्चारण वैकल्प नियमद्रव्य श्रद्धा दक्षिणा विधानादि वैकल्प न्यूनत्वातिरिक्तत्व च्युत्यन्यथा भावादि जनित समस्त दोषध्वंसन पूर्वकं, यज्ञसाद्गुण्यसिद्धि द्वारा श्रुतिस्मृति पुराणागम कोटिहोम कल्पोक्त साङ्गोपाङ्गाभीष्ट फलप्राप्तये, इमां रजतरूपां दक्षिणां चन्द्रदेवताकां, नाना नाम गोत्रेभ्य आचार्य गणपति ब्रह्म सदस्य होतृत्विग्द्वारपाल जापक परिचारकेभ्यो ऽन्येभ्यश्च ब्राह्मणेभ्यो यथा भागं विभज्य दातुमहमुत्सृजे. तत्सन्नमम ।

ततोऽग्निं संपूज्य- ईशानदिग्भागात् स्त्रुचा स्त्रुवेण वा भस्म गृहीत्वा विभूतिं धारयेत ।

देवविसर्जनम् -

अग्नेः - गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥
भो भो वह्ने महाशक्ते सर्वकर्म प्रसाधक ।
कर्मान्तरेऽपि सम्प्राप्ते सान्निध्यं कुरु सादरम् ॥
यज्ञ यज्ञपतिं गच्छ यज्ञं गच्छ हुताशन ।
स्वां योनिं गच्छ देवेश पूरयास्मन्मनोरथम् ॥

आचार्यो ग्रहादिसमीपं गत्वा प्रदक्षिणीकृत्य प्रादक्षिण्येन उत्तरस्यां दिशि स्रुवेण ग्रहादीन् विसृजेत् -

यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

यजमानाय प्रसादार्पणम् -

अभिमन्त्रणम् ओं आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

मा। दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खना

म्यहम् ॥ अथोत्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥२॥ मनसः काममाकूतिम्वाचः सत्यमशीय ॥ पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥३॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः ॥ घृतेन त्वन्तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥४॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ॥ धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥५॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोस्तु मित्राणामुदयस्तव ॥
भद्रमस्तु । शिवं चास्तु महालक्ष्मीः प्रसीदतु ।
रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्त्यर्थिनामाशा स्त्वं जीव शरदां शतम् ॥

भस्मतिलकधारणम् –

रक्षाबन्धनम् –

येन वद्धो वली राजा दानवेन्द्रो महावलः ।
तेन त्वां प्रतिवध्नामि रक्षे माचल माचल ॥

ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥
(ललाटे) (ग्रीवायाम् । (दक्षिणबाहुमूले) (हृदि)

श्रेयसाधनम्-

साचार्या ऋत्विजः सम्भूय-

इदमस्माभिः सर्वैः सम्भूय सम्पादितं साङ्गोपाङ्गं इष्टदेवताया बालादेव्याः कोटिहोमकर्म भवत्वे समस्त शुभ फलद मस्तु.

इति श्रेयः साधन वाक्यं पठित्वा यजमानाय प्रसाद मर्पयेयुः॥

मण्डपदानम्- पश्चिम द्वारदेहलीं गृहीत्वा-

पूर्व सङ्कल्प सिद्धिरस्तु. वत्स गोत्रा वत्स भार्गव च्यावनाप्नवानौर्वजामदग्न्येति पञ्चप्रवरा ··· देवी पुत्र परिवार सन्विता अहं मम, इष्टदेवता बाला प्रीतये ब्राह्मण द्वारा कृतस्य कोटिहोम यज्ञस्य साद्गुण्य सिद्धये, तत्सिद्ध्यर्थ मुपकल्पितं ध्वजपताका तोरण दीपकलश गणेश ग्रहवास्तुवेदी प्रधानदेवतावेदी सहितं सपरिच्छद मिदं मण्डपं विश्वकर्म दैवतं काश्यपगोत्राय ···· शर्मणे आचार्याय तुभ्यमहं सम्प्रददे.

प्रार्थना- यज्ञमण्डपदानेन प्रसन्ना जगदीश्वरी।
विधाय यज्ञसम्पूर्तिं मम शान्तिं प्रयच्छतु॥

दानप्रतिष्ठा –

कृतैतन्मण्डपदानकर्म्मणः प्रतिष्ठासाङ्गतासिद्ध्यर्थमिदं द्रव्यं सुवर्णं वह्निदैवतं काश्यपगोत्राय ‥ शर्म्मणे आचार्याय दानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे।

यजमानोऽञ्जलिं बध्वा ब्राह्मणान्प्रार्थयेत् –

कर्मण्यस्मिन्मया विप्रा अज्ञानाद्वा प्रमादतः ।
अकृतं विकृतं वापि सर्वं सम्पूर्णमस्तु मे ॥

भो ब्राह्मणाः युष्मदनुज्ञया अयं कोटिहोमयज्ञः परिपूर्णतमोस्तु ।

ब्राह्मणाः प्रतिब्रूयुः –

बाला त्रिलोकजननी मनुपुङ्गवेन
यः कोटिहोममख एष कृतोति भक्त्या ।
यज्ञेश्वरस्य कृपया परिपूर्णभूतः
सर्वान्प्रपूरयतु नो यजमानकामान् ॥
यन्न्यूनमत्र परिपूर्णतमं तदस्तु
कोट्याहुतौ सकलभूसुरवाक्प्रसादात् ।
यद्यत्समिच्छति फलं यजमानचित्तं
तत्सर्वमेव दिशताद्धुतभुक्प्रसन्नः ॥

एष यज्ञः परिपूर्णतमोस्तु सर्वाभीष्टफलदश्चास्तु ॥

यजमानः करसंपुटं बध्वा प्रार्थयेत् –

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ।
न्यूनं सम्पूर्णतां यातु सद्यो वन्देतमच्युतम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

अनेन कर्मणा श्रीयज्ञपुरुषः प्रीयताम् ।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृति स्वभावात् ।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयेतत् ॥

कर्मण ईश्वरार्पणं कृत्वा नृत्याद्युत्सवं कारयित्वा ब्राह्मणान्सन्तोष्य विसर्जयेत् ॥

इति कोटिहोमपद्धतिः समाप्ता.

शुभं भूयात् ॥

आत्मतत्त्वाय नमः। विद्यातत्त्वाय नमः। शिवतत्त्वाय नमः।
सर्वतत्त्वाय नमः। इत्याचम्य । विनियोगं कुर्यात् । अस्य मन्त्रस्य
दक्षिणामूर्ति ऋषिः गायत्री छन्दस्त्रिपुरा वाला देवता सौः बीजं
क्लीं शक्तिरिष्टार्थे जपे विनियोगः। दक्षिणामूर्तये ऋषये नमः शिरसि।
गायत्रीछन्दसे नमो मुखे। त्रिपुरावाला देवतायै नमो हृदि। सौः बीजाय
नमो गुह्ये। क्लीं शक्तये नमः पादयोः। सौः क्लाँ ऐं अङ्गुष्ठाभ्यां नमः।
सौः क्लीं ऐं तर्जनीभ्यां स्वाहा। सौः क्लूं ऐं मध्यमाभ्यां वषट्। सौः
क्लैं ऐं अनामिकाभ्यां हुम्। सौः क्लौं ऐं कनिष्ठिकाभ्यां वौषट्।
सौः क्लः ऐं करतलकरपृष्ठाभ्यां फट्। सौः क्लाँ ऐं हृदयाय नमः।
सौः क्लीं ऐं शिरसे स्वाहा। सौः क्लूं ऐं शिखायै वषट्। सौः क्लैं ऐं
कवचाय हुम्। सौः क्लौं ऐं नेत्रत्रयाय वौषट्। सौः क्लः ऐं अस्त्राय फट्।
ध्यानम्— रक्ताम्बरां चन्द्रकलावतंसां समुद्यदादित्यनिभां त्रिनेत्राम्।
विद्याक्षमालाऽभयदानहस्तां ध्यायामि वालामरुणाम्बुजस्थाम्।
इति ध्यात्वा मानसोपचारैः संपूज्य। यथाशक्ति जपं कृत्वा
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि।
इति जलेन देव्या वामकरे समर्पयेदिति शुभम्।

ऐं क्लीं सौः सौः क्लीं ऐं

४२५० ~~नं ४४~~

विनासकायनमः

श्रीः॥ शरच्छशधरच्छविच्छुररदंह्रिपाद्यं परं नमामि निगमागमागमपरस्वरूपं गुरुम्॥ समस्तसुरमस्तक
स्थलकिरीटसंकीलितनवलन्मणिमरीचिकाचयविराजिपादाम्बुजम्॥१॥ विघ्नान्संकुर्वन्नो प्रभवति वनोद्भूत
भवनाननाम्भोजैर्वो लीमहिं गुरुकंयकुणगणम्॥ प्रमातुर्नो जानु छरवत्तुममवाकूत्तदपि यद्धते भर्तुर्भव्यं संत
तमवलानां फलति किम्॥२॥ हेरम्ब प्रभविष्णु भावय परम्प्रत्यूहपुञ्जोऽस्मिन्नात्यर्थोन्मन्नमनङ्गज्ञोत्कटकरप्रध्वंस
सिंहक्रमम्॥ अङ्घ्रद्वं त्रिदशारिदावदहनोऽक्रान्तनां नतस्मरणान्नोतायन्नवनीरदैरनिशं पानु कोत्रावद्भिर्भृशाम्
॥३॥ कथंकारं पारं व्रजतु विविधापत्समुद्रयोदखेरे खापर्णातनयशुभवर्णाङ्घ्रितरणिः॥ त्वदीयापायाद्वेन्मयि

विमुखभावंच्चविपुलंनकिंधात्रीभारंसमजनिजनिमेविदधती॥४॥प्रणिहितमनसोहतैनसोयेत्वयिगणना
थमहत्पदंप्रपन्नाः॥त्रिभुवनशरणाधुनामुनातेकथयकथंकृतमागसःकदम्बम्॥५॥त्वामनन्तणनाविनणमि
नणमणतिवर्गोन्तणयगिरिभिद्यज्वानीसगम्यम्॥चेतोमणवलिरतोननकन्धरालिर्यस्मिन्नतिव्रततिमर्पय
तीत्रणयत॥६॥सिन्दूरपूरगौरद्युतिविवुभवभूपांऽपीनस्तनाभाक्लेन्याधीनह्रिगणाढश्रुतमदसविधश्रान्त
लोलालिलेखम्॥७॥अन्मश्रीरमञ्जुध्यानमुदितहरिन्मानिनीमानसेशंदद्यादद्यात्यभीष्टंसततहतनमः
सिद्धिभर्तुर्वपुर्वः॥८॥अपङ्कःपङ्केनक्षितिधरतनूजाङ्कसविधेविधेयांलीलांयोमनुजात्रिऽकानांवितनुथाः

वि॰ना॰स्त॰ ॥प्रमुग्धोऽमुग्धस्त्वं जनयसि विमुग्धांश्च जगतीं प्रपश्यं वापश्यं कृतनतनुरनूनोऽपि सममूः ॥८॥ सादरं पठति
२ यस्तु नित्यं भामा शुभ्रा सुरमत्तिर्भवेज्जनः ॥ सेप्सितश्च कमल्लावत्नं विनोदं त्वं वितीर्णदोरन्तारावः सदा ॥९
॥ ॥इत्यात्रेयवंशावतंसजगन्नाथपण्डितविरचितं विनायकस्तवकदम्बं समाप्तिमेत् ॥ ॥ ॥ ॥ ॥

२

दीक्षाव्यवहार:

कालीतारे महाविद्या षोडशी भुवनेश्वरी ॥ भैरवीछिन्नमस्तान
विद्याधूमावतीतथा ॥ बगलामुखी सिद्धविद्या मातंगीक
मलात्मिका ॥ एतादशमहाविद्या महादेविप्रकीर्तिता ॥१॥

राशिचक्रम्

मे.	वृ	मि	क	सिं	कं	तु	वृ	ध	म	कुं	मी
अ आ इ ई	उ ऊ ऋ	ॠ ऌ ॡ	ए ऐ	ओ औ	अं अः श ष स क्षः	क ख ग घ ङ	च छ ज झ ञ	ट ठ ड ढ ण	त थ द ध न	प फ ब भ म	य र ल व

कुलाकुलचक्रं

वायु.	अग्नि	पृथ्वी	वरुण	आकाश.
अ आ ए क च ट त प य षः	इ ई ऐ ख छ ठ थ फ र क्षः	उ ऊ ओ ग ज ड द ब ल ळः	ऋ ॠ औ घ झ ढ ध भ व सः	ऌ ॡ अं अः ङ ञ ण न म श ह

दी.
१

श्रीगणपतयेनमः॥उछिष्टगणपतयेनमः॥श्रीगुरवेनमः॥अथदीक्षाव्यवहारः॥तत्रादौगुरुलक्षणम्॥शांतोदांतःकु
लीनश्चविनीतःशुद्धवेषवान्॥शुद्धाचारःसुप्रतिष्ठःशुचिर्दक्षःसुबुद्धिमान्॥१॥आश्रमीध्याननिष्ठश्चतंत्रमंत्रविशा
रदः॥निग्रहाऽनुग्रहाशक्तोगुरुरित्यभिधीयते॥२॥शिष्यलक्षणम्॥शांतोविनीतःशुद्धात्माश्रद्धावान्धारणक्षमः॥सम
र्थःसुकुलीनश्चप्रायःसच्चरितोयतिः॥३॥गुरुताशिष्यतावापितयोर्वत्सरवासतः॥सगुरुःस्वाश्रितंशिष्यंवर्षमेकं
परीक्षयेत्॥४॥यथाचराज्ञिवामात्यजोदोषःपत्नीपापंस्वभर्त्तरि॥तथाशिष्यार्जितंपापंगुरुःप्राप्नोतिनिश्चितम्
॥५॥दैवागमेशिववाक्यम्॥गुरुशय्यासनंयानंपादुकोपानत्पीठकम्॥पादोदकंतथाछायांलंघयेन्नकदाचन॥६॥गुरो
रग्रेपृथक्पूजामौद्धत्यंचविवर्जयेत्॥दीक्षांप्रभुत्वंचगुरोरग्रेविवर्जयेत्॥७॥योगिनीतंत्रे॥पितुर्मंत्रंनगृह्णीयात्त
थामातामहस्यच॥सोदरस्यकनिष्ठस्यवैरिपक्षाश्रितस्यच८॥गणेशविमर्शिन्याम्॥यतेर्दीक्षापितुर्दीक्षादीक्षाचव
नवासिनाम्॥८॥विविक्ताश्रमिणोदीक्षानसाकल्यानंदायिका॥नपत्नीं॥दीक्षयेद्भर्त्तानपितादीक्षयेत्सुताम्॥न
पुत्रंनतथाभ्राताभ्रातरंनैवदीक्षयेत्॥महातीर्थेसूर्यग्रहणेसर्वदोषनिवृत्तिः॥११॥निर्बीजंचपितुर्मंत्रंतथामाताम

राम.
१

x स्वा ४

हस्यच॰नखभल्लमंत्रियादत्तंसंस्कारेणैवशुध्यति॥१२॥स्त्रियांविशेषः।साध्वीचैवसदाचारागुरुभक्ताजितेन्द्रिया।सर्वमंत्रार्थ
तत्वज्ञासुशीलापूजनेरता॥१३॥गुरुयोग्याभवेत्साहिविधवापरिवर्जिता।स्त्रियोदीक्षाशुभाप्रोक्तामातुश्चाष्टगुणास्मृता॥१४
स्वप्नलब्धेतुकलशेगुरोःप्राणांनिवेशयेत्॰वटपत्रेकुंकुमेनलिखित्वाग्रहणंशुभम्॥१४॥इदंगुरोरभावे॰दीक्षांविनाजपस्य
दुष्टत्वात्॥दीक्षाहीनोनरःभ्रष्टोनस्वर्गंनाप्नुतेभवेत्॥नभंतेतस्यपितरोरुदंतिभृशादुःखिताः॥१५॥अतः॥दिव्यज्ञानंय
तोदद्यात्कुर्यात्पापस्यसंक्षयम्॥तस्माद्दीक्षेतिप्रोक्तासामुनिभिस्तंत्रवेदिभिः।मननंविश्वविज्ञानंत्राणंसंसारबंधना
त्।यतःकरोतिसंसिद्धोमंत्रइत्युच्यतेततः॥१७॥दीक्षामूलंजपंसर्वंदीक्षामूलंपरंतपः॥दीक्षामाश्रित्यनिवसेद्य
त्रकुत्राश्रमेपिवा॥१८॥अदीक्षितायेकुर्वंतिजपपूजादिकाःक्रियाः।नभवंतिप्रियतेषांशिलायामुप्तबीज
वत्॥१९॥देविदीक्षाविहीनस्यनसिद्धिर्नचसद्गतिः॥तस्मात्सर्वप्रयत्नेनगुरुणादीक्षितोभवेत्॥२०॥अदीक्षितो
पिमरणेरौरवंनरकंव्रजेत्।तस्माद्दीक्षांप्रयत्नेनसदाकुर्याद्वृतांप्रिकान्तो॥२१॥कल्पेदृष्टानुमंत्रंवैयोगृह्णातिनरा
धमः।मन्वंतरसहस्रेषुनिष्कृतिर्नैवजायते॥२२॥नादीक्षितस्यकार्यंस्यात्तपोभिर्नियमैर्व्रतैः।नतीर्थगमनेनापि
नचकायनियंत्रणैः॥२३॥इतिदीक्षाप्रशंसा॥ छ॥नृसिंहार्कवराहाणांप्रासादप्रणवस्यच।सपिंडाक्षमंत्राणांसि

त्रिंशत्वधि कवर्णा लक्ष्मालामंत्राः प्रकीर्त्तिताः =

द्धादीन्नैव शोधयेत्॥१॥ स्वप्नलब्धे स्त्रियादत्ते मालामंत्रे च त्र्यक्षरे॥ वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत्॥२॥ हंसस्याष्टाक्ष
रस्यापि तथा पंचाक्षरस्य च। एकद्वित्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत्॥३॥ मंत्रस्येष्टानिष्टविचारः॥ वाय्वग्निभूजलाका
शाः पंचाशल्लिपयः क्रमात्॥ पंच ह्रस्वाः पंच दीर्घा बिंदंताः संधिसंभवाः॥१॥ अआएकचटतपयषाः मारुताः॥१॥ इई
ऐखछठथफरक्षाः आग्नेयाः॥२॥ उऊओगजडदबलाः पार्थिवाः॥३॥ ऋॠ औघझढधभवसाः वारुणाः॥४॥ लृॡअंअः
ङञणनमशहाः॥ नाभसाः॥५॥ साधकस्याक्षरं पूर्वं मंत्रस्यापि ततः परम्॥ यद्येकभूतदेवत्वं जानीयात्स्वकुलं हितम्॥
१ भौमस्य वारुणं मित्रं आग्नेयस्यापि मारुतम्॥ मारुतं पार्थिवानां च आग्नेयं वा नभसां रिपुः॥३॥ नाभसं सर्वमि
त्रं स्याच्छिद्रं नैव शीलयेत्॥ इति कुलाकुलविचारः॥४॥ अथ राशिः॥ अआइई मेषः॥१॥ उऊऋ वृषः॥२॥ ॠलृॡ मि
थुनः॥३॥ एऐ कर्कटः॥४॥ ओऔ सिंहः॥५॥ अंअः शषसहाः कन्यका॥६॥ कवर्गः तुला॥७॥ चवर्गो वृश्चिकः॥८॥ टवर्गो ध
नुः॥९॥ तवर्गो मकरः॥१०॥ पवर्गः कुम्भः॥११॥ यवर्गो मीनः॥१२॥ अनेन साधकस्य नामादक्षरराशिर्मंत्रस्य राशिः परस्परं
षष्ठाष्टमद्वादशकं त्याज्यं मंत्रं गृह्णीयात्॥ अथ नक्षत्रम्॥ अआ अश्विनि देवः॥ इ भरणी मानुषः॥२ ईउऊ कृत्तिका रा
क्षसः॥३॥ ऋॠलृॡ रो मानुषः॥४॥ ए मृ देवः॥५॥ ऐ आ मानुषः॥६॥ ओऔ पु देवः॥ क ति देवः॥ खग अ राक्षसः॥९॥ घङ म
राक्षसः॥१०॥ च पू मानुषः॥११॥ छज उ मानुषः॥१२॥ झञ ह देवः॥१३॥ टठ चि राक्षसः॥१४॥ ड स्वा देवः॥१५॥ ढण वि राक्षसः॥१६

=४ मारणायाम्. लग्नो धनं भ्रा[illegible] उपत्रं मा कलत्रकाः मरणं धर्म कर्मायव्ययाद्वादश राशयः =४

नयदअदेवः॰१७ घज्ये·राक्षसः॰१८ न्नपफमू राक्षसः॰१९ विपू·मानुषः॰२० भउ मानुषः॥२१ मथ्र·देवः॰२२ धपरध·राक्षसः॰२३
न·श·राक्षसः॥२४॥ बश·पूर्वभाद्रः मानुषः॥२५॥ षसहउत्तर मानुषः॥२६॥ अंअः ल खरेवती देवः॥२७॥ ७॥ स्वजातौ प
रमा प्रीतिर्मध्यमा नरदेवयोः॥ रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥१॥ स्वजन्मनक्षत्रान्मंत्रनक्षत्रं द्वितीयं चतुर्थं ष
ष्ठाऽष्टमनवमं शुभम्॥ स्वनक्षत्रान्मंत्रनक्षत्रं प्रथमं तृतीयं पंचमसप्तमोऽशुभः॥ इति नक्षत्रविचारः॥ अथाऽकथ
हचक्रम्॥ चतुरस्रोल्लिखेद्रेखां चतुःकोष्ठसमन्विते॥ कोष्ठाः षोडश चक्रेऽस्मिन् लिखेद्वर्णाननुक्रमात्॥१॥ इंद्वग्नि
रुद्रनवनेत्रयुगार्कदिक्षु ऋत्वष्टषोडशचतुर्दशभौतिकेषु॥ पातालपंचदशवह्निहिमांशुकोष्ठे वर्णांल्लिखेल्लिपि
भवान्क्रमशः सुधीमान्॥२॥ नामाद्यक्षरमारभ्य यावन्मंत्रादिमाक्षरम्॥ चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्ट
यम्॥३॥ पुनः कोष्ठगकोष्ठेषु सव्यतो नाम्न आदिमः॥ सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया विचक्षणैः॥४॥ सिद्धः सिध्य
ति कालेन साध्यस्तु जपहोमतः॥ सुसिद्धो ग्रहमात्रेण रिपुर्मूलं निकृंतति॥५॥ सिद्धार्णा बांधवाः प्रोक्ताः साध्यास्तु से
वकाः स्मृताः॥ सुसिद्धाः पोषका ज्ञेयाः शत्रवो घातकाः स्मृताः॥६॥ जपेन बंधुः सिद्धः स्यात्साधकोऽधिकसेवया॥
व स्मातिलोषकोऽभीष्टं घातकोनेनाशयेत्क्रमम्॥७॥ सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाधक॥ सिद्धसुसिद्धोऽरि

=सेवको

२=द्विगुणजपात=२

पात्सिद्धारिर्हंतिबांधवान्॥ ॥साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः॥ साध्यसुसिद्धो द्विजपात्साध्यारिर्हंति गोत्रजान्॥ ९॥ सुसिद्धसिद्धोऽर्द्धजपात्तत्साध्यो द्विगुणोऽधिकात्॥ सुसिद्धसुसिद्धो ग्रहणात्सुसिद्धारिः स्वगोत्रहा॥ १०॥ अरिसिद्धः सुतान्हन्यादरिसाध्यस्तु कन्यकाः॥ अरिसुसिद्धस्तु पत्नीं घ्नस्त्वरिर्हन्ति साधकम्॥ ११॥ इत्यकथहचक्रम्॥ ७ अथ अकडमचक्रम्॥ रेखाद्वयं पूर्वपरेण कुर्यात् तन्मध्यतो याम्यकुबेरभेदात्॥ महेशरक्षोऽधिपतिक्रमेण निर्ऋतकोणावायुकृताऽग्नानेन॥ १॥ अकारादिक्षकारांतान् क्लीबहीनाल्लिखेत्ततः॥ एकैकक्रमतो लेख्या मेषादिषु वृषांकात्॥ २॥ गणयेत्क्रमशो मंत्रनामादिवर्णकादिमान् मीनांतं गणयेत्क्रमशः सुधीः॥ ३॥ सिद्धसाध्यसुसिद्धारयः पुनः॥ नवैकपंचमे सिद्धः साध्यः षट्के॥ ४॥ सुसिद्धः त्रिसप्तरुद्रे वेदाऽष्टद्वादशे रिपुः॥ तंत्रेष्वकडमादिकमुत्तमम्॥ ५॥ इदं तु गोपालमंव॥ अथ ऋणधनिचक्रम्॥ ० ॥ ॐ ॥ ०॥

अक १ थह	उङप २	आखद ३	ऋवफ ४
ओड्व ५	लृञम ६	औठ घ ७	लृयम ८ न
ईघन ९	ऋझम १०	इगध स ११	अष्ठ व १२
अंतस १३	ऐचल १४	अःणष १५	एटर १६

॥ मेषा
सिद्धा
उदृश्या
एनते
नविष
॥०॥

ऋखआ इ ढय गल २ ३	अकडम १	औभव १२ ओं बट ११
ई घत ल ४	अकड मचक्रम्	औभफ क्ष १०
उङध ऊप णथ ऋदृ ६	एछ धुज	ऐओ लेजरूप नसट ९

दितः
रीतिस्तु
सुग्रस
कपि
यकम्
॥०॥ ॥

न्यूनम ५

कोष्ठान्येकादशान्येकादशान्येव वेदैना पूरितानि वा ॥ अकारादि हकारान्तं लिखेत्कोष्ठेषु तत्त्ववित् ॥ १ ॥ प्रथमं पंक्तकोष्ठेषु स्वरान् दीर्घक्रमेण च ॥ द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः ॥ १ ॥ शेषेत्वेकैकशो वर्णान्न क्रमतस्तु लिखेत्सुधीः ॥ षट्कालकालवियदग्निसमुद्रवेदखाकाशशून्यदहनाः खलु साध्यवर्णाः ॥ सुप्तर्षिपंचवियदम्बरयुग्मशशांकव्योमाब्धिवेदशशिनः खलु साधकार्णाः ॥ १ ॥ नामाजंल्लादकगवा फजभक्ते = क्षयः शेषं ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात् ॥ अस्यार्थः ॥ साध्यवर्णाः स्वरव्यंजनभेदेन पृथक्स्का कालाद्यंकैर्गणितान् ॥ साधकनामाक्षराणि चैरंकैर्गणयित्वा अष्टसंख्यामियोज्य साध्यसाधकयोरधिकमृणं शेषं ज्ञात्वा मंत्रं दद्यात् ॥ यदा मंत्री ऋणी भव शुभदायकः ॥ धनि मंत्री अशुभदा ।

नषट्	६	३	३	०	३	४	४	०	०	०	३
रान्पु	अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
खाऽभ	क	ख	ग	घ	ङ	च	छ	ज	झ	[illegible]	ट
धनंशा	ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
तितरा	ब	भ	म	य	र	ल	व	श	ष	स	ह
एकः॥	२	१	५	०	०	२	१	०	४	४	१

= उदाहरणं यथा॰ रामस्य सीतायाश्च यथा॰ रामः साधकः ॥ तन्नामाक्षरांकाः र० आ२ म५ अ४ ऐकौ २ । सीता साध्या तन्नामाक्षरांकाः ॥ समेऽपि वा जपेन्मंत्रं न जपेदृणाधिके । ऋणे मृत्युं विजानीयात्तस्मा
क्षेभागशेषो ॥ २ ॥ ३ ॥ अत्र सीतारामस्य ऋणं ॥ एवं सर्वत्रान्येनापि ऋणधनशोधनम् [redacted] शून्यं परित्यजेत् = १

र०ई त३ आ६ ऐ४ के० ०७ उभयोः ऋणं धनशो॰ धनं १॰

तंत्रसारे· नारायुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च· राशिशुद्धिश्च त्रैपुरेश्च गोपाले ऽकडमः स्मृतः ।१। अमने ऽकडमश्चैव न्लोपो ऽकडम तथा· कोष्ठवर्ज वराहस्य मह
लक्ष्म्याः कुला ऽकुलम् ।।२।। कुलाकुलमकथहं तवैर्णानां विचारयेत् ।। त्रैपुरे कालिकायाश्च तारा चक्रं विचारयेत् ।।३।। तथा· वै सर्वशास्त्रेषु रुद्र शैवं चाकडमं स्मृतम् । बौद्धिकं च भवेत्कोष्ठ मेकालेकडमं तथा ।४।

ऋ.
४

१४ २१ ३ ११ १५ ६ ४ ३ ५ ८ ८ १० ३
अथर्णप्रकारः ।। इंदूरसाश्वैर विपंचदशा स्तुवेदैव स्तोपुधाऽष्टनवभिर्गुणितांश्च साध्यान् । दिग्भूमिरिभ
तिग्जाऽग्निमुनिषुवेदषड्वेभिर्भिः संगुणितान् च साधकार्णान् ।।१।। नामाक्षरादिस्वरादिविभुवि
धयम् ।। तथा· नामार्णकोष्ठांकतथाभिहत्यादेकादिकं द्वांकगतं क्रमेण ।। तथा· नामाक्षरमार
भ्य यावन्मंत्रादिमं भवेत् । द्विधाकृत्वा स्वरैर्भिन्द्यात्तत्स्याद्विपरीतकम् । अस्यार्थः· साधकनामाक्ष
रतोगणनया· यावन्मंत्रादिमाक्षरं तत्संख्यां द्विधा कृत्वा सप्तभिर्हित्वा ऽधिकं ऋणं शेषं धनम् ।।

साध्यांकाः

ऋण	६	३	३	०	३	४	४	०	०	०	३
ताव	अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
नाम	क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
त्रिं	ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
साध	ब	भ	म	य	र	ल	व	श	ष	स	ह
धन	१	२	५	०	०	२	२	०	४	४	२

साधकांकाः

दिति· मंत्राक्षरमारभ्य· यावत्साधकाक्षरं भवेत् ।
तत्संख्यां सप्तगुणं कृत्वा अष्टभिर्हरेत् । तथा साध्य
प्रकारांतरेण । साध्यनाम द्विगुणितं साधकेन सम
अष्टभिर्भजेत् हरेत् क्रमेण तत्स्याद्विपरीतकम् । अस्यार्थः
कनामवर्णाः स्वरव्यंजनभेदेन द्विगुणीकृत्य स
मयुतं कृत्वा ऽष्टभिर्हरेत् ।। यस्यांकाधिकं स ऋणी

राम·
४

=उक्तं हि सार दायाम् ॥ मातृकावर्णभेदेभ्यः सर्वे मंत्राः प्रजातिरे । मंत्रविद्याविभागेन द्विविधा मंत्रजातयः ॥ मंत्राः पुंदेवता ज्ञेया विद्याः स्त्रीदेवताः स्मृताः ॥ पुंस्त्री
नपुंसकान्मू नो मंत्राः सर्वे समीरिताः ॥ पुंमंत्राः हुंफडंताः स्युः स्त्रियो मंत्रा द्विठांतकाः ॥ नपुंसका नमोन्ताः स्युरित्युक्ता मनवस्त्रिधा ॥ श्र क्ताक्ते त्रिविधा
पंचावयवस्य त्रयि वारिके हि तत्=२

x नि ३

भवति । साध्यवर्णाः स्वरव्यंजनभेदेन द्विगुणीकृत्य साधकनामाक्षराः स्वरव्यंजनभेदेन योज्य अष्टभि
र्हरेत् शेषं साध्यसाधकयोर्मध्ये यस्याऽधिकशेषं स ऋणी ॥ न्यूनशेषांको धनी स्मृतः ॥ इति ऋण
धनिविचारः ॥ अथ दीक्षाकालः ॥ मंत्रारंभस्तु चैत्रे स्यात्समस्तपुरुषार्थदः ॥ वैशाखे रत्नलाभः स्या
ज्ज्येष्ठे तु मरणं भवेत् ॥१॥ आषाढे बन्धुनाशः स्यात्पूर्णायुः श्रावणे भवेत् ॥ प्रजानाशो भवे
द्भाद्रे आश्विने रत्नसंचयः ॥२॥ कार्तिके मंत्रसिद्धिः स्यान्मार्गशीर्षे तथा भवेत् । पौषे तु शत्रुपीडा
स्यान्माघे मेधाविवर्द्धनम् ॥३॥ फाल्गुने सर्वकामाः स्युर्मलमासं विवर्जयेत् । चैत्रे तु गोपालमं
त्रेष्वग्रहणीयः । गौतमसुरुक्त्वात् । मधुमासे भवेद्दीक्षा दुःखदा इति वचनात् ॥ अथ वारनियमः । रवि
वारे भवेद्वित्तं सोमे शांतिर्भवेत्किल । आयुरंगारके हंति तत्र दीक्षां विवर्जयेत् ॥ बुधे
सौन्दर्यमाप्नोति ज्ञानं स्याद्बृहस्पतौ ॥ शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे ॥
२॥ अथ तिथिनियमः । ७ ॥ प्रतिपत्सु द्वितीयायां तृतीयां शुचिर्भवेत् । चतुर्थ्यां वित्तनाशः स्या

पंचम्यां बुद्धिवर्द्धनम्॥१॥ षष्ठ्यां ज्ञानक्षयः सौख्यं लभते सप्तमी दिने॥ अष्टम्यां बुद्धिनाशः स्यान्नवम्यां व
पुषः क्षयः॥२॥ दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत्॥ द्वादश्यां सर्वसिद्धिः स्यात्त्रयोदश्यां दरिद्र
ता॥३॥ तिर्यग्योनिश्चतुर्दश्यां हानिर्मासावसानिके॥ पक्षान्ते धर्मवृद्धिः स्यादस्वाध्यायं विवर्जयेत्॥४
द्वितीया च तृतीया च पंचमी दशमी तथा॥ एकादशी द्वादशी च दीक्षायां ग्रहणे शुभाः॥५॥ ० ॥अ
थ नक्षत्रनियमः॥ अश्विनी रोहिणी सौम्यं मघादि पित्र्यो गुरुः॥ मैत्रादि पंचकं पौष्णं बाहुलं च पुनर्वसुः
१ उत्तरा भास्करश्चैव शुभानीति वदंति ए॥ अथ करणानि॥ ववकौलव तैतिलश्च वणिज स्तदनंत
रम्॥ करणा १ निशुभान्येव सर्वतंत्रोदितानि च॥२॥ अथ योगाः॥ विष्कंभ सारे शुभः सिद्धिस्तु आयु
ष्मान्ध्रुवयोगस्ततः परम्॥ प्रीतिः सौभाग्य योगश्च वृद्धियोगस्ततः परम्॥ हर्षणश्च तथा सिद्धिः
मप
शुभशुक्लादिकाः शुभाः॥२॥ अथ लग्ननियमः॥ वृषे सिंहे च कन्यायां धनुर्मीनाः स्वलग्नके॥ वर
नाराचानुकूले च कुर्याद्दीक्षाञ्च वर्जनम्॥ शुक्लपक्षे शुभा दीक्षा कृष्णे पंचमादिनात्॥१॥ विभिन्नमासे

स्थिरलग्नं विष्णुमंत्रे शिवमंत्रे चरं शुभम् द्विस्वभावगतं लग्नं शक्तिमंत्रे शुभं भवेत् १

अगदीक्षाप्रकर्त्तव्या न मासं च परीक्षयेत्· न वारं न च नक्षत्रं न च तिथ्यादि दूषणम्·
न योगकरणं नैव संक्रोणेति भाषितम्·४

गु१

नुनद्वितीये सुगमन्वादिभेदतः॥ षष्ठी भाद्रपदे ईँ षे तथा कृस्ना चर्द्दशी॥ कार्त्तिके नवमी शुक्ला मार्गे शुक्ला तृतीयका॥१॥ पौषे च नवमी शुक्ला माघे शुक्ला चतुर्थिका॥ फाल्गुने नवमी शुक्ल· चैत्रे कामचतुर्दशी॥२॥ वैशाखे वाक्षया चैव ज्येष्ठे दशहरा तिथिः॥ आषाढे पंचमी शुक्ला श्रावणे कृस्नपंचमी॥३॥ एतानि दैव पर्वाणि तीर्थकोटिफलं लभेत्॥ अन्यत्र· चैत्रत्रयोदशी शुक्ला वैशाखैकादशी सिता॥५॥ ज्येष्ठे चतुर्दशी कृस्ना आषाढे नागपंचमी॥ श्रावणैकादशी भाद्रे रोहिणीसंयुताऽष्टमी॥६॥ आश्विने च महापुण्या शुक्लाऽष्टम्यप्यभीष्टदा॥ कार्त्तिके नवमी शुक्ला मार्गशीर्षे तथा सिता॥७॥ षष्ठ चतुर्दशी पौषे माघे चैकादशी सिता॥ फाल्गुने चासिता षष्ठी चैत्रे कालस्य निर्णयः॥८॥ योगिनीतंत्रे अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः। रविसंक्रान्तिदिवसे युगाद्यासु सुरेश्वरि॥९॥ मन्वंतरासु सर्वासु महापूजादिने तथा। सूर्यग्रहणकालस्य समानो नास्ति भूतले॥८॥ न वार तिथि मासादि शोधनं सर्वपर्वणि॥ अमावास्या सोमवारे भौमवारे चतुर्दशी॥[illegible]॥ सप्तमी रविवारे च सूर्यपर्वसमा स्मृता॥ ग्रहणे च

त्रयोदशी·फा

चतुर्थी पंचमी चैव चतुर्दश्यष्टमी तथा· तिथयः शुभदा प्रोक्ता
इत्युक्तत्वात्· चतुर्थीति गणेशविषयम्·

सिता·

विष्णुयामले· देव्या बोधं समारभ्य यावत्स्यान्नवमी सिता·
कृता तासु बुधैर्दीक्षा सर्वाभीष्टफलप्रदा·१

दी.
६

महातीर्थे नास्ति कालस्य निर्णयः ॥१२॥ गयायां भास्करे क्षेत्रे विरजे चन्द्रपर्वणि । पर्वते च मतंगे च तथा
कन्याऽऽश्रमेपि च ॥१४॥ न गृह्णीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्वति ॥ शिष्यानाहूय गुरुणा कृपयादी
यते यदि ॥ सर्वदोषनिवृत्तिः स्याद्वर्षमासादिदूषिते ॥१५॥ ० ॥ इति पुण्यतिथ्यादिविचारः ॥ ० ॥
अथ करमालानिर्णयः ॥ तर्जनी मध्यमाऽनामा कनिष्ठा चेति ताः क्रमात् ॥ तिस्रोंगुल्यस्त्रिपर्वा
णो मध्यमा चैकपर्विका ॥१॥ पर्वद्वयं मध्यमाया एकत्वेनोपकल्पयेत् ॥ अनामामध्यमाबद्ध
कनिष्ठादित एव वा ।१। तर्जनीमूलपर्यंतं दशपर्वसु संजपेत् ॥ तंत्रसारे ॥ हृदये हस्तमारोप्य ति
र्यक्कृत्वा करांगुलीः ॥ आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥ अन्यत्रापि ॥ अंगुल्य
ग्रेषु यज्जप्तं यज्जप्तं मेरुलंघने ॥ पर्वसंधिषु यज्जप्तं तत्सर्वं निःफलं भवेत् ॥ अनामामूलमार
भ्य कनिष्ठादित एव वा । तर्जनीमध्यपर्यंतं अष्टपर्वसु संजपेत् ॥ वर्णमालागनारदः ॥ अकारादी
नां स्वराणां ककारादीनां वर्णानां चांतिमवर्णं सानुस्वारं पूर्वमुच्चार्य नाम्नजपः कार्यः ॥ अंते
नकारेणाष्टोत्तरशतसंख्याकजपो भवति ॥ अंतर्जपनेत्युपलक्षणम् ॥ सविंदुवर्णमुच्चार्य

राम
६

पश्चान्मंत्रंजपेद्बुधः॥अकारादिक्षकारांतंबिन्दुयुक्तंविभाव्यच॥वर्णमालासमाख्याताअनुलो
मविलोमिका॥ ० ॥अथमालापद्मवीजादिभिर्मालाबाह्यैर्निगद्यताः॥रुद्राक्षशंखपद्मा
क्षपुत्रजीवकमौक्तिकैः॥मणिरत्नैश्चसौवर्णैःस्फाटिकैर्विद्रुमैस्तथा॥राजतैःकुशमूलैर्वा
गृहस्थस्याक्षमालिका॥अंगुलीगणनादेकंपर्वणाऽष्टगुणंस्मृतम्॥पुत्रजीवैर्दशगुणंशतंपा
वैःसहस्रकम्॥प्रवालैर्मणिरत्नैश्चदशसाहस्रकंस्मृतम्॥तदेवस्फाटिकैःप्रोक्तंमौक्तिकैर्ल
क्षमुच्यते॥पद्माक्षैर्दशलक्षंस्यात्सौवर्णैःकोटिरुच्यते॥कुशग्रंथ्याकोटिशारुद्राक्षैःस्याद
नंतकम्॥सर्वैर्विरचितामालानराणांमुक्तिफलप्रदा॥कामनाभेदेतु॰पद्माक्षैर्विहितामालाश
त्रूणांनाशिनीमता॥कुशग्रंथिमयीमालासर्वपापप्रणाशिनी॥पुत्रजीवफलैर्मालाकुरुतेपुत्र
सम्पदम्॥निर्मितारूप्यमालाभिर्जपेनाभीप्सितप्रदा॥प्रवालैर्विहितामालाप्रयछेसुष्कलंधनम्॥
भैरवीविद्यायाम्॥वाराहीतंत्रे॥सुवर्णमणिभिर्मालांस्फाटिकंशंखनिर्मिताम्॥प्रवालैर्वापिनकुर्या

रु.

सुक्वीवं विवर्जयेत् ॥ पञ्चास्यं चैव रुद्राक्षं न्यास्यं वा विशेषतः ॥ त्रिपुरामंत्रजपादौ रुद्राक्षं नवीनं निर्मितं भोग
मोक्षप्रदा भवति ॥ तथा वै सर्वेद्रुन्नसीमाला गजदंतैर्गलेश्वरे ॥ त्रिपुरायाजपेण स्फाटिकाक्षै रुद्राक्षकैः ॥
स्फाटिकीभास्करेण स्फाटिकाक्षैः सर्वदैव हि ॥ अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ॥ कीटाभिदंश
दुष्टानि जीर्णानि न वा न । निवे । अथ रुद्राक्षमाहात्म्यम् ॥ एकवक्त्रः शिवः साक्षाद् ब्रह्महत्यां व्यपोहति ॥ अ
वध्यत्वं प्रतिभोऽनेन हि हिंसनं करोति च ॥ द्विवक्त्रो हरगौरी स्यात् गोवधापापनाशकृत् ॥ त्रिवक्त्रोऽग्निस्त्रिजन्मो
त्थपापानि प्रणाशयेत् ॥ चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति ॥ पंचवक्त्रस्तु कालाग्निरभक्ष्याभ
क्ष्यपापनुत् ॥ षड्वक्त्रस्तु गुहः साक्षाद्गर्भहत्यां शमयेत् ॥ सप्तवक्त्रस्त्वनंतः स्यात्स्वर्णस्तेयापहृत्सदा ॥
विनायकोऽष्टवक्त्रः स्यात्सर्वानृतविनाशकृत् ॥ भैरवो नववक्त्रः स्याच्छिवसायुज्यकारकः ॥ दशव
=स्मृतो विष्णुः क्त्रस्त्वनंतः स्याद्भूतप्रेतपिशाचहा ॥ एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥ द्वादशास्यो भवेदर्कः सर्व
क्रतुफलप्रदः ॥ त्रयोदशमुखः कामः सर्वकामफलप्रदः ॥ चतुर्दशास्यः श्रीकंठो वंशोद्धारकरः परः ॥
निम्बडुम्बसुपर्णाश्वत्थधात्र्याधारणे स्मृताः ॥ पंचामृतं पंचगव्यं स्नानकाले प्रयोजयेत् ॥ रुद्राक्ष

क४

=अगम्यागम्यपाः

राम

स्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा॥त्रियंबकादिमंत्रंस्तुयथातत्रप्रयोजयेत्॥ॐत्र्यंबकंयजामहेसुगंधिंपु
ष्टिवर्द्धनम्।उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥तथाः॥ॐह्रींअघोरेह्रौंघोरतरेभ्यनुःहुं ह्रींसर्वे
तःसम्बोर्वेनमस्तेरुद्ररूपिणेहूं।अनेनापिचमंत्रेणरुद्राक्षस्यद्विजोत्तमाः॥प्रतिष्ठांतेविधिवत्कुर्यात्
ततोऽधिकफलंलभेत्॥स्वस्यैवमूलमंत्रेणधारयेद्भक्तिसंयुतः॥तत्क्रमेणमंत्राः।ॐह्रींनमः।१।ॐन
मः२।ॐक्लूंनमः।३ॐह्रींनमः।४।ॐहुंनमः५।ॐहूंनमः।६ॐसःहूंनमः।७ॐहूंनमः८ॐह्रींनमः।९ॐ
ह्रींनमः।१०।ॐह्रींह्रींनमः।११।ॐक्षांक्षौंनमः।१२ॐह्रींनमः१३ॐनमोनमः१४॥रुद्राक्षेदेहसंस्थेतुकु
क्कुरोम्रियतेयदि॥सोपिरुद्रपदंयातिकिम्पुनर्मानवोभुवि॥सप्तविंशतिरुद्राक्षमालयादेहसंस्थ
या॥यत्करोतिवैपुण्यंसर्वकोटिगुणंभवेत्॥योददातिद्विजातिभ्योरुद्राक्षंभुविपावनम्॥तस्य
प्रीतोभवेद्रुद्रःस्वपदंचप्रयच्छति॥विनामंत्रेणयोधत्तेरुद्राक्षंभुविमानवः॥सयातिनरकान्घोरान्
यावदिंद्राश्चतुर्दश॥७॥अथनैमित्तिकादिकर्मभंगेप्रायश्चित्तम्॥यत्कर्मणिवैगुण्यंनित्येनैमित्ति
केतथा॥सहस्रंप्रजपेन्मंत्रंमूलंवासुतमवबा॥नित्यंसहस्रंप्रजपेन्नैमित्तिकेचायुतंमितिविस्तुविष

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्वंमे सिद्धिदा भव॥=५

यम्॥ नित्यातिक्रमदोषाणां शांत्यै विद्याशतं जपेत्॥ नैमित्तिकातिक्रमणे सहस्रं प्रजपेन्मनुम्॥ अथास
नम्॥ काम्यार्थं कुंबलं चैव श्वेतं रक्तं कम्बलम्॥ कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मके॥ कु
शासने मंत्रसिद्धिर्नात्र कार्या विचारणा॥ धरण्यां दुःखसंभूतिर्दौर्भाग्यं दारुकासने॥ वंशासने दरिद्र
स्यात्पाषाणे व्याधिपीडनम्॥ मालाविधाने॥ मुखे मुखं तु संयोज्य पुच्छे पुच्छं नियोजयेत्॥ इति
आदिमालासंस्कारे॥ अश्वत्थपत्रनवकैः पद्माकारं तु कारयेत्॥ तन्मध्ये स्थापयेन्मालां मातृ
कामूलमुच्चरन्॥ क्षालयेत्पंचगव्येन सद्योजातेन सज्जलैः॥ सद्योजातमंत्रः॥ ॐ सद्योजातं प्रपद्या
मि सद्योजाताय वै नमः॥ भवे भवे नादिभवे भजस्व मां भवोद्भव॥ चन्दनागुरुगंधाद्यैर्वामदेवेन घर्ष
येत्॥ वामदेवमंत्रः॥ ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय कलविकलाय बलवि
करणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ धूपयेत्तमघोरेण॥ मं
त्रः॥ ॐ अघोरेभ्योऽघोरेभ्योऽघोरघोरतरेभ्यः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शि
वोऽस्तु मे सदाशिवोम्॥ एभिः पंचभिर्मालां मंत्रयेत्॥ त्वं माले सर्वदेवानां सर्वसिद्धिप्रदा मता॥ ते

=कृलयेदिति०पा०१

नसत्येनमेसिद्धिर्हिमातर्नमोऽस्तुते॥ इतिपठेत्॥ अथदीक्षाग्रहणविधिः॥ ० ॥ ० ॥ तत्रशुद्धसमयेतिथिढेत्रकालेपूर्वदिनेहविष्यभोजनंकृत्वा गुरुसमीपमुपगम्यप्रह्वीभूय॥ ॐ गुरुर्ब्रह्मागुरुर्विष्णुर्गुरुर्देवोमहेश्वरः॥ गुरुरेकंपरंब्रह्मतस्मैश्रीगुरवेनमः॥ अखंडमंडलाकारंव्याप्तंयेनचराचरम्। तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः॥ अज्ञानतिमिरांधस्यज्ञानांजनशलाकया॥ चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥ इतिपठित्वागुरुंप्रणमेत्॥ अमुकशर्माहंगुरुंभोअभिवादयामि॥ इतिदण्डवद्भूमौपतित्वाप्रणमेत्॥ ततःपुण्यस्थानेतुषकेशरादिरत्न्यांभूमौगोमयोदकेनोपलिप्यशुद्धासनेपूर्वाभिमुखंगुरुमुपवेशयित्वासुमुहूर्तेसर्वतोभद्रेनवकुंभंनिधायसोदकंगंधपुष्पाक्षतमर्चितंवस्त्रवेष्टितंसर्वौषधीनवरत्नपंचपल्लवसंयुतं॥ तत्रकुंभोपरिइष्टदेवतासायुधासवाहनांसपरिवारांपूजयित्वाधूपदीपादिनैवेद्यप्रदक्षिणापर्यंतंआवाहनाद्युपचारैःपूजयेत्॥ स्नयोर्गुर्विष्टदेवतयोःपूजनेअग्रेगुरुंपूज्य॥ ततःकुंभोपरिइष्टदेवंयथाविधिनासम्पूज्य। ततःपश्च

साम्राऽश्वत्थवटवकुलानि पंचपल्लवानि। ततः कुंभादीशानभागेऽग्निकुंडं निर्माय विहृय यथाविधिनाप्र
ज्वाल्याग्निगायत्रीं जपेत्॥ ॐ वैश्वानराय विद्महे हिरण्यगर्भाय धीमहि। तन्नो वह्निः प्रचोदयात्॥ इतिजप
त्वा· ततो वद्धांजलिः सन्॥ ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्॥ सुवर्णवर्णममलं समिद्धं सर्व
तोमुखम्॥ इत्युपस्थानं कृत्वा· इष्टदेवताप्रीतये अष्टोत्तरशतसंख्यं होमं कुर्यात्॥ सायुधवाहन
परिवारलोकपालग्रहाधीश्वरसहिताय॥ नवरत्नमाह। मुक्तामाणिक्यवैदूर्यगोमेदान्वज्रविद्रुमौ·
पद्मरागं मरकतं नीलं चेति यथाक्रमात्॥ पल्लवम्। पनसाम्रं तथाऽश्वत्थं वटं वकुलमेव च॥ पंचपल्ल
वमित्युक्तं मुनिभिस्तंत्रवेदिभिः॥ ततः शिष्यं स्वलंकृतं विधानतथाग्निमपः संस्पर्शयेत्॥ मंत्रितैः प्रोक्षणी
तोयैः शांतिकुंभजलैस्तथा॥ ततः शांतिकुम्भः। गंगे यमुने इत्यादिना तीर्थजलं क्षिपेत्॥ याः फलिनी
तिफलम्॥ गंधद्वारामिति गंधम्॥ एकीकृत्य पूर्वोक्तकुंभजलेन। अथवा शंखे शांतिशंखं कृत्वा०
तज्जलेन गुरुणा शिष्यमुपयुक्तमूलमंत्रेण अष्टोत्तरशतं अष्टवारं वा· अभिषिंचेत्॥ ० ॥अ
थसम्पादयेन्मंत्रं हस्तं शिरसि धारयेत्। समुल्लिप्याक्षतानन्द्या ततः शिष्योऽर्चयेद्गुरुम्॥ दीक्षांत

=५ उक्तं च गुरवे दक्षिणां दद्यात्समग्रां प्रीतमानसः॥ ब्राह्मणांस्तर्पयेत्स्वस्था द्रोज्यभक्ष्यैः सदक्षिणैः॥ अयं च सारे। दत्वा पुनस्तनुस्थनेपर। मात्मनेस्वं
व्यार्हमेव गुरवे वनुरं शकौ दत्वादशांशमथवापि वित्तशाट्यं हित्वार्पयेल्लिजनतुतदधीनचेताः॥ उक्तं च तंत्रराजे। आचार्याय दक्षिणाः प्रदत्त
दक्षिणाः सततं तं प्रमानोपि मंत्रसिद्धिं न गच्छति॥ =५

*वा:२

रमासा सतं शंखमभ्यर्च्यमनुना मिषिच्याष्टवारं मूलेन· शिरसि करौ निधायाष्टौ जपेत्॥ तथाव
श्रावयेद्दक्षकर्णे च पुंसान्दीक्षामुदङ्मुखः॥ स्त्रीणां तु वाम कर्णे च इति मंत्रविदो विदुः॥ ततः शि
ष्येन गुरुस्मरणम्न्य। कुशतिलजलान्यादाय देशकालौ स्मृत्वा· अद्य स्वर्गापवर्गभोगसम्पत्तिफ
लदेष्टदेवतादीक्षाग्रहणकर्मपरिपूर्णताकामः यथोपपन्नां दक्षिणां गुरवे तुभ्यमहं सम्प्रददे॥
इति दक्षिणां दत्वा· क्षमस्वेति पूजितदेवं विसर्जयेत्॥ गोहिरण्यवासोभिर्यथाविभवमर्चयेत्॥
गुरुं तन्नियताहारस्तद्दिने एकभक्तं कुर्यात्॥ दक्षकर्णे स्त्रियो विघामे कोज्ञारेणैवोच्यते॥ विधि
रेष द्विजातीनां स्त्रीशूद्राणां च वामतः॥ इति वचनात्॥ मंत्रं दत्वा गुरुः शिष्यो गृहीत्वा· उपवासं
यदाऽऽचरेत्तदा तयोर्महान्दोषः॥ मंत्रं दत्वा गुरुश्चैवमुपवासं यदाचरेत्। महान्धकारे नरके कमि
भवति नान्यथा॥ इति दीक्षाविधिः॥ ततः प्रातः स्नात्वा देवर्षिसंतर्प्य· सूर्यमंडलमध्यस्थांगा

=मंत्रं दत्वा गृहीत्वा वा नोपवासं चरेद्बुधः॥ उभावपि ततो मृत्वा ब्रजेतां नरके ऽशुचौ। प्रातः कृत्यमकृत्वानुयोदेवं भक्तितोऽ
र्चयेत्तानि: फलानस्य पूजा स्यात्कोव हस्ति क्रियायथा =२॥

ॐकारोच्चारणं होमाच्चानलयाभ्रशिलार्धनाद· ग्रालली म
मनाचैवशद्भ्यांश्रालतां ब्रजेत्=अष्टात्सरोनैतामंत्रं सप्त
र्णसुश्रीकदुर्वोः प्रणवादिभ्यो मंत्रानं ब्रीसत्द्वेषशास्य
मेव नृमृत्यग्रहे नीर्थेसिद्धक्षेवे शिवालये· मंत्रमात्रस्य के
पनमुपदेशः स्मृ
तो॥२॥

यंत्रीजपेत्॥ ० ॥ ६ ॥अथवक्ष्ये गणपतेर्मंत्रान्सर्वार्थसिद्धिदान्॥ यज्ज्ञात्वा मानवैर्नित्यं साधयंति
मनोरथान्॥१॥ पादांबुजध्यानरसेन यस्य विघ्नांधकारो विलयं प्रयाति। सिंदूरकांतं गजराजवक्त्रं
तं नन्नौमि लंबोदरमांविकेयम्॥ मंत्रः। पंचांतकं शशधरबीजं गणपतेर्विंदुः॥ गं॥ १ अस्य पूजा प्रा
नःकृत्वा दिपीठन्यासांतं विधाय। ततो हृत्पद्मकेशरेषु ॐ तीव्रायै नमः। ज्वालिन्यै नन्दायै। कामरूपि
ण्यै। उग्रायै। तेजोवत्यै। सत्यायै। विघ्ननाशिन्यै नमः इति। तदुपरि ॐ सर्वशक्तिकमलासनाय नमः॥
ततः। ऋष्यादिन्यासः। शिरसि गणकऋषये नमः। मुखे निचृच्छंदसे नमः। हृदि गणेशाय नमः। ततः क
रांगन्यासौ। गां अंगुष्ठाभ्यां नमः॥ गीं तर्जनीभ्यां स्वाहा। गूं मध्यमाभ्यां वषट्। गैं अनामिकाभ्यां हुं। गौं
कनिष्ठाभ्यां वषट्। गः करतलकरपृष्ठाभ्यां फट्। ० गां हृदयाय नमः॥ षड्दीर्घभाजा बीजेन कुर्यादंगा
नि षट्क्रमात्॥ ध्यानम्॥ सिंदूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरवि
लसद्बीजपूराभिरामम्॥ बालेंदुद्योतमौलिं करिपतिवदनं दानपूराद्रगंडं भोगींद्राबद्धमौलिंभज
२ = हृदयादिषु विन्यसेदंगमंत्रांस्ततः सुधीः। हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा॥ शिखायै वषडित्युक्तं कवचाय हुमीरितम्। नेत्रत्रयाय वौ
षडित्यादस्त्राय फडिति क्रमात्॥ षडंगमंत्रानित्यं क्रमात्षडंगेषु नियोजयेत्॥ अंगहीनस्य मंत्रस्य स्विन्नैवांगानि कल्पयेत्॥ ततः केष्योरु विधि
नान्यासानन्यान्समाचरेत्। इति मंत्रऽऽराधनदीपिकायां उक्तत्वात्॥ = २३ =

३ = गणेशाय नमस्तुभ्यं गजवक्त्राय ते नमः॥
दी. भक्तप्रियाय शांताय नमो वरदमूर्त्तये = २

= ॐ श्रीं ह्रीं क्लीं ग्लौं गं हृदयाय नमः
इत्यादि = ३

जगणपतिंरक्तवस्त्रांगरागम्॥ एवंध्यात्वामानसैःसम्पूज्य·शंखस्थापनंकुर्यात्॥ ततःपीठपूजांवि
धायकेशरेषुमध्येचतीव्रादिपीठमन्त्रांतंपूजयेत्॥ पुनर्ध्यात्वाऽऽवाहनादिपंचपुष्पांजलिदान
पर्यंतंविधायावरणपूजांकुर्यात्॥ कर्णिकायांपूर्वादिदिक्षुॐगणाधिपतयेनमः॥ गणेशाय·
गणनायकाय·गणक्रीडाय·ततःकेशरेषु॥ अग्निनिरृति।वायु।ईशान·मध्येदिक्षुच।गां
हृदयायनमइत्यादिनापूजयेत्॥ पत्रमध्ये।पूर्वादि।वक्रतुण्डमेकदंतंमहोदरंगजाननो॥ लं
बोदरंविकटंविघ्नराजमनंतरम्॥ धूम्रवर्णंपूजयेत्॥ ॐवक्रतुंडायनमइत्यादिनापूजयेत्॥
दलाग्रेषुब्राह्म्यादिमातरः॥ पूर्वादिक्रमेणपूज्याः॥ तद्बहिरिंद्रादीन्॥ वज्रादीन्पूजयेत्·धूपा
दिविसर्जनांतंकर्मसमापयेत्॰ अस्यपुरश्चरणंचतुर्लक्षजपः॥ तथाचतुर्वेदलक्षंजपेन्मंत्रंदशांशं
जुहुयात्ततः॥ मोदकैःपृथुकैर्लाजैःसक्तुभिरिक्षुपर्वभिः॥ नारिकेलैस्तिलैःशुद्धैःसुपक्वैःकदलीफ
लैः॥ अष्टद्रव्याणिविघ्नस्यकथितानिमनीषिभिः॥ अन्योगणेशमंत्रः॥ ॐश्रींह्रींक्लींग्लौंगंगण

४ अष्टाविंशत्यः क्षरोऽयन्त्राद्योमन्त्ररीरितः स्मृतिस्थमांसमोबिन्दुयुक्तं ॐजमीलितम्॥अगस्त्यः

श्री. ११

पतयेवा(व)रदसर्वजनंमेवशमानयस्वाहा।श्लोकः श्रीशक्तिस्मरभूविघ्न वीजानिप्रथमंवदेत्।ङेंगा
णपतिंपश्चाद्वरांतेवरदंपदम्॥उक्त्वाथसर्वजनंमेवशमानयठद्वयम्॥इतिपूर्वोक्तपीठेमन्त्रंवि
न्यस्य।शिरसिगणकऋषयेनमः।मुखेवृहद्गायत्रीछन्दसेनमः॥हृदिमहागणपतयेदेवतायैनमः॥
करांगन्यासस्तु।ॐश्रींह्रींक्लींग्लौंगांअंगुष्ठाभ्यांनमः।एवंगींतर्जनीभ्यांनमः॥गूंमध्यमाभ्यां
इत्यादिपूर्ववत्।ध्यानम्।हस्तीन्द्राननमिन्दुचूडमरुणच्छायंत्रिनेत्रंरमाश्लिष्टंतुप्रिययासपद्म
करयास्वांकस्थयासंततम्।वीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलंव्रीह्यग्रस्ववि
षाणरत्नकलशान्हस्तैर्वहंतंभजे।इत्यादिपूर्वोक्तक्रमोविधातव्यः।यंत्रंत्रिकोणंषडि:षट्कोणं



ग्लौं गं गणपतये नमः

व॥~~अथसूर्यमंत्राः~~॥स्तोत्रम्॥नमःप्रभाकरायतेनमोदिवाकरायते।नमो
हरिस्वरूपिणेनमःशिवस्वरूपिणे॥१॥नमोविधिस्वरूपिणेनमःसूर्यस्व
रूपिणे।नमःप्रभंजनायतेनमोजलस्वरूपिणे॥२॥नमःक्षितिस्वरूपिणेन

गन ११

स्मृतिर्गकारः मांसंलकारः औ स्वरूपम्·२+

६॥हरितहयनिकरपरिकरगगनाग्रदीपकभास्करनमस्ते॥६॥जयतिरविरुदयसमयेबालातपपटलसन्निभायस्य॥कुसुमांजलिरिवजलधौ तरंतिरथस
रश्मयःसहस्र॥७॥आर्याःसप्तपुरगीताआकाशात्पतिताभुवि॥यस्यकंठेगृहेवापिसनरःसुखमेधते॥८॥आर्याःसप्तनुसप्तत्यांसप्रधायः पठेन्नरः॥न
स्मरेदयंगेहंचलक्ष्मीःस्स्थेनसु
बनि ९॥इति
श्रीसाम्बपुराणे
श्रीरविसप्तार्या
स्तोत्रंसम्पू
र्णम्शुभमस्तु

नमोवकाशरूपिणे॥नमःकृशानुरूपिणेनमोमहत्त्वरूपिणे॥३॥नमःस्तमःस्वरूपिणेनमोरजःस्वरू
पिणे॥नमश्चसत्त्वशालिनेनमोगुणत्रयात्मने॥४॥नमस्त्वकर्मसाक्षिणेनमश्चशर्मदायिने॥नमश्च
मन्त्ररूपिणेनमोऽपवर्गदायिने॥५॥नमोऽगुणापरोविषेनमःप्रपंचरूपिणे॥जगत्प्रकाशनायतेजगत्
प्रसूतयेनमः॥६॥ॐसौरोघृणिर्मनुःपश्चाद्वामकर्णविभूषितः॥वह्न्यासनोपरुच्छेषःसनेत्रोद्विस्स्वपपश्चि
मः॥अष्टा क्षरोमनुःप्रोक्तोभानोरभिमतःपरः॥अस्यपूजाप्रकर्त्तव्याप्रातःकृत्यादिसर्वंप्राणा
यामंविधायपीठन्यासंकुर्यात्॥तत्रविशेषः॥हृदयस्यपूर्वादिदिक्षुमध्येच॥प्रभूतंविमलंसारंस
माराध्यंपरंसुखम्॥विश्वस्यआधारशक्त्यादिः॥अंसूर्यमंडलायद्वादशकलात्मनेनमः॥इत्यंतंविन्य
सेत्॥तथाच॰निबंधे॰प्रभूतंविमलंसारंसमाराध्यमनंतरम्॥परमादिसुखंपीठंसुविश्रांतंप्रकल्प
येत्॰ततःकेशरेषुमध्येच॥वांदीप्तायैनमः॥वींसूक्ष्मायै॥वूंजयायै॰विंभद्रायै॰वैंविभूत्यै॰वोंविम
लायै॰वौंअमोघायैवंविद्युतायै॰वःसर्वतोमुख्यैतदुपरिब्रह्मविष्णुशिवात्मकायसौरायपी

×रूद्रा३

ही·
१२

र्पीवायनमः॥ ततः ऋष्यादिन्यासः। शिरसि भार्गव ऋषयेनमः मुखे गायत्रीछन्दसे· हृदिआदित्या
यदेवयेता। ततः करांगन्यासौ· ॐ सत्यायतेजोज्वालामालिने हुंफट्· अंगुष्ठाभ्यांनमः। एवं
सत्याय· ब्रह्मणे तर्जनीभ्यां स्वाहा· ॐ सत्याय ॐ विष्णवे मध्यमा· फट्। ॐ सं अनामिकायै हुं। ॐ स
त्यायेकनिष्ठायै वौषट्। ॐ सर्वास्यायकरतलपृ· फट्। एवं हृदयादिषु· ततो मूर्त्तिन्यासः
यथा· शिरसि आदित्यायनमः। मुखे रं रविं· हृदये ॐ भानुं। गुह्ये ईं भास्करं· अं सूर्यायनमः
चरणे· निबंधे आदित्यं विन्यसेन्मूर्द्धि रविंचमुखतोन्यसेत्। हृदये भानुनामानं भास्करं गुह्य
देशतः। सूर्यंचरणयोर्न्यस्यैवं ऐं सत्यादिपंचभिः। ततोमंत्रन्यासः मूर्द्धि· ॐ नमः। आस्ये· घृं
नमः। कंठे· णिं नमः। हृदि· सूं नमः। कुक्षयोर्यं नमः· नाभौ आं नमः। लिंगे· दिं नमः। पादयोः त्यं न
मः। ततो ध्यानम्· रक्तोज्वलांबुजाभयवरदानहस्तं केयूरहारांगदकुंडलाढ्यं। माणिक्यमौलिं दिनना
थमीडे वंधूककांतिं विलसत्त्रिनेत्रम्॥ एवं ध्यात्वा मानसैः सम्पूज्य· शंखस्थापनं कुर्यात्· ततो गुरुं
त्रिपूजांकृत्वा· एतन्मंत्रेण पीठपूजांकृत्वा· खखोल्कायनमः इति मंत्रेण मूर्तिं संकल्प्य· आवाह

रामः

नादिपंचपुष्पांजलिदानपर्यंतम्। विधायावरणपूजामारभेत्। केशरेष्वग्न्यादिकोणेषु मध्येदि
क्षु॥ सत्याय तेजोज्वालामालिने हुं फट् स्वाहा हृदयाय नमः। एवं ब्रह्मणे शिरसे स्वाहा· विष्ण
वे शिखायै वषट्। रुद्राय कवचाय हुं। अग्नये नेत्रत्रयाय वौषट्। शर्वाय अस्त्राय फट्। दिक्प
त्रेषु· आदित्याय नमः· एवं ऐं रविं· ऊं भानुं· ईं भास्करं। अं सूर्याय· पत्रेषु· अग्न्यादि। उं उषायै
नमः। एवं· पं प्रज्ञायै· पं प्रभायै· सं संध्यायै· अंगानि पूजयेदादौ दिक्पत्रेष्वर्कमूर्त्तयः। आदि
त्यश्च ततोऽप्यर्कोप क्रमयः कोणपत्रगाः· त्वस्वनामादिवर्णास्तु तासां बीजान्यनुक्रमात्·
ततः पत्राग्रेषु ग्रहाशापाः सम्पूज्य· पुरतोऽरुणमर्चयेत्। तद्बाह्ये पूर्वादि· ॐ चन्द्राय नमः। एवं मं·
बु· बृ· शु· श· रा· के· नमः सर्वत्र· तत इन्द्रादीन् वज्रादींश्च सम्पूज्य धूपादि विसर्जनान्तं कर्म
समापयेत्। ॐ नमो घृणि सूर्याय· इति मंत्रः। अस्य पुरश्चरणे मन्त्रलक्षजपः। अष्टलक्षं जपेन्मं
त्रं ससिद्धिः स्त्रीरशाविनाम्। तत्सहस्रं प्रजुहुयात् क्षीराक्ताविजितेन्द्रियः॥ इति सूर्यमंत्रः॥ ॥

अथ विष्णुमंत्र ॥ अस्य श्री विष्णुषडक्षरमंत्रस्य नारद ऋषिः शिरसि । गायत्री छन्दः मुखे · श्रीमहावि
ष्णुर्देवता हृदि · सर्वाऽभीष्टसिद्ध्यर्थे जपे विनियोगः ॐ अनिरुद्धाय अंगुष्ठाभ्यां नमः ॥ प्रद्युम्नाय त
र्ज · संकर्षणाय · मध्यमा · वासुदेवाय अना · नारायणाय · कनिष्ठा · ब्रह्मणे · करतल · एवं हृदया
दि । ध्यानम् । कौमोदकीकमलकंबुसुदर्शनानि विभ्राणमायतभुजैर्नवमेघवर्णम् । वामांक
सल्लकमलं कमलायताक्षमानन्दमात्रवपुषं पुरुषं स्मरामि ॥ इति ध्यात्वा यथाशक्ति जपित्वा नि
वेदयेत् । तत्र वैष्णवाचमनं वै कथीये । केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत् करम् · द्वा
भ्यामोष्ठौ च संमृज्य द्वाभ्यां मृज्येन्मुखं ततः ॥ एकेन हस्तं प्रक्षाल्य पादौ चापि तथैकतः । संप्रो
क्ष्यैकेन मूर्धानं ततः संकर्षणादिभिः ॥ आस्यनासिकाक्षिकर्णांश्च स्पृशेन्नाभ्युदरके भुजौ ॥ स्प
र्शेदेवं भवेदाचमनं वैष्णवाऽन्वये । एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् । केशवाद्यस्तु ·
केशव · नारायण · माधव · गोविन्द · विष्णु · मधुसूदन · त्रिविक्रम · वामन · श्रीधर · हृषीकेश · पद्म

नाभ·दामोदर।संकर्षण·वासुदेव·प्रद्युम्न·अनिरुद्ध·पुरुषोत्तम।अधोक्षज·नृसिंह·अच्युत
जनार्द्दन·उपेन्द्र·हरि·विष्णव·१८।केशवायनमइत्यादि·तथाच·सर्वतुर्थीनमोंते स्वनाम
भिर्विन्यसेत्सुधीः।तारंनमःपश्चान्नरौदीर्घसमन्वितौ॥पवनोणायमंत्रोयंवसुर्णोमूलसं
ज्ञकः॥ॐनमोनारायणाय·अस्यपूजाप्रयोगः।प्रातःकृत्यादिमान्तकांतकर्मविधाय·कृष्ण
वकीर्त्यादिन्यासंकुर्यात्॥ध्यानंयथा·उद्यत्प्रद्योतनशतरुचिंतप्तहेमाऽवदातंपार्श्वद्वंद्वेज
लधितनयाविश्वधात्र्याचजुष्टं।नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रंविष्णुंवंदेद
रकमलकौमोदकीचक्रपाणिं·एवंध्यात्वान्यसेत्·ॐकेशवायकीर्त्यैनमोललाटे।ॐना
रायण·कांत्यै·मुखे·ॐमाधवाय·तुष्ट्यैदक्षनेत्रे·ॐगो· पुष्ट्यै· वामनेत्रे·ॐविष्णु·धृत्यै·दक्षकर्णे·
८२ ॐमधु·शान्त्यै·वामकर्णे·ॐत्रिवि क्रियायै·दक्षनासापुटे·ॐवामन·दयायै· वाम·ॐश्रीधर·
मेधायै·दक्षगंडे·ॐहृषी·हर्षायै·वाम·ॐपद्म श्रद्धायै·ओष्ठे·ॐदामो लज्जायै·अधो°

ऊं वासुदे· लक्ष्म्यै· दं नं पंक्तौ· ओं संक· सरस्वत्यै· अं घोरं तप क्तौ· अं प्रद्यु· प्रीत्यै· मस्तके· अः अ
निरु· रत्यै· मुखे· कं चक्रिणे जयायै नमः· खं गदिने· दुर्गायै· गं शार्ङ्गिणे प्रभायै· घं खड्गि सत्या·
यै· ङं शंखि· चंडायै· एवं ककारादि पञ्च दक्षकर मूल संध्यग्रेषु। चं हलिने· वाण्यै· छं मुषललि·
विलासिन्यै· जं खट्लि· विजयायै· झं पाशि· विरजायै· ञं अंकुशि विश्वायै। इति वामकर मू
लसंध्यग्रेषु। टं मुकुंदा· विनदायै· ठं नंदजाय सुनंदायै· डं नंदिने· स्मृत्यै· ढं नराय· ऋद्ध्यै· णं न
रकजिताय· समृद्ध्यै· दक्षपादमूलसंध्यग्रेषु· तं हरये शुद्ध्यै नमः। थं कृष्णाय· बुद्ध्यै· दं सत्या
य· भुक्त्यै· धं सत्वताय· मत्यै· नं सौरये· क्षमायै· वामपादमूलसंध्यग्रेषु· पं शूराय· परमायै·
दक्षपार्श्वे· फं जनार्दना· उमायै· वामपार्श्वा· बं भूधराय क्लेदिन्यै· पृष्ठे· भं विश्वमूर्तये क्लिन्नायै·
नाभौ· मं वैकुण्ठा· वसुदेवायै· उदरे· यं त्वगात्मने पुरुषोत्तमाय· वसुधायै· हृदि· रं असृगात्मने
बलिने परायै· रक्तांशे· लं मांसात्मने बलानुजाय· परायणायै। कं ककुदि· वं मेदात्मने· बालाय सूक्ष्मा

ये·वामांशे· शं अस्थ्यात्मने वृषभाय। सं ध्यायै। हृदादि दक्षकरे· षं मज्जात्मने वृषाय व्रतायै·हृ
दादि वामकरे। संशुक्रात्मने·हंसाय प्रभायै। हृदादि दक्षपादे। हं प्राणात्मने वराहाय निशायै॰ हृदादि
वामपादे। लं जीवात्मने विमलाय अघोरायै· हृदयाद्गुदं। क्षं क्रोधात्मने नृसिंहाय विद्युतायै न
मो हृदयान्मुखे·गोतमीये·केशवादिरियं न्यासन्न्यासमात्रेण देहिनाम्॥ अच्युतत्वं ददात्येव स
त्यमत्र न संशयः॥ अस्य पुरश्चरणे षट्लक्षजपः। तथा च। विकारलक्षं प्रजपेन्मनुमेनं स
माहितः। तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः॥ इति विजारायणमंत्रः॥ अथ राममंत्रः॥ ग्रंथां
तरे ध्यानमाह॥ वामे भूमिसुता पुरश्च हनुमान्पश्चात्सुमित्रात्मजः शत्रुघ्नो भरतश्च पार्श्वदल
योर्वाय्वादिकोणेषु च॥ सुग्रीवो बिभीषणश्च युवराट् तारासुतो जांबवान्मध्ये नीलस
रोजकोमलरुचिं रामं भजे श्यामलम्॥ रां रामाय नमः। षडक्षरो मंत्रः॥ अस्य राममंत्रस्य ब्रह्मा ऋषि
र्गायत्री छन्दः रामो देवता चतुर्वर्गसिद्ध्यर्थे जपे विनियोगः। न्यासः। शिरसि ब्रह्मणे ऋषये नमः॥ मु

विगायत्रीछन्दसे नमः ॥ हृदि रामदेवतायै नमः ततः करांगन्यासौ । रां अंगुष्ठाभ्यां नमः । रीं तर्जनी· स्वाहा·
रूं मध्य· वषट्· रैं अना· हुं । रौं· कनि· वौषट् । रः करतल· फट् । एवं हृदयादिषु॰ ततो मंत्रन्यासः । ब्रह्म
रंध्रे रां नमः । भ्रूमध्ये रां· हृदि मां · नाभौ यं · लिंगे नं । पादयोः मं । ततो मूर्त्तिपंजरन्यासं विधाय ध्यानं कु
र्यात् · । कालांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं
जानुनि ॥ सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यंतं मुकुटांगदादिविविधाकल्पोज्व
लांगं भजे · एवं ध्यात्वा मानसैः सम्पूज्य शंखस्थापनं कुर्यात् । ततः पीठपूजां विधाय पीठशक्तीः
सम्पूज्य· पीठमनुं वृत्वा ध्या२वा हृन्मोदिपं वपुष्यंजलिदानेपर्यं विधायावरणपूजामारभेत्॰
देवस्य वामपार्श्वे श्रीसितायै नमः ॥ अग्रे शार्ङ्गाय नमः ॥ वामदक्षिणपार्श्वयोः शरेभ्यो· चा
पायनमस्तद्विः ॥ केशरे आग्न्यादिकोणेषु मध्ये दिक्षु च । रां हृदयाय नमः इत्यादिना पूजये
त् ॥ ततो दलेषु पूर्वादि· ॐ हनुमते नमः । एवं सुग्री· भरताय· विभीषणाय· लक्ष्मणाय· अंगदाय

शत्रुघ्नाय जांबवते · ततोदलाग्रे ॐ सृष्टयेनमः ॥ एवं · जयंताय । विजया · सुराष्ट्राय · राष्ट्रवर्द्धना
य · अकोपाय · धर्मपालाय · सुमंत्राय · ततइन्द्रादीन्वज्रादींश्च पूजयेत् · अस्यपुरश्चरणं षट्ल
क्षजपः ॥ ऋतुलक्षं जपेन्मंत्रं दशांशं कमलैः शुभैः जुहुयादर्विनेव क्रौ ब्राह्मणान्भोजयेत्ततः
॥ अथ रामपंत्रः षड्विधः । स्वकामश्रीशक्तिवाक्लक्ष्मीताराद्यः पंचवर्णः ॥१॥ षडक्षरः षड्विधः
स्याच्चतुर्वर्गफलप्रदः ॥ मूलः ॥ रां रामायनमः ॥१ क्लीं रामायनमः ॥२ ह्रीं रा ॥३ ऐं रा ॥४ श्रीं रा ५
ॐ रा ॥६ अथ पंचषड्विधः ॥ न्यासोहि रांस्थाने क्लीं मित्यादि देया · ऋषिस्तु रा इत्यादि ब्रह्मा
ऋषिः । श्रीं इत्यादि अगस्ति ऋषिः । ॐकारादेः सदाशिव ऋषिः । अथवा षण्णां विश्वामि
त्र ऋषिः । सर्वेषां गायत्री छन्दः रामो देवता इत्यादि । ध्यानपूजादिकं पूर्ववत् ॥ अथान्यः ॥
जानकीवल्लभाय हुं स्वाहा ॥ दशाक्षरो मंत्रः । वसिष्ठ ऋषिर्विराट्छन्दः सीतासहितरामो देवता
रां बीजं स्वाहा शक्तिः चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ॥ कामबीजं क्लीं अनेनांगन्यासः

४ क्लीमादेः संमोहन ऋषिः । ह्रींकारादेः शक्ति ऋषिः । ऐं इत्यादेर्दक्षिणामूर्त्ति ऋषिः । ६४

ह्री·
१८

कर्त्तव्यः। शिरसि ह्रीं नमः। ललाटे। भ्रूमध्ये। तालुदेशे। कंठे। हृदि। नाभौ। गुह्ये जानुदेशे पादे। क्रमेण द
शवर्णान्न्यसेत् जां शिरस्येवं। ह्रीं अंगुष्ठाभ्यां नमः। ह्रीं हृदयाय इत्यादि। ततो ध्यानम्। अयोध्या
नगरे चित्ररत्नसौवर्णमंडपे॥ मंदारपुष्पैराबद्धविताने तोरणान्विते॥१॥ सिंहासनसमारूढं पुष्प
कोपरि राघवम्॥ रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः शुभैः॥२॥ संस्तूयमानं मुनिभिर्गंधर्वैः परिशो
भितम्॥ सीतालंकृतवामांगं लक्ष्मणेनोपशोभितम्॥३॥ श्यामं प्रसन्नवदनं सर्वाभरणभूषितम्॥
ध्यायन्नेवं जपेन्मंत्रं वर्णलक्षमनन्यधीः॥४॥ वह्निनारायणो नाद्यो नगरः केवल एव च॥ न्यस्त
रो मंत्रराजोऽयं सर्वाभीष्टफलप्रदः॥ तारमायारमानंगवाक्स्ववीजैस्तु षड्विधः॥ ॐ ह्रीं श्रीं क्लीं
ऐं रां। ब्रह्मस्वेन्दुमद्गांतो मंत्रोऽयं चतुरक्षरः॥ रामाय हृन्मनुः प्रोक्तो मंत्रः पंचाक्षरः परः॥ अन्यः॥
वह्निस्थं शयनं विष्णोरर्द्धचन्द्रविभूषितम्॥ एकाक्षरो मनुः प्रोक्तो मंत्रराजः सुरद्रुमः॥ रां॥ ब्रह्मा मु
निः स्याद्गायत्री छंदो रामश्च देवता॥ एकाक्षरे तु द्वादशलक्षजपः॥ ॥अथ कल्पमंत्रः॥ ॐ क्लीं

राम:

१८

गोपीजनवल्लभाय स्वाहा ॥ इति मंत्रः ॥ क्लीं विना जपस्य निःफलत्वात् ॥ अस्य प्रातःकृत्संकृत्वा
नलन्यासं पूर्वोक्तं कृत्वा· प्राणायामत्रयं चरेत् । क्लीमिति एकवारं जपेन दक्षिणनासया वायुंव
रेत्· पुनः सप्तवारं जपेन वामया पूरयेत् ॥ ततो नासापुटौ धृत्वा विंशतिवारं जपेन वायुं कुम्भये
त्· पुनः वामेन रेचयेत् ॥ दक्षया पूरयेत् । ततस्ताभ्यां कुम्भयेत् । वामेनापूर्य· उभाभ्यां कुंभयेत् ॥
तथा· एकेन रेचयेत् कामवीजेनैव पृथक्पृथक्· पूरयेत् सप्तसतेन विंशत्यातेन धारयेत् ॥
अथवा· एतत्प्रकारं सर्वं दशाक्षरेण कर्त्तव्यम् । तत्र मालनः । एतत्कुलमंत्रविषयम् । त
तः न्यासं कुर्यात्· ऋष्यादिन्यासं चरेत् ॥ ततः शिरसि नारदऋषये नमः । मुखे गायत्री छ
न्दसे नमः । हृदि कृष्णाय देवतायै· गुह्ये कामवीजाय· पादयोः स्वाहा शक्तये । ततः ॐ मंत्रा
दिष्टात्री दुर्गायै । इति दुर्गां नमस्कुर्यात् । ततो न्यासः । ॐ गों ॐ मोने दक्षतर्जन्याम् । ॐ पीं ॐ न
मो दक्षमध्य· ॐ जं ॐ नमः दक्षअना । ॐ नं ॐ नमो दक्षकनि· ॐ वं ॐ नमः वामकनिष्ठायाम् । ॐ
ल्लं ॐ नमः वामअना· ॐ भां ॐ नमः वाममध्य· ॐ यं ॐ नमः वामतर्जे· ॐ स्वां ॐ नमः वामअं

ॐ हां ॐ नमः इत्यांगु॰ अयं सृष्टिन्यासः। ततस्तत्वन्यासः। क्रमेण· पादयोर्लिंगे हृदि मुखे शि
रसि हृदि लिंगे सर्वांगे· पृथ्व्यप्तेजोवाय्वाकाशाः हंकारमहत्प्रकृतिपुरुषपरमनत्व॰ शाकृपराय
तत्वात्मनेनमोऽन्ते सर्वत्र· व्यापकोऽयम्। अयं संहारक्रमः। सर्वांगे क्रमेण हां त्वां यं नमः पराय। प
रपुरुषप्रकृतितत्वात्मनेनमः सर्वत्र· हृदि· भां ल्लं· पराय। परा हंकारतत्वात्मनेनमः। शिरसि वं
नमः परायाकाशान· मुखेनं· वासुदेवतत्वा।मने· हृदि· लिंगे· पादयोः। जं। पीं। गों। पराय· तेजोजल
पृथिवीतत्वात्मनेनमः सर्वत्र· अयं सृष्टिन्यासः। पादयोः गों नमः इत्यादि सृष्टिन्यासो गृहस्थैः का
र्यः। संहारन्यासस्तु वैराग्ययुक्तैः कार्यः। एवं न्यासं कृत्वा· ॐ नमः सुदर्शनाय ना। आवक्रायफट्।
इति मन्त्रेण दिग्बंधनं कुर्यात्। ततो ध्यानम्। कुन्देन्दीवरकान्तिकान्तवदनं वर्हावतंसप्रियं श्रीव
त्सांकमुदारकौस्तुभधरं पीतांवरं सुन्दरम्॥ गोपीनां नयनोत्पलार्चिततनुं गोपालसंघावृतं गोविंदं
कलवेणुवादनपरं दिव्यांगभूषं भजे॥१॥ एवं ध्यात्वा मानसैः संपूज्य। वहिः पूजा कर्त्तव्या। श्रीकृष्णस्य· सु
दिव्येलवेनमः। हरिबनमालायै· कौस्तुभाय· श्रीवत्साय· विमलं शुक्लवस्त्रेनं तुलसीं विनिवेदयेदल

तृयावरणेपूजा· पूर्वादिषु·ॐ दामायनमः।सुदामा·वसुदामा·किंकिण्यैनमः।केशरेष्वग्निकोणे-
षु आचक्रायस्वाहा·विचक्रायस्वाहा·शिरसेस्वाहा·सुचक्रायस्वाहा शिखायैवषट्।त्रैलोक्यर-
क्षणचक्रायस्वाहा।कवचायस्वाहा हुं चतुर्दिक्षु असुरान्तचक्रा[illegible]स्वाहा अस्त्रायफट्।ततःपत्रेषुपूर्वा-
दि·ॐ रुक्मिण्यैनमः।सत्यभामायैमा १।नाग्नजित्यै·मित्रविंदायै·सुनन्दायै·सुलक्ष्मणायै·जांबवत्यै·
सुशीलायै·पत्राग्रेषुपूर्वादि·ॐ वासुदेवायनमः।नंदाय·यशोदायै·बलभद्राय·सुभद्रायै।गोपा-
गोपीश्च पूजयेत्·तद्बाह्ये पूर्वादिक्रमेण·ॐ मंदारायनमः।पारिजाताय·कल्पवृक्षाय·हरिचं-
दनाय·तद्बाह्ये इन्द्रादीन्वज्रादीन्पूजयेत्।कृष्णाष्टकेन पुनःपूजयेत्।ॐ श्रीकृष्णायनमः।वासुदेवा-
य·देवकीनन्दनाय·नारायणाय।यदुश्रेष्ठाय·धर्मसंस्थापनाय।असुराक्रान्तभूभारहारिणे·धूपा-
दिविसर्जनांतं कर्मसमापयेत्।अस्यपुरश्चरणं दशलक्षजपः।सीताज्यमधुराप्लुतैररुणांबुजै हो-
मः।मंत्रः।श्रीं ह्रीं क्लीं गोपीजनवल्लभायस्वाहा।अथवा·ह्रीं श्रीं क्लीं गोपीजनवल्लभायस्वाहा·
अन्यः।क्लीं ह्रीं श्रीं गोपीजनवल्लभायस्वाहा।अनेस्त्रयोदशाक्षरमंत्रजपः।सर्वं पूर्ववत् अन्यः।श्रीकृष्णा

परयाहा· क्लीं कृस्नाय स्वाहा· क्लीं कृस्नाय स्वाहा· एतन्मंत्रयं। षडक्षरमंत्रः। अस्य श्रीकृस्नमंत्रस्य नारद
ऋषिर्गायत्री छन्दः श्रीकृस्नो देवता धर्मार्थकाममोक्षार्थे जपे विनियोगः। करांगन्यासौ· क्लीं अंगुष्ठा
भ्यां नमः क्लीं हृदयाय नमः इत्यादि। ध्यानं· कलायकुसुमश्यामं वृन्दावनगतं हरिम्। गोपगोपीगणा
वीतं पीतंवस्त्रयुगान्वितं॥१॥ नानालंकारसुभगं कौस्तुभोद्भासिवक्षसम्। सनकादिमुनिश्रेष्ठैः संस्तु
[illegible]मानुं हा॥२॥ शंखचक्रलसद्बाहुं वेणुं हस्तद्वयेरितम्। एवंसेवं हृदि ध्यात्वा पूजयित्वा मनुं
जपेत्॥३॥ अस्य पुरश्चरणं वसुलक्षजपः। अलिवृक्षकुसुमैर्होमः। अन्यः। श्रीं ह्रीं क्लीं कृस्नाय गोविं
दाय स्वाहा॥ अस्य मंत्रस्य नारदऋष्यादिन्यासं पूर्ववत्। करांगन्यासौ· श्रीं अंगुष्ठाभ्यां नमः ह्रीं तर्जं· स्वा
हा· क्लीं मध्य· वषट्। कृस्नाय अना हुं। गोविंदाय कनि· वौषट्· स्वाहा करतलकरपृ· फट्। अस्यैव
हृदयादिषु नतो मंत्रं जपेत्· वादशलक्षजपः पुरश्चरणम्। सद्यः फलप्रदो मंत्रः॥ वैस्नवमंत्रेषु ख्य
नमः। अस्य श्रीवासुदेवमंत्रस्य प्रजापतिर्ऋषिर्गायत्री छन्दो वासुदेवो देवता चतुर्वर्गसिद्ध्यर्थे
जपे विनियोगः। ऋष्यादिन्यासः। शिरसि प्रजापतये ऋषये नमः। मुखे गाय· हृदि वासु· देवतायै॰

ततः करांगन्यासो। ॐ अंगुष्ठाभ्यां नमः॥ नं तर्जनी· स्वाहा· मों म· वषट्· भं गं अ हुं· वं ते क· वौषट्·
वासुदेवाय करतलक· फट्। एवं हृदयादिषु। ततो मंत्रन्यासः· मूर्द्धि भाले दृशोरास्ये गले दोर्हृदयांबु
जे। कुक्षौ नाभौ ध्वजे जानुद्वये पादद्वये न्यसेत्क्रमेण॥ ततो ध्यानं। विस्नुं शारदर १कोटिचन्द्रसदृ
शं शंखरथांगं गदामंभोजं दधनं सिताब्जनिलयं कान्त्या जगन्मोहनम्। आबद्धांगदहारकुंडलमहामौलि
स्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम्। इति ध्यात्वा मंत्रं जपेत्। द्वादशलक्ष
जपः पुरश्चरणम्। होमस्तु श्रिताज्येन। अस्य भेदः जपे। ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय न
मः। अस्यान्यवासुदेववत्· न्यासस्तु स। ॐ ह्रीं ह्रीं अंगुष्ठा· श्रीं श्रीं तर्ज· स्वाहा। लक्ष्मी मध्य· वषट्· वा
सुदेवाय अना· हुं। नमः कनि· फट्। एवं हृदयादिषु॰ ध्यानम्। विद्युच्चन्द्रनिभं वपुः कमलजा वैकुं
ठयोरेकतां प्राप्तं स्नेहवशोन्नरले विलसद्भूषाभरालंकृतम्। विद्यापंकजदर्पणान्मणिमयं कुंभं स
रोजं गदां शंखं चक्रमयमूर्तिं विभ्रदापितां दिश्यात् श्रियं वः सदा॥१॥ एवं ध्यात्वा जपः कार्यः। अस्य पु
रश्चरणं वत्सुलक्षजपः॥ अन्यः॥ ॐ नमो विस्नवे सुरपतये महाबलाय स्वाहा॥ अस्य मंत्रस्य

·दी·
१९

इन्दु ऋषि विराट्छन्दः दधिवामनो देवता · चतुर्वर्ग · ॐ नमः · विष्णवे · सुरपतये · महाबलाय ·
स्वाहा · अंगुष्ठादि · हृदयादि । ध्यानम् । मुक्तागौरंमणिमयलसद्भूषणंचन्द्रसंस्थंभृंगाकारैरलक
निकरैः शोभिवक्त्रारविंदम् । हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णं दध्यन्नाद्यं कनकचषकं धा
रयंतं भजामः । एवं ध्यात्वा मानसैः सम्पूज्य चन्द्रमण्डलांतकस्मिन्नेव पीठे · पूर्वोक्त वासुदेवादीन्संपूज्य मं
त्रं जपेत् । अस्य पुरश्चरणं लक्षत्रयं जपः । होमस्तु घृतयुक्तपायसेन · घृतयुक्ततंडुलैर्वा · हयग्री
व मंत्रः ॥ ॐ उद्गिरत्प्रणवोद्गीथ सर्ववागीश्वरेश्वर । सर्ववेदमयाचिंत्य सर्वं बोधय बोधय । अ
स्य मंत्रस्य ब्रह्मा ऋषिरनुष्टुप्छन्दः हयग्रीवो देवता सर्वज्ञानावाप्तिपूर्वकं चतुर्वर्गसिद्ध्ये जपे विनियो
गः ध्यानम् । शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैः प्रदीप्तम् । रथांगशंखान्वितबाहुयुग्मं
जानुद्वयं न्यस्तकरं भजामः ॥ इति संपूज्य स्वाहांतं मंत्रं जपेत् ॥ ० ॥ ॥ अथ वक्ष्ये महेशस्य
मंत्रान्सर्वसमृद्धिदान् । ये पूर्वमृषयः प्राप्ताः शिवसायुज्यमंजसा ॥ सांतः सदीर्घ लसंयुक्तो बिंदुभूषितः
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मणिः ॥ हौं ॥ अस्य पूजा प्रातः कृत्यादि प्राणायामांतं कर्म कृत्वा शोकि

२ऊँ।

२= हु· ॐ· =२

राम
१९

ठन्यासं मातृकास्थानेषु कुर्यात्॥ तद्यथाः अं श्रीकंठपूर्णोदरीभ्यां नमः॥ ललाटे। आं अनंतविरजा
भ्यां नमः। मुखे॰ इं सूक्ष्मशाल्मलिभ्यां· दक्षनेत्रे· ईं त्रिमूर्तिलोलाक्षीभ्यां· वा· उं अमरेश्वरवर्तुलाक्षी
भ्यां· दक्षकर्णे· ऊं अर्घीशदीर्घघोणाभ्याम्॥ वा· ऋं भारभूतदीर्घमुखीभ्याम्॰ दक्षनासिकायाम्॰
ॠं अतिथीशगोमुखीभ्याम्· वामना· लृं स्थाणुदीर्घजिह्विकाभ्यां दक्षगंडे॥ लॄं हरकुंभोदरीभ्यां
वाम· एं पिंठीशोर्द्धकेशीभ्यां· ओष्ठे। ऐं भौतिकेशविकृतमुखीभ्याम्। अधरे· ओं सद्योजातज्वाला
मुखीभ्यां· ऊर्द्धदंते। औं अनुग्रहेश्वरोल्कामुखीभ्याम्· अधोदंते· अं अक्रूरसुग्रीवमुखीभ्याम्· मू
लरंध्रे। अः महासेनविद्यामुखीभ्यां· मुखे· कं क्रोधीशसर्वसिद्धिमहाकालीभ्यां कोन १ बाहुमूले
दक्षे। खं चंडेशसर्वसिद्धिसरस्वतीभ्यां कूर्परे॥ गं पंचांतकगौरीभ्यां मणिबंधे॰ घं शिवोत्तमत्रैलो
क्यविद्याभ्यां नमः। अंगुलिमूले। एवं स्रांतम्। ङं· एकरुद्रमंत्रशक्तिभ्याम्। अंगुल्यग्रेषु। चं कूर्मात्मश
क्तिभ्याम्। छं एकनेत्रभूतमातृकाभ्याम्। जं चतुराननलंबोदरीभ्याम्। झं अजेशद्राविणीभ्याम्॥ ञं शर्वना
गरीभ्यां॥ इति वामबाहुमूलसंध्यग्रेषु। टं सोमेशखेचरीभ्याम्। ठं लांगुलीमंडरीभ्याम्॥ डं दारुकेरूपिणी
भ्याम्। ढं अर्द्धनारीश्वरविविनीभ्याम्। णं उमाकांतकाकोदरीभ्याम्॥ इति दक्षपादमूलसंध्यग्रेषु॥

तं आघाटिपूतनाभ्याम्। थं दंडिभद्रकालीभ्याम्। दं अग्नियोगिनीभ्याम्। धं ईशशंखिनीभ्याम्। नं
मेघगर्जिनीभ्याम्। इति वामपादमूलसंध्यग्रेषु। पं लोहितकालरात्रीभ्यां। फं शिखिकुब्जिकाभ्यां। बं
छगलांडपद्मिनीभ्यां। भं द्विरंडवक्राभ्यां। मं महाकालजयाभ्याम्। इति दक्षपार्श्वे॰ यं त्वगात्मवागी
शसुमुखेश्वरीभ्याम्· हृदि· रं असृगात्मभुजंगेशरेवतीभ्यां नमो दक्षबाहुमूले॰ लं मांसात्मपिना
कीशमाधवीभ्यां· ककुदि। वं मेद आत्मखड्गीशवारुणीभ्यां नमो वामबाहुमूले॥ शं अस्थ्यात्मकेश
वायवीभ्यां नमो हृदयादिकरे। षं मज्जात्मश्वेतरक्तोविदारिणीभ्यां नमो हृदयादिवामकरे। सं शु
क्रात्मगर्वीशमहानाभ्यां नमो हृदयादिदक्षपादे॥ हं प्राणात्मानकुलीशलक्ष्मीभ्यां नमो हृदयादि
वामपादे॥ ळं जीवात्मशरीरव्यापिनीभ्यां हृदयाद्युदरे॥ क्षं क्रोधात्मसंवर्त्तकमायाभ्यां नमो हृदया
दिमुखे॥ साहित्ये द्विवचनबहुवचने द्वंद्वसमासो वा· इति न्यायात्॥ इति न्यासं कृत्वा हृत्पद्मे केस
रेषु पूर्वादि· ॐ वामायै नमः। एवं· ज्येष्ठायै· रौद्र्यै· काल्यै· कलविकरिण्यै· बलविकरिण्यै। बलप्रम
थिन्यै। सर्वभूतदमन्यै। मध्ये मनोन्मन्यै॰ तदुपरि॰ ॐ नमो भगवते सदाशिवाय सकलगुणात्मशक्ति

शुक्लायानंताय योगपीठात्मने नमः ॥ ततः अष्टादिकरांगन्यासः। शिरसि वामदेवाय ऋषये नमः। मु
खे। पंक्तये छन्दसे। हृदि सदाशिवाय देवतायै। ततः करन्यासः ह्रां ह्रिं ह्रुं ह्रैं ह्रौं ह्रः। एवं। नमः स्वाहा वषट्
हुं वौषट् फट्। अंगुष्ठादिकरतलपृष्ठपर्यंतं ज्ञेयम्। ह्रां हृदयाय नमः। ततः ईशानाद्यां पंचमूर्त्तीर्न्यसे
त्। अंगुष्ठयोः। ह्रौं ईशानाय नमः। तर्जन्योः ह्रैं तत्पुरुषाय। मध्यमयोः हुं अघोराय। अनामिकयोः
ह्रिं वामदेवाय नमः। कनिष्ठयोः हं सद्योजाताय नमः। ततस्तत्तदंगुलीभिः। ह्रौं ईशानाय इत्यादि
शिरोवदनहृद्गुह्यपादेषु न्यसेत्। ततो ध्यानम्। मुक्तापीतपयोदमौक्तिकजपावर्णैर्मुखैः पंचभिस्त्र्य
क्षैरंचितमीशमिंदुमुकुटं पूर्णेन्दुकोटिप्रभम्। शूलं टंककृपाणवज्रदहनान्नागेन्द्रघंटांकुशान्
पाशाभीतिवरं दधानममितैः कल्पोज्ज्वलांगं भजे ॥१॥ एवं ध्यात्वा मानसैः सम्पूज्य पुरःस्थापनं
कृत्वा वेस्वोलपीठपूजां विधाय। पुनर्ध्यात्वा आवाहनादिपंचपुष्पांजलिदानपर्यंतं विधाय आव
रणपूजामारभेत् ॥ यथा· ऐशान्यामीशानाय नमः। पू· ॐ तत्पुरुषाय नमः। द· ॐ अघोराय। प· ॐ
सद्योजाताय। उ· ॐ वामदेवाय। ततः ईशानादिकोणेषु ॐ निवृत्त्यै नमः। प्रतिष्ठायै। विद्यायै। शान्त्यै।

ततोऽष्टदलेषु पूर्वादि। ॐ अनंताय नमः। सूक्ष्माय· शिवोत्तमाय· एकनेत्राय· एकरुद्राय· त्रिमूर्त्तये· श्रीकं
ठाय· शिखंडिने। तद्दले· उत्तरादिक्रमेण· ॐ उमायै नमः। चंडेश्वराय· नंदिने। महाकालाय· गणेशाय
नमः। वृषभाय· भृंगिरिटाय· स्कंदाय· तद्बाह्ये इंद्रादीन्वज्रादींश्च संपूज्य· धूपादि विसर्जनांतं कर्मसमा
पयेत्॥ अस्य पुरश्चरणं पंचलक्षजपः। मधुप्लुतैः करवीरकुसुमैः पंचायुतहोमः॥ ७॥ षडक्षरः शा
किरुद्रः कथितो ह्यष्टाक्षरो मनुः॥ ॐ नमः शिवाय· इति मूलः। शाकिरुद्र इति· ह्रौं श्रीं क्लीं नमः शिवा
य। अष्टाक्षरो मंत्र उमामहेश्वरसंज्ञकः। अस्य पूजा प्राग्वत्· ऋष्यादिपूर्वोक्तपीठन्यासं विधाय· करन्या
दिन्यासं कुर्यात्। शिरसि वामदेवाय ऋषये नमः। मुखे· पंक्तये छंदसे नमः। हृदि· उमापतये नमो। देवता
यै। ततः करांगन्यासौ। ॐ अंगुष्ठाभ्यां नमः। नं तर्ज· स्वाहा· मं म· वषट्। शिं अ· हुं। वां कनि· वौषट्। यं
अस्त्राय फट्॥ ततो ध्यानम्· ध्वं धूम्राभं त्रिनेत्रं शशिसकलधरं स्मेरवक्त्रं वहंतं हस्तैः शूलं कपालं वरद
मभयदं चारुहारं नमामि। वामोरुस्थोमयायाः करतलविलसच्चारुनेत्रोत्पलाया हस्तेनाश्लिष्टदेह
मनिशमपि विलसद्भूषणायाः प्रियायाः॥ १॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कुर्यात्। ततः पी

चोक्तपीठपूजांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामार
भेत्। ततः केशरेषुअग्न्यादिकोणेमध्येदिक्षुच॥ ॐ हृदयायनमः॥ मध्येपूर्वादिदिक्षु ॐ हल्ले
लेखायैनमः॥ गगणायै·महोष्णुष्मायै·पत्रेषु·पूर्वादि ॐ वृषायनमः·क्षेत्रपालाय·दुर्गायै·कार्ति
केयाय·नंदिने। विघ्नराजाय·श्यामाय सेनापतये·ततः·पूर्ववत्सत्राऽग्रेषु ब्रह्मादीन्पूजयेत्॥ तद
ले·ब्राह्म्याद्याः मातरः। तद्बहिरिंद्रादीन्। वज्रादींश्चपूजयेत्·ततो धूपादि विसर्जनांतं कर्मस
मापय। अस्य पुरश्चरणं चतुर्लक्षजपः। त्रिमधुयुक्तैरारग्वधसमिद्भिर्होमः। आरग्वधः सोना
लु·अन्यः। ठारोमायावियद्बिंदुमनुस्वारसमन्वितः। पंचाक्षरसमायुक्तोवसुवर्णो मनुर्मतः॥ ॐ
ह्रीं हौं नमः शिवाय·अस्य सर्वं पूर्ववत्॥ ध्याने विशेषः। वन्दे सिन्दूरवर्णं मणिमुकुटलसच्चा
रुचन्द्रावदातं संभालोघन्नेत्रमीशं स्मितमुखकमलं दिव्यभूषांगरागम्॥ वामोरुन्यस्तपाणेर
रुणकुवलयं संदधत्याः प्रियायाः वृत्तोत्तुंगस्तनाग्रे निहितकरतलं वेदटंकेष्टहस्तम्॥१॥

सर्वं पूर्ववत्समाप्य· अस्य पुरश्चरणं अष्टलक्षजपः। घृतयुक्तपायसैरष्टसहस्रहोमः अन्यः। तारस्थि
रावामकर्णे दुर्गगुप्तगर्भसमन्वितः। अष्टाक्षरमंत्रराजोऽयं मंत्री मृत्युंजयात्मकः। ॐ जूं सः। अस्य श्रीमृत्युंज
य मंत्रस्य कहोल ऋषिर्देवीगायत्री छन्दो मृत्युंजयो देवता समस्तोपद्रवनिवृत्तिपूर्वकाभीष्टभोगमोक्षा
र्थे जपे विनियोगः। शैवोक्तपीठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात्। शिरसि· कहोलऋषये नमः·
मुखे· देवीगायत्री छं· हृ· मृत्युंजयाय देवतायै· नमः· करांगन्यासौ· सां ॐ· सीं न· स्वाहा· सूं म· वष
ट्· सैं· ॐ हुं। सौं· क· वौषट्· सः· कर· फट्। एवं हृदयादिषु। ध्यानम्। चंद्रार्काग्निविलोचनं स्मितमुखं
पद्मद्वयांतःस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्॥ कोटीरेन्दुगलत्सुधाप्लुत
तनुं हारादिभूषोज्ज्वलं कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये॥१॥ एवं ध्यात्वा मानसैः संपूज्या
र्घ्यस्थापनादिपीठपूजांतं विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामा
रभेत्। यथा· अग्न्यादिकोणेषु मध्ये दिक्षु च· सां हृदयाय नमः· इत्यादि संपूज्य ततो हरिं ब्राह्मीश्च संपूज्य धू
पादिविसर्जनांतं कर्म समापयेत्· अस्य पुरश्चरणं लक्षत्रयं जपः। गुणोत्तलक्षजपे मंत्रांतं दृग्गां शांतिकालधीः

राम-
२

जुहुयाद्गंधतोयाद्यैः शुद्धदुग्धाज्यलोडितैः ॥ कल्पे तारो ह्न्नीलकंठाय मंत्रस्त्वाष्टाक्षरः परः ॥ अस्य
पूजादिकं सर्वं पूर्ववत् । विषमस्तु प्रल्हादऋषिर्गायत्रीछंदो नीलकंठो देवता । ॐ नमो नीलकंठाय इति
मंत्रः ॥ नमोन्तः हृदयं त्वपरं साक्षी लान्तो नंता स्थितो मरुत् ॥ पंचाक्षरमनुः प्रोक्तस्तारादौ योयं षडक्ष
रः ॥ ॐ नमः शिवाय ॥ प्रातःकृत्यादिपीठो रूपीठमन्त्वंतंकर्मसमाप्य ऋष्यादिन्यासंकुर्यात् । शि
रसि वामदेवाय ऋषये नमः । मुखे पंक्ति छं । हृदि ईशानाय दे । ततो मूर्तिन्यासः । तं तत्पुरुषा
य नमः । म मं अघोराय नमः । कं शिं सद्योजाताय पं अं वां वामदेवाय ओं यं ईशानाय नमः । मंत्र
वर्णादिकान्न्यस्येत्सर्वं मूर्तिर्ध्यानक्रमम् । तर्जनीमध्ययोरंत्यानामिकांगुष्ठके पुनः । एवं वक्त्रे हृदये पा
दे गुह्ये मूर्ध्नि विन्यसेत् । एवं प्राग्याम्यवारुणोदीच्यमध्यवक्त्रेषु विन्यसेत् । ततः करांगन्यासौ । ॐ
अंगुष्ठाभ्यां नमः । नं तं स्वाहा इत्यादि । एवं हृदयादिषु । ततो गोलकन्यासः । हृदि ॐ नमः । वक्त्रे
नमः नं । अंसयोर्मं नमः । शिं नमः । गुह्ये उर्वो वां नमः । पादयोर्यं नमः । एवं न्यस्य । नमोस्तु स्थाणुभूता
य ज्योतिर्लिंगामृतात्मने । चतुर्मूर्तिसुवपुषे भासितांगाय शंभवे । ततो ध्यानम् । ध्यायेन्नित्यं म

दी·
२३

देशांरजतगिरिनिभंचारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराऽभीतिहस्तं प्रसन्नम्। प
द्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं
त्रिनेत्रम्॥२॥ अतः परं पूर्ववत्केला· ईशानादिपंचमूर्त्तिनिवृत्त्यादिकलाः पूज्याः। पुनरंगन्यासः।
धूपादिविसर्जनांतं कर्म समाप्य। चतुर्विंशतिलक्षजपः पुरश्चरणम्· घृतपायसैर्होमः॥ प्रणवो हृद
यं पश्चात्ततो भगवते पदम्। ङेंतं च दक्षिणामूर्त्तिं तमिधां उदीरयेत्। अयष्ठठद्वयांतोयं द्वाविंशत्य
क्षरो मनुः॥ ॐ नमो भगवते दक्षिणामूर्त्तयेवल्लमेधाम्प्रयछस्वाहा। इति मंत्रः। अस्य प्रातःकृत्वा
दिशैवोक्तपीठपूजांतं विन्यस्य ऋष्यादिन्यासं कुर्यात्। शि· चतुर्मुखऋषये नमः। मु· गायत्रीछंदः
हृ· दक्षिणामूर्त्तये देवतायै। ततः करांगन्यासौ। ॐ अं आं अंगुष्ठा· ॐ इं ईं· तर्ज· स्वाहा। ॐ उं ऊं मध्य· वष
ट्। ॐ एं ऐं अना· हुं। ॐ ओं औं क· वौषट्। ॐ अं अः करतलस्वा हा· एवं हृदयादिषु। तथा च· तारा
द्यैः स्वरैर्दीर्घैः षड्भिरंगानि कल्पयेत्। अथवा मंत्रसंभूतैः पदैर्वा कल्पयेत्क्रमात्। शुद्धमंत्रमु·
ॐ आं अंगु· ॐ ईं· ॐ ऊं। ॐ ऐं। ॐ औं· ॐ अः। इत्यादिमंत्रन्यासः। ॐ नमः अंगुष्ठाभ्यां नमः। भगव

रान·
२३

तेज्ज· स्वाहा· दक्षिणामूर्त्तये· म· वषट्। वर्णमेधांज्ञनाहुं। प्रयच्छ कनि· वौषट्। स्वाहा करत
लफट्। एवं हृदयादिषु। ततो ध्यानम्। वटवृक्षं महोच्चायं पद्मरागफलोज्वलम्। गरुत्मतमयैः
पत्रैर्विचित्रैरुपशोभितम्॥ नवरत्नसमाकल्पैर्लंबमानैरलंकृतम्। विसं१चिंत्येवमूले स्थं चिंतयेल्लो
कनायकम्॥ स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशविद्यांज्ञानमुद्रां कराब्जैः॥ द
धतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षिणामूर्त्तिमीडे॥१॥ एवं ध्यात्वा मान
सैः सम्पूज्यार्घस्थापनादि शैवोक्तपीठपूजां विधाय· पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदान
पर्यंतं विधाय आवरणपूजामारभेत्। यथा केसरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च। ॐ आँ हृदयाय· इत्या
दिना पूजयेत्॥ ततः पत्रेषु पूर्वादि· ॐ सरस्वत्यै नमः। एवं ब्रह्मणे। सनकाद्याधराय· नन्दिहरिंद्रादी
न्वज्रादींश्च संपूज्य· धूपादि विसर्जनांतं कर्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। लक्षमाज्यं जपेन्म
न्त्रं ब्रह्मचारिव्रतोस्थितः। जुहुयात्सघृतैः पयोभिर्दशांशं संस्कृतेऽनले। अस्य विषघ्नपहारिसदाशि
वमंत्रस्य अघोरऋषिः त्रिष्टुप्छन्दः नीलकंठो देवता मम सकलविषहरणे विनियोगः। ॐ हर हर

३०८२

ोहकपर्दिने नीलकंठाय स्वाहा ॥ ह्रां ॥ कालकूटविषभक्षणाय नीलकंठिने स्वाहा । इति मंत्रः ॥ अथ मंत्राणां दोषशांतिः ॥ ॥ मंत्राः केचित्कीलिताः केचिद्विलापिताः केचिद्विफलाः केचिद्बाधिताः । छिन्नाः । रुद्धाः । प्रध्वस्ताः । नपुंसकाः । सिद्धिहीनाः । सत्वहीनाः । दुष्कराः । बीजहीनाः । एते वा भेदाः बहवः संति । तेषां दोषाणां शुं निःछिन्नादुष्टाश्च ये मंत्राः सर्वे मंत्रे निरूपिताः । ते सर्वे सिद्धिमायांति मातृकार्णप्रभावतः । मातृकार्णैः पुटीकृत्य मंत्रं विघ्नां विशेषतः । ध्यानमष्टोत्तरं पूर्वं प्रजपेत्फलसिद्धये । तदा मंत्रो महाविद्याय यो जफलदो भवेत् । मातृकापुटितं मध्ये वर्णोतः विन्यासय च ॥ मंत्रा वर्णान्ततः कुर्यात् शोधनं तत्र यत्नतः । यथानुयोगी सिंपुटं नां यं को आधारं यं जपमानं तु तन्नो मनु वर्णान्तेषु तत्र गतागतान् । अन्तरे श्रावयि सिद्ध्यै लोवाप्नु मापूर्य कुम्भयेत् ॥ स हंसं वजेदे स्वयं मंत्रं दोषशांतये । तथा एकुक्षेन्हु सर्वदा ने मायाकापत्र भाविता । सिद्धानादौ प्रियश्चैव तत्र हूयते बिन्दु नानाह सम्यक् देवतापि दुष्टमंत्रोऽपि सिद्ध्यति । सम्यक् ध्यानं कृत्वा तु सोऽपि मंत्रो ह्यपि सिद्ध्यति ॥ अस्त्रैष मातृका देवी हृ-ले सर्वेत्यमेत्रयम् । अनंतत्रयस्ता सौम्यां दुष्टमंत्रोऽपि सिद्ध्यति ॥ ० ॥ ॥ इति मंत्रदोषशांतिः ॥

[illegible]

स्कभागयुक्तस्तु [illegible] कुलेस [illegible] ज्ञातिपरलल वंसानां प्रतके

भागसुग्म [illegible] नंत्रि [illegible] स्वाहि जयासङ्गमः ति [illegible] ॥ सर्व [illegible]

टि [illegible] काकायोसे व्यानित्यतकानिकै ॥ सेव्यातेनप्रयत्नेनगस्या तेसम

रासता ॥ विजया [illegible] जा [illegible] लोजोर [illegible] पोस्तका दाना [illegible]

रदुवा [illegible] रावीज सम्व [illegible] मरिवाधि प्यलि [illegible]

तागोलिखेन्तु [illegible] ॥ ॥

रु १

॥ ॥ श्रीगणेशाय नमः ॥ ॥ राजोवाच ॥ ॥ भगवन्नवतारा मे चंडिकाया
योदिताः ॥ एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसि ॥१॥ आराध्यं य
न्मयादेव्याः स्वरूपं येन च द्विज ॥ विधिना ब्रूहि सकलं यथावत्प्र
णतस्य मे ॥२॥ ॥ ऋषिरुवाच ॥ इदं रहस्यं परममनाख्येयं प्रच
क्षते ॥ भक्तोसीति न मे किं.... चित्तवावाच्यं नराधिप ॥३॥ सर्वस्या
द्या महालक्ष्मी त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं

दुव

सून्यंतदखिलंस्वेनपूरयामासतेजसा। २

स्थिता ॥ ४ ॥ मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती ॥ नागंलिंगंचयोनिंचबिभ्र
त्तीनृपमूर्द्धनि ॥ ५ ॥ तप्तकांचनवर्णाभातप्तकांचनभूषणा ॥ सून्यंतदखिलंलो
कंविलोक्यपरमेश्वरी ॥ ६ ॥ बभाररूपमखिलंतमसाकेवलेनहि ॥ साभि
न्नांजनसंकाशादंष्ट्रांकितवराननां ॥ विशाललोचनानारीबभूवतनुमध्यमा ा
॥ ७ ॥ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ कबंधहारंशिरसाबिभ्राणाहिशिर मा
स्रजं ॥ ८ ॥ साप्रोवाचमहालक्ष्मींतामसीप्रमदोत्तमा ॥ नामकर्मचमेमातर्देहि च

त्म्यं नमो नमः ॥१०॥ जां ध्येवाव महालक्ष्मीस्त्रामसी शिद्धिलोकंनां । ददामि तव जा
मानि यानि कर्म्माणि तानि ते ॥११॥ महामाया महाकाली महामारी क्षुधा तृषा ।
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥१२॥ इमानि तव नामानि प्रतिपाद्यानि कर्मभिः
नि मया ॥ एभिः कर्म्माणि ते ज्ञात्वा यो धीते सोऽश्नुते सुखं ॥१३॥ तामित्युक्त्वा महा[illegible] स्मि ताम
: स्वरूपं परमं नृप ॥ सत्वा[illegible]ध्येनातिसुद्देन गुणेनेंदुप्रभं दधौ ॥१४॥ अक्षमालाङ्कुश
धरा वीणापुस्तकधारिणी ॥ सा बभूव वरानारी नामान्यस्यैव सा ददौ ॥१५॥

महाविद्यामहावाणीभारतीवाक्सरस्वती ॥ आर्योब्राह्मीमहाधेनुर्वेदगर्भे
चधीश्वरी ॥१६॥ अथोवाचमहालक्ष्मीर्महाकालींसरस्वतीं ॥ युवांजनयतांदे
व्यौमिथुनेस्वानुरूपतः ॥१७॥ इत्युक्त्वातेमहालक्ष्मीःससर्जमिथुनंस्वयं ॥
हिरण्यगर्भौरुचिरौस्त्रीपुंसौकमलासनौ ॥१८॥ ब्रह्मन्विधेविरिंचेतिधातरित्या
हतंनरं ॥ श्रीःपद्मेकमलेलक्ष्मीत्याहमातास्त्रियंचतां ॥१९॥ महाकालीभा
रतीचमिथुनेसृजतःसह ॥ एतयोरपिरूपाणिनामानिचवदामिते ॥२०॥ नील

कंठरक्तवाङ्कश्वेतांगंचंद्रशेखरं॥जनयामाससद्रूपंमहाकालीसितांस्त्रियं॥
॥२१॥सरुद्रःशंकरस्थाणुःकपर्दीत्रिविलोचनः॥त्रयीविद्याकामधेनुःसा
स्त्रीभाषाक्षरास्वरा॥२२॥सरस्वतीस्त्रियंगौरींकृष्णंचपुरुषंनृप॥जनयामास
नामानितयोरपिवदामिते॥२३॥विष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्दनः॥
उमागौरीसतीचंडीसुंदरीसुभगाशुभा॥२४॥एवंयुवतयःसद्यःपुरुषत्वंप्रपेदि
रे॥चक्षुष्मंतोनुपश्यंतिनेतरेतद्विदोजनाः॥२५॥ब्रह्मणेप्रददौपत्नींमहालक्ष्मी

नृपत्रयीं ॥ रुद्रायगौरींवरदांवासुदेवायचश्रियम् ॥ २६ ॥ स्वरयासहसंभूयविरिं
चोंडमजीजनत् ॥ विभेदभगवान्रुद्रस्तद्गौर्यासहवीर्यवान् ॥ २७ ॥ अंडमध्येप्र
धानादिकार्यजातमभून्नृप ॥ महाभूतात्मकंसर्वंजगत्स्थावरजंगमम् ॥ २८ ॥
पुपोषपालयामासतल्लक्ष्म्यासहकेशवः ॥ महालक्ष्मीर्महाराजजगत्सर्वम
यीश्वरी ॥ २९ ॥ निराकाराचसाकारासैवनानाभिधानभृत् ॥ नामांतरैर्निरू
प्यैषानाम्नानान्येनकेनचित् ॥ ३० ॥ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंत

रे देवीमाहात्म्ये प्राधानिकं रहस्यं नाम ॥ १ ॥ ॥ ऋषिरुवाच ॥ ॥ त्रिगुणा तामसी
देवी सात्विकी या त्रिधोदिता ॥ सा शर्वा चंडिका दुर्गा भद्रा भगवतीर्यते ॥ २ ॥ योग
निद्रा हरेरुक्ता महाकाली तमोगुणा ॥ मधुकैटभनाशार्थं यां तुष्टावांबुजास
नः ॥ २ ॥ दशवक्त्रा दशभुजा दशपादांजनप्रभा ॥ विशालया राजमाना त्रिंशल्लो
चनमालया ॥ ३ ॥ स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिपा ॥ रूपसौभाग्यकांती
नां सा प्रतिष्ठा महाश्रियं ॥ ४ ॥ खड्गबाणगदाशूलशंखचक्रकपालधृत ॥

वाहनं पूजितामनयासर्वज्ञत्वंप्रयच्छति ॥ निशुंभमथनीदेवीशुंभासुरनिवर्हिणी ॥१६॥
इत्युक्तानिस्वरूपाणिमूर्त्तीनांतवपार्थिव ॥ उपासनंजगन्मातुःपृथगासांनिशा
मय ॥१७॥ महालक्ष्मीर्यदापूज्यामहाकालीसरस्वती ॥ दक्षिणोत्तरयोःपूज्ये
पृष्ठतोमिथुनत्रयम् ॥१८॥ विरिंचिःस्वरयामध्येरुद्रोगौर्यावदक्षिणे ॥ वामेल
क्ष्म्याहृषीकेशःपुरतोदेवतात्रयम् ॥१९॥ अष्टादशभुजामध्येवामेवास्यादशा
नना ॥ दक्षिणेष्टभुजालक्ष्मीर्ब्रह्माण्याद्यायथाक्रमं ॥२०॥ पूर्वादिदलतःपूज्या

र॰
६

सितानागाद्यष्टभैरवाः॥अष्टादशभुजा वैषा यदा पूज्या नराधिप॥२१॥दशानना वा
ष्टभुजा दक्षिणोत्तरयोस्तथा॥दशानना यदा पूज्या दक्षिणोत्तरयोस्तदा॥२२॥का
लमृत्यू वसंपूज्यौ सर्वारिष्टप्रशांतये॥यदा वाष्टभुजा पूज्या शुंभासुरनिवर्हि
णी॥२३॥नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ॥नमो देव्या इति स्तोत्रैर्महा
लक्ष्मीं समर्चयेत्॥२४॥अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः॥अष्टादशभुजा
वैषा पूज्या महिषमर्दिनी॥२५॥महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती॥

राम
६

ईश्वरी त्वम्पापानां सर्वलोकमहेश्वरी ॥२६॥ महिषान्तकरी येन पूजिता सजग
त्प्रभुः ॥ पूजयेज्जगतां धात्रीं चंडिकां भक्तिवत्सलां ॥२७॥ अर्घ्यादिभिरलंकारै
र्गंधपुष्पैस्तथोत्तमैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥२८॥ रुधिराक्ते
न बलिना मांसेन सुरया नृप ॥ प्रणामाचमनीयेन चंदनेन सुगंधिना ॥२९॥ सक
र्पूरैश्च तांबूलैर्भक्तिभावसमन्वितैः ॥ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम्
॥३०॥ पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ दक्षिणे पुरतः सिंहं समग्रं धर्म

मीश्वरम् ॥३१॥ वाहनं पूजयेद्देव्याप्तं येन चराचरम् ॥ ततः कृतांजलिर्भूत्वा
स्तवीत वचनैरिमैः ॥३२॥ कुर्यान्नमस्ववनं धीमान्नमस्यामेकाग्रमानसः ॥ एकेन
वा मध्यमेन नैकेनेतरयोरिह ॥३३॥ चरितार्द्धेन जपेज्ज्ञापपत्रश्छिद्रमवाप्नुयात्
स्तोत्रमंत्रैः स्तवीतेशां यदि वा जगदंबिकाम् ॥३४॥ प्रदक्षिणा नमस्कारान्कृत्वा
मूर्ध्नि कृतांजलिः ॥ क्षमापयेज्जगद्धात्रीं मृडर्डुड्रुरमंडितः ॥३५॥ प्रतिश्लोकं च जु
हुयात्पायसं तिलसर्पिषा ॥ तद्रूपात्स्तोत्रमंत्रैर्वा चंडिकायैस्समं हविः ॥३६॥

न्नमोनामपठेद्देवींपूजयेत्सुसमाहितः॥प्रयतःप्रांजलिःप्रह्वःप्रणम्यारोप्य
चात्मनि॥३७॥सुचिरंभावयेदीशांचंडिकांतन्मयोभवेत्॥एवंयःपूजयेद्भक्त्या
प्रत्यहंपरमेश्वरीं॥भुक्त्वाभोगान्यथाकामंदेवीसायुज्यमाप्नुयात्॥३८॥योन
पूजयतेभक्त्याचंडिकांभक्तवत्सलां॥भस्मीकृत्यास्यपुण्यानिनिर्दहेमेंमेंषी परमे
श्वरी॥३९॥तस्मात्पूजयभूपालसर्वलोकमहेश्वरीं॥यथोक्तेनविधानेनचंडि
कांसुखमाप्स्यसि॥४०॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहा

र.
८

वैकृतिकं रहस्यं नाम ॥ ॥१॥ ॥ऋषिरुवाच॥ नंदा भगवती नाम या भविष्य
ति नंदजा ॥ स्तुता सा पूजिता नित्यं वशीकुर्याज्जगत्त्रयं ॥१॥ कनकोत्तमकान्तिः
सा सुकान्तिकनकाम्बरा ॥ देवी कनकवर्णाभा कनकोत्तमभूषणा ॥२॥ कम
लांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिरा कमला लक्ष्मीः सा श्री रुक्मां
बुजासना ॥३॥ या रक्तदंतिका नाम देवी प्रोक्ता मयानघ ॥ तस्याः स्वरूपं वक्ष्या
मि शृणु पापभयापहं ॥४॥ रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा ॥ रक्तायुधा

राम
८

रक्तनेत्रारक्तकेशातिभीषणा ॥५॥ रक्तातीक्ष्णनखारक्तादशनारक्तादंष्ट्रिका
पतिन्नारीवानुरक्तादेवीभक्तंभजेज्जनं ॥६॥ वसुधेवविशालासासुमेरुयुगल
स्तनी ॥ दीर्घौलंवावतिस्थूलौतावतीवमनोरमौ ॥७॥ कर्कशावतिकांतौतौसर्वा
नंदपयोनिधी ॥ भक्तान्संपाययेद्देवीसर्वकामदुघौस्तनौ ॥८॥ खड्गंपात्रंवमुसलं
लांगलंवविभर्त्तिसा ॥ आख्यातारक्तवामुंडादेवीयोगेश्वरीतिव ॥९॥ अनयाव्या
प्तमखिलंजगत्स्थावरजंगमम् ॥ इमांयःपूजयेद्भक्त्यासव्याप्नोतिवराचरं ॥१०॥

अधीतेयइमंनित्यंरक्तदंत्यावपुस्तवं ॥ तंसापरिचरेद्देवीपतिंप्रियमिवांगना ॥ ११ ॥ शा
कंभरीनीलवर्णानीलोत्पलविलोचना ॥ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १२
सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥ मुष्टिंशिलीमुखापूर्णंकमलंकमलालया ॥ १३
पुष्पपल्लवमूलादिफलाढ्यंशाकसंचयं ॥ काम्यानंतरसैर्युक्तंक्षुत्तृण्मृत्युजरापहम् ॥ १४
कार्मुकंचस्फुरत्कांतिविभ्रतीपरमेश्वरी ॥ शाकंभरीशताक्षीसासैवदुर्गाप्रकीर्त्ति
ता ॥ १५ ॥ उमागौरीसतीचंडीकालिकासाचपार्वती ॥ शाकंभरीस्तुवंध्यायञ्जप

संप्तजपन्ति मन्त्र ॥१६॥ अकृपानस्तु ते शीघ्र मन्त्रपानरसावङ्गनू ॥ भीमापि नीलवर्णा
साट्टाट्टहशांभास्वरा ॥१७॥ विशाललोचना नारी पीनोन्नतपयोधरा ॥ चंद्रहासचं
डमरुं शिरः पात्रं च बिभ्रती ॥१८॥ एकवीरा कालरात्रिः सैवोक्ता कामदाक्षता ॥ तेजो
मंडलदुर्द्धर्षा भ्रामरी चित्रकांतिधृक् ॥१९॥ चित्रानुलेपना देवी चित्राभरणभूषिता ॥
चित्रस्त्रमरपाणिः सा महामारी निगीयते ॥२०॥ इति ते मूर्त्तयो देव्या व्याख्याता वसु
धाधिप ॥ जगन्मातुश्चंडिकायाः कीर्त्तिताः कामधेनवः ॥२१॥ इदं रहस्यं परमं न

स १ १०

वाच्यं कस्यचिद्धि या ॥ ध्यात्वा नंदित्य सप्तशती नाम मन्त्रीष्टफलदायकं ॥ ४२ ॥ इति श्री
मार्कण्डेयपुराणे मावर्णिके मन्वंतरे देवीमाहात्म्ये मूर्त्तिरहस्यं नाम षोड
शोऽध्यायः ॥ मार्कण्डेयपुराणोक्तं देवीमाहात्म्यमुत्तमम् ॥ यः पठेछृणुयद्भक्त्या
तस्य मुक्तिर्न संशयः ॥ १ ॥ अज्ञानाद्विस्मृतेर्भ्रांत्या यन्न्यूनमधिकं कृतं ॥ विपरी
तं तु तत्सर्वं क्षमस्व परमेश्वरि ॥ २ ॥ यदक्षरपदभ्रष्टं स्वरव्यंजनवर्जितं ॥ तत्सर्वं क्ष
म्यतां देवि प्रसीद परमेश्वरि ॥ ३ ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रि

श्र

रा

श्री गणेशाय

यादिषु

यदक्षरा बिंदु बिंदुहितं यघपदं द्वैवर्ण्णादिहीनं भक्त्याभक्त्यानुपूर्व्यं प्रभवकृतिवशात् [illegible]
पत्र कृमं वा ॥ ८ सोहादज्ञानतो वा पठितमपठितं नं संप्रतं नं [illegible] सर्वमेतत्क्षमस्व [illegible]

२ न्यूनसंपूर्णतां यातु प्रसादात्परमेश्वरि ॥४॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं महे-
११ श्वरि ॥ यत्कृतास्ति मया देवि तस्मात्त्वं वरदा भव ॥५॥ आवाहनं च सूक्तं च त्वन्माहात्म्य-
जपं तथा ॥ विसर्जनं न जानामि सिद्धिकोऽहं क्षमस्तु मे ॥६॥ कामेश्वरी जगन्माता सच्चि-
दानंदविग्रहे ॥ गृहाणार्चामिमां सर्वां प्रसीद करुणानिधे ॥७॥ गुह्यातिगुह्यगोप्त्री त्वं गृ-
हाणास्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादात्वयि स्थिता ॥ ॐ श्रीमहाकाली- ११
महालक्ष्मीमहासरस्वतीभ्यो नमः ॥ सप्तशतीरहस्यं संपूर्णं ॥ श्रीरस्तु ॥ ॐ ॥
यत्तत्र पाठे जगदंबिके मया विसर्गबिंदुस्वरहीनमीरितं ॥ तदस्तु संपूर्णतमं प्रसादात् संकल्प
सिद्धिश्च सदैव जायतां ॥१०॥२

१-४६ ४२८५

४२२८ ~~सं. ४३~~

श्री ५ को सरकार
राष्ट्रिय संग्रह अभिलेखालय

अनुस्मृति

अ·स्मृ· श्रीगणेशाय नमः ॥ अथानुस्मृतिः ॥ ॥ भीष्म उवाच ॥ श्रुत्वा तस्मात्तु देवर्षेर्वाक्यं वाचस्पतिः
॥१॥ स्वयम् ॥ प्रोवाच भगवान्देवो नारदं जगतां पतिः ॥ १ ॥ श्रीभगवानुवाच ॥ हन्तैतत्कथयि
ष्यामि मुने दिव्यामनुस्मृतिं ॥ यामधीत्य प्रयाणेषु मद्भावायोपपद्यते ॥ २ ॥ ओंकारमादि
तः कृत्वा मामनुस्मृत्य चात्मना ॥ एकाग्रः प्रयतो भूत्वा मन्त्रमेतमुदीरयेत् ॥ ३ ॥ ॐ नमो भ
गवते वासुदेवाय ॥ अनन्तं शाश्वतं देवमव्यक्तं पुरुषोत्तमं ॥ प्रपद्ये पुण्डरीकाक्षमच्युतं प
रमेश्वरं ॥ ४ ॥ पुराणं परमं वेदमद्भुतं लोकसाक्षिणम् ॥ प्रपद्ये पुण्डरीकाक्षं देवं नाराय
हाःॐनिलिटंस्वाहा॥त्रिभिश्चरोगीभवतीज्वरभवतीपंचभिः॥जपेत्तुसप्तभिःपार्थराक्षसींतनुमाविशे
त्॥९२॥राक्षसेनाभिभूतस्यविकारंशृणुपांडव॥गायतेनृत्यतेनग्नआस्फोटयतिधावति॥९३॥शिवा
रुतंचकुरुतेहसतेक्रंदतेपुनः॥एवंसंपीड्यतेपार्थयद्यपिस्यान्महेश्वरः॥किंपुनर्मानुषःकश्चिच्छोचाचारवि
वर्ज्जितः॥पि[illegible]तस्यनसंदेहोज्वरोभवतिदारुणः॥यदावज्रगृहेतस्यकर्त्तुमिच्छेच्छुभंकरं॥तदासलिल
माहायजपेमग्नमिमंतुध्रुवं॥९५॥ॐनमोभगवतेतस्मैआदित्यायनमोनमः॥जयायजयभद्रायहरिदश्वा
यतेनमः॥९६॥दिव्यायदिव्यरूपायग्रहाणांपतयेनमः॥जापयेत्तेनमंत्रेणशुभंभवतिनान्यथा॥९७॥

ही६

५

एषधाताविधाताचबीजंक्षेत्रंपरागतिः॥एषएवप्रजानित्यंसवर्द्धयतिरस्मिभिः॥७३॥एषयज्ञस्वधास्वा
हाह्रीश्रीश्चपुरूषोत्तमः॥सर्वदेवात्मकोदेवःसूक्ष्मोव्यक्तसनातनः॥७४॥ईश्वरःसर्वभूतानांपरमेष्टिःप्र
जापतिः॥कालात्मासर्वभूतात्माविश्वात्माविश्वतोमुखः॥७५॥जन्ममृत्युजराव्याधिसंसारभयनाशनः॥
दारिद्र्यव्यसनध्वंसीश्रीमान्पातुदिवाकरः॥७६॥इत्येतैर्नामभिःपार्थआदित्यंस्तौतिनित्यशः॥प्रातरुत्था
यकौंतेयतस्यरोगभयंकुतः॥७७॥पातकान्मुच्यतेपार्थव्याधिभ्यश्चनसंशयः॥एकसंध्यांद्विसंध्यांवासर्व
पापैःप्रमुच्यते॥७८॥त्रिसंध्यंजपमानस्तुपश्येच्चपरमंपदं॥यदह्नाकुरुतेपापंतदह्नाप्रतिमुच्यते॥७९
आ५ यद्रा[illegible]कुरुतेपापंतद्रात्र्याप्रतिमुच्यते॥दद्रुस्फोटककुष्टादिमसूरूलाद्रिविचर्चिका॥८०॥येचान्येदुष्ट
रोगाश्चज्वरातिसारकादयः॥जपमानस्यनश्यंतिजीवेच्चशरदांशतं॥८१॥सप्तजन्मसरेणमरण्यदान
स्यफलंभवेत्॥असीर्षपस्यनिछायामहोरात्रंधनंजय॥८२॥पठित्विदंपठतेभक्त्यावारेभानोर्महात्मनः
प्रातस्नानेकृतेपार्थएकाग्रकृतमानसः॥८३॥आदित्यहृदयंपुण्यंसूर्यनामविभूषितं॥श्रुत्वाचनि
खिलंपार्थसर्वपापैःप्रमुच्यते॥८५॥सुवर्णचक्षुर्भवतिनचांधस्तुप्रजायते॥पुमांश्चधनसंपन्नोयाय

श्चनमस्तुभ्यंपूष्णंतस्थनमोनमः॥पार्श्वतश्चनमस्तुभ्यंनमस्तेचास्तुसर्वदा॥६१॥नमोवेदांतवेद्यायसर्वसा
क्षिनमोनमः॥नमस्तारिन्नात्रायसोमसूर्याग्निचक्षुषे॥६२॥अरुणोमाघमासेतुसूर्योवैफाल्गुनेतथा॥
चैत्रेमासेतुवेदांगोभानुर्वैशाखतापनः॥६३॥जेष्ठमासेतपेदिंद्रआषाढेतपतेरविः॥गभस्तीश्रावणेमासेय
माभाद्रपदेतथा॥६४॥इषेहीरण्यरेताश्चकार्त्तिकेचदिवाकरः॥मार्गशीर्षेतपेन्मित्रपौषेविष्णुःसनातनः
६५॥इत्येतेद्वादशादित्याकाश्यपेयाप्रकीर्त्तिताः॥उग्ररूपामहात्मानस्तपंतेविश्वरूपिणः॥६६॥धर्मार्थका
ममोक्षाणांमवस्यहेतवेनृपः॥सर्वपापहरंचैवआदित्यंसंप्रपूजयेत्॥६७॥एकधाद्वित्रिधाचैवसप्तधाचस
हस्रधा॥तपंतिविश्वरूपेणसंहरंतिसृजंतिच॥६८॥एकविष्णुःशिवश्चैवब्रह्माचैवप्रजापतिः॥महेंद्र
श्चैवकालश्चयमोवरुणएवच॥६९॥नक्षत्रग्रहताराणामधिपोविश्वतापनः॥वायुरग्निर्धनाध्यक्षःक
तुकर्त्तास्वयंप्रभुः॥७०॥एषदेवोहिदेवानांसर्वमाप्यायनेजगत्॥पश्चात्कर्त्ताहिभूतानांसंहर्त्तारक्षक
स्तथा॥७१॥एषलोकानुलोकाश्चसप्तद्वीपाश्चसागराः॥एषपातालसप्ताश्चदैत्यदानवराक्षसाः॥७२॥

उर्भानुर्द्दिविन्नमौ ॥४८॥ धुमकेतुर्म्महाकेतुः सर्वकेतुरनुत्तमः ॥ तिमिरपहःस्वांशुको चोमार्त्तण्ड एव च ॥४९॥ न
मः पूर्वाय गिरये पश्चिमायन मो नमः ॥ नमोत्तराय गिरये दक्षिणायन मो नमः ॥५०॥ नमो नमः सहस्रांशो
आदित्याय नमो नमः ॥ नमः पद्मप्रबोधाय नमस्ते द्वादशात्मने ॥५१॥ नमो विश्वप्रबोधाय नमो भ्राजिष्णु वि
ष्णवे ॥५२॥ ज्योतिषे च नमस्तुभ्यं ज्ञानार्काय नमो नमः ॥ प्रदिप्ताय प्रगल्भाय युगान्ताय नमो नमः ॥५३॥ न
मस्ते होत्रिपतये पृथिवीपतये नमः ॥ नमोंकारवषट्कार सर्वयज्ञ नमो नमः ॥ ऋग्वेदाय यजुर्वेद सामवे
द नमो नमः ॥ नमो हाटकवर्णाय भास्कराय नमो नमः ॥५५॥ जयाय जयभद्राय हरिदश्वाय ते नमः ॥ दिव्या
य दिव्यरूपाय ग्रहाणां पतये नमः ॥५६॥ नमस्ते शुचये नित्यं सर्वं कुसंकुलात्मने ॥ नमः कैवल्यनाथाय न
मस्ते दिव्यचक्षुषे ॥५७॥ त्वं ज्योतिस्त्वं द्युतिर्ब्रह्मा त्वं विष्णुस्त्वं प्रजापतिः ॥ त्वमेव रुद्रो रुद्रात्मा वायुरग्नि
स्त्वमेव च ॥५८॥ योजनानां सहस्रे द्वे द्वे शते द्वे च योजने ॥ एकेन निमिषार्द्धेन क्रममाण नमोस्तु ते ॥५९
नवती योजनानां च सहस्राणि च सप्तती ॥ यावत् घटिकमात्रेण तावच्चरति भास्करः ॥६०॥ अग्रजन्म

मादित्यं उत्तमतेजसं ॥ आदित्यंसविता सूर्यः खगः पूषा गभस्तिमान् ॥३६॥ सुवर्णः स्फटिको भानुः स्फुरितो
विश्वतापनः ॥ हिरण्यगर्भस्त्रिशिरास्तपनो भास्करो रविः ॥३७॥ मार्त्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रताप
वान् ॥ तमिस्रहा भगो हंसो नासत्यश्च तमोनुदः ॥३८॥ शुद्धो विरोचनः केशी सहस्रांशुर्महाप्रभुः ॥ विव
स्वान्पूषणो मृत्युर्मिहिरो जामदग्न्यजित् ॥३९॥ घर्मरश्मिः पतंगश्च शरण्यो विघ्नहा तपाः ॥ दुर्विज्ञेयगतिः
शूरस्तेजोराशिर्महायशाः ॥४०॥ शंभुश्चित्रांगदः सौम्यो हव्यकव्यप्रदायकः ॥ अंशुमानुत्तमो देवः ऋग्य
जुःसामएव च ॥४१॥ हरिदश्वस्तमोरिश्च सप्तसप्तिर्मरीचिमान् ॥ अग्निगर्भोऽदितेः पुत्रः शंभुस्तिमिरनाश
नः ॥४२॥ पूषा विश्वंभरो मित्रः सुवर्णः सुप्रतापकः ॥ आतापी मण्डली भास्वांस्तपनो विश्वतापनः ॥४३॥ कृत
विश्वो महातेजाः सर्वरत्नमयोद्भवः ॥ अक्षरश्चाक्षरश्चैव प्रभाकर दिवाकरौ ॥४४॥ चद्रश्च अंगहंसोम्यो ह
व्यकव्यफलप्रदः ॥ अंगारको गदो ग[illegible]त्तो गस्वांगवर्द्धनः ॥४५॥ शुक्रो बुध्यासनोत्त द्विजं ध्यात्मा बुद्धिवर्द्ध
नः ॥ बृहद्बृहस्पतिर्बृहज्जासो बृहद्ब्रह्मा बृहस्पतिः ॥४६॥ अल्कश्च अल्करेनाश्च शुक्लोग श्लोकभूः शुभः ॥ मनिमानस्म
नः ॥ बृहद्बृहज्जासो —

सेद्वेसंरुद्रमूर्द्धेतुविन्यसेत्॥२४॥जान्वोस्तुगोपतिंन्यस्यसवितारंतुजंघयोः॥पादयोश्चविवस्वंतंगुल्फ
योश्चदिवाकरं॥२५॥बाह्यतस्तुतमोध्वंसंभगमभ्यंतरेन्यसेत्॥सर्वांगेषुसहस्रांशुंदिग्विदिक्षुभयंन्य
सेत्॥२६॥एषआदित्यविन्यासोदेवानामपिदुर्लभः॥इमंभक्त्यान्यसेत्पार्थसयातिपरमांगतिं॥२७॥का
मक्रोधभवात्पार्थमुच्यतेनात्रसंशयः॥सर्पादपिभयंनैवसंग्रामेषुपथिष्वपि॥२८॥रिपुसंघट्टकालेषु
तथावैरसमागमे॥त्रिसंध्यंजपतोन्यासंमहापातकनाशनं॥२९॥विस्फोटकसमुत्पन्नंतीव्रज्वरसमुद्भ
वं॥शिरोरोगंनेत्ररोगंसर्वव्याधिविनाशनं॥३०॥कुष्टव्याधिंतथादद्रुरोगाश्चविविधास्तथा॥जपतस्त
स्यनश्यंतिभक्त्याशृणुतदर्जुन॥३१॥आदित्यमंत्रसंयुक्तंआदित्यभुवनेश्वरः॥आदित्यान्नापरोदेवआ
दित्यपरमेश्वरः॥३२॥आदित्यमर्चयेद्रुलाआदित्यमर्चयेच्छिवः॥यदादित्यगतंतेजोममतेजस्तदर्जुनः
३३॥त्रिसंध्यमर्चयेत्सूर्यंस्मरेद्भक्त्यातुयोनरः॥नसपश्यतिदारिद्र्यंजन्मजन्मनिचार्जुन॥३४॥एतत्ते
कथितंपार्थआदित्यहृदयंमया॥यश्रुत्वामुच्यतेपापैःसूर्यलोकंसगच्छति॥३५॥ॐनमोभगवतेतुभ्य

थमावरणं॥ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः॥इतिद्वितीयावरणं॥ब्राम्हिमाहेश्वरीचैवकौमारीवैस्नवितथा॥वारा
हिचतथेन्द्राणिचामुण्डासप्तमातरः॥१७॥इतितृतीयावरणं॥आदित्यसोमोभौमश्चबुधोगुरुर्भृगुस्त
था॥शनैश्चरश्चराहुश्चकेतुश्चैवनतःपरं॥इतिचतुर्थावरणं॥इन्द्रोवह्निर्यमश्चैवनिरृतिर्वरुणस्तथा
वायुकुवेरईशाणश्चब्रह्मानन्तोस्त्रएवच॥१८॥इतिपंचमावरणं॥सर्वज्ञःसर्वसर्गकारणाधिदेवतासर्वेश्वरः
सर्वहृदयंनमामिसर्वसाक्षिकं॥२१॥इतिप्रार्थनं॥नमोनमस्तेस्तुजयेयविभावसोसर्वात्मनेसप्तसहाप
भाविने॥अनन्तशक्तिमणिभूषणादि ददस्वशक्तिंममभक्तिमव्ययं॥२३॥ॐअर्कन्तुमूर्ध्निविन्यस्य
ललाटेतुरविंन्यसेत्॥२०॥विन्यसेन्नेत्रयोःसूर्यंकर्णयोश्चदिवाकरः॥२१॥नासिकायांन्यसेद्भानुंमु
खेवैभास्करंन्यसेत्॥पर्जन्यमोष्ठयोश्चैवतीक्ष्णांजिह्वान्तरंन्यसेत्॥२२॥वरुणंदक्षिणेहस्तेत्वष्टा
रंवामनकरे॥[illegible]ष्णकरःपातुहृदयंपातुभानुमान्॥२३॥सुवर्णरेतसंकंठेस्कंधयोस्तिग्मतेजसं॥
वाहून्तुपूषणंचैवमित्रंवैपृष्ठतोन्यसेत्॥२३॥उदरेतुभगंविद्यादादित्यंनाभिमण्डले॥कट्यांतुविन्य

सर्वज्ञः ५

२

घृणिंनिवीजं ॐ नमो आदित्यायेति किल्कं मम सकलाभिष्टफलप्राप्त्यर्थे जपे विनियोगः॥ ॐ अस्य आदित्य
मंत्रस्य ब्रह्मा ऋषिः त्रिजगतिछंदः सूर्यो भुवनेश्वरो देवता प्रणवो बीजं ह्रीं शक्तिः श्रीसूर्यनारायणमंत्र
षडंगन्यासे जपे विनियोगः॥ ॐ ह्रां अंगुष्ठाभ्यां नमः॥ ॐ ह्रीं तर्जनीभ्यां नमः॥ ॐ ह्रूं मध्यमाभ्यां नमः॥ ॐ ह्रैं अ
नामिकाभ्यां नमः॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः॥ ॐ ह्रां हृदयाय नमः॥ ॐ ह्रीं शि
रसे स्वाहा॥ ॐ ह्रूं शिखायै वौषट्॥ ॐ ह्रैं कवचाय हुं॥ ॐ ह्रौं नेत्रत्रयाय वौषट्॥ ॐ ह्रः अस्त्राय फट्॥ अ
थ ध्यानं॥ ॥भास्वद्रत्नाढ्यमौलिस्फुरदधररुचा रंजिताचारुकेशा भास्वंतो दिव्यतेजाः करकमलयुतो भास्व
श्वाका ५ राभिः प्रभाभिः॥ विश्वाविकाशोग्रहगणनिविडो घरेभाति पूर्वाचले यो भातिर्भृंगं तुंगमन्तुभुवनजगत्पातु सूर्य
प्रधर्वः॥१३॥ पूर्वमष्टदलं पद्मं प्रणवादि प्रतिष्ठितं॥ मायाविजं दलाग्रे तु यंत्रमुद्धारयेदिति॥१४॥ आदि
त्यं भास्करं भानुं रविं सूर्यं दिवाकरं॥ मार्तंडं तपनं चेति दलेष्वष्टसु योजयेत्॥१५॥ दीप्ता सूक्ष्मा जया भ
द्रा विभूति विमला तथा॥ अमोघा विद्युता चेति मध्ये श्रीसर्वतोमुखी॥१६॥ ॐ रां रीं रूं रैं रौं रः॥ इति प्र

श्रीगणेशायनमः॥ ॥अर्ज्जुनउवाच॥ ॥ज्ञानंचधर्मशास्त्राणांगुह्याद्गुह्यतरंतथा॥मयाश्रुतंत्वयरिज्ञातंवा
ङ्मयेसचराचरं॥१॥सूर्यस्तुतिमयंन्यासंवक्तुमर्हसिमाधव॥भक्त्यापृच्छामिदेवेशकथयस्वप्रसादतः॥२॥सूर्यभ
क्तिंकरिष्यामिकथंसूर्यंप्रपूजयेत्॥तदहंश्रोतुमिच्छामित्वत्प्रसादेनमाधव॥३॥श्रीभगवानुवाच॥रुद्रादिअमरैः
सर्वैःपृष्टेनकथितंमया॥तदहंकर्मविन्यासंशृणुपांडवयत्नतः॥४॥अस्माकंय त्त्वयापृष्टमेकचित्तोभवार्जुन॥तद
हंसंप्रवक्ष्यामिआदित्यध्यासमानकं॥५॥अर्ज्जुनउवाच॥नारायणसुरश्रेष्ठपृच्छांत्वांमहामतः॥कथमादित्यमुद्यंत मि५
मुपतिष्ठेत्सनातन॥६॥श्रीभगवानुवाच॥साधुपार्थमहाबाहोबुद्धिमानसिपांडव॥यन्मांपृच्छस्युपस्थानंतत्पवि
त्रंविभावसोः॥७॥सर्वमंगलमांगल्यंसर्वपापप्रणाशनं॥सर्वरोगप्रशमनमायुर्वर्द्धनमुत्तमं॥८॥अमित्रदमनंपा
र्थसंग्रामेजयवर्द्धनं॥वर्धनंधनपुत्राणामादित्यहृदयंशृणु॥९॥यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥त्रिषु
लोकेषुविख्यातंनिःश्रेयसकरंपरं॥१०॥देवदेवंनमस्कृत्यप्रातरुत्थायचार्जुन॥विघ्नान्यनेकरूपाणिनश्यंति
स्मरणादपि॥११॥तस्मात्सर्वप्रयत्नेनसूर्यमाराधयेत्सदा॥आदित्यहृदयंनित्यंजाप्यंतच्छृणुपांडवः॥१२॥ॐ १
अस्यश्रीआदित्यहृदयस्तोत्रमंत्रस्यश्रीकृष्णऋषिःश्रीसूर्यनारायणोदेवता अनुष्टुप्छंदः हरितहयरथंदिवाकरं

४२४३

नं. [illegible]

श्रादिसंहृदय

४२४०

~~नं ५१~~

विष्णु सहस्रनाम

श्रीगणेशाय नमः॥ यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्॥ विमुच्यते नमस्त
स्मै विष्णवे प्रभविष्णवे॥१॥ वैशंपायन उवाच॥ श्रुत्वा धर्म्मानशेषेण पावनानि
च सर्वशः॥ युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत॥२॥ युधिष्ठिर उवाच॥ कि
मेकं दैवतं लोके किंवाप्येकं परायणं॥ स्तुवंतः कं कमर्चंतः प्राप्नुयुर्मानवाः शुभं ३
॥ को धर्मः सर्वधर्म्माणां धर्मोधिकतमो मतः॥ किं जपन्मुच्यते जन्तुर्जन्मसंसार
बंधनात्॥४॥ भीष्म उवाच॥ जगत्प्रभुं देवदेवमनंतं पुरुषोत्तमम्॥ स्तुवन्नाम
सहस्रेण पुरुषः सततोत्थितः॥५॥ तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्॥
उत्पत्त्यादिपुरुषः =१= पालकः = परमात्मानं

आद्यं स्तुवन्नमस्यंश्च यजमानस्तमेव वा ॥६॥ अनादिनिधनं विष्णुं सर्वलोकमहे-
श्वरम् ॥ लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥७॥ ब्रह्मण्यं सर्वधर्मज्ञं
लोकानां कीर्तिवर्द्धनम् ॥ लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥८॥ एष मे
सर्वधर्माणां धर्मोधिकतमो मतः ॥ यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा
॥९॥ परमं यो महद्ब्रह्म परमं यः परायणम् ॥ पवित्राणां पवित्रं यो मंगलानां
च मंगलं ॥१०॥ दैवतं देवतानां च भूतानां योव्ययः पिता ॥ यतः सर्वाणि भूता-
नि भवंत्यादियुगागमे ॥११॥ यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ तस्य
लोकप्रधानस्य जगन्नाथस्य भूपते ॥१२॥ विष्णोर्नामसहस्रं मे शृणु पापभ-

=परमं यो महत्तेजः परमं यो महत्तपः ॥९=

पापहं ॥ यानि नामानि गौणानि विख्यातानि महात्मनः ॥१३॥ ऋषिभिः परिगीता
नि तानि वक्ष्यामि भूतये ॥ ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ॥ छन्दोनु
ष्टुप् तथा देवो भगवान्देवकीसुतः ॥१४॥ ध्यानं ॥ शान्ताकारं भुजगशयनं पद्म
नाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ॥ लक्ष्मीकान्तं कम
लनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं विश्ववंद्यं मुकुन्दम्
॥ ॥ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो
भूतात्मा भूतभावनः ॥१७॥ पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥१८॥ योगो योगविदां नेता प्रधा

नपुरुषेश्वरः॥नारसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः॥१९॥सर्वःशर्वःशिवः
स्थाणुर्भूतादिर्निधिरव्ययः॥संभवोभावनोभर्त्ताप्रभवःप्रभुरीश्वरः॥२०॥स्व
यंभूःशंभुरादित्यःपुष्कराक्षोमहास्वनः॥अनादिनिधनोधाताविधाताधा
तुरुत्तमः॥२१॥अप्रमेयोहृषीकेशःपद्मनाभोऽमरप्रभुः॥विश्वकर्मामनु
स्त्वष्टास्थविष्ठःस्थविरोध्रुवः॥२२॥अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रत
र्दनः॥प्रभूतस्त्रीककुब्धामपवित्रंमंगलंपरम्॥२३॥ईशानःप्राणदःप्राणो
ज्येष्ठःश्रेष्ठःप्रजापतिः॥हिरण्यगर्भोभूगर्भोमाधवोमधुसूदनः॥२४॥ईश्वरो
विक्रमीधन्वीमेधावीविक्रमःक्रमः॥अनुत्तमोदुराधर्षःकृतज्ञःकृतिरात्म

वि.स.
२

वान॥२५॥ सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः॥ अहः संवत्सरो व्यालः प्रत्ययः स
र्वदर्शनः॥२६॥ अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः॥ वृषाकपिरमेयात्मा
सर्वलोकविनिसृतः॥२७॥ वसुर्वसुमनाः सत्यः समात्मा संमितः समः॥ अमोघः
पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥२८॥ रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शु
चिश्रवाः॥ अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः॥[illegible]॥ सर्वगः स
र्वविद्भानुर्विष्वक्सेनो जनार्द्दनः॥ वेदो वेदविदव्यंगो वेदाङ्गो वेदवित्क
विः॥३०॥ लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः॥ चतुरात्मा चतुर्व्यू
हश्चतुर्दंष्ट्रश्चतुर्भुजः॥३१॥ भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः॥
[illegible]

रामः
२

अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥२२॥ उपेंद्रो वामनः प्रांशुरमोघः शुचि
रूर्जितः ॥ अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥२३॥ वेद्यो वैद्यः सदायोगी
वीरहा माधवो मधुः ॥ अतीन्द्रियो महामायो महोत्साहो महाबलः ॥२४॥ महा
बुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुः श्रीमानमेयात्मा म
हाद्रिधृक् ॥२५॥ महेष्वासो महीभर्त्ता श्रीनिवासः सतांगतिः ॥ अनिरु
द्धः सुरानन्दो गोविन्दो गोविदांपतिः ॥२६॥ मरीचिर्दमनो हंसः सुपर्णो
भुजगोत्तमः ॥ हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥२७॥ अमृत्युः
सर्वदृक् सिंहः संधाता संधिमान्स्थिरः ॥ अजो दुर्मर्षणः शास्ता विश्रुता

त्मा सुरारिहा ॥३८॥ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ॥ निमीषोनिमिषः
स्रग्वी वाचस्पतिरुदारधीः ॥३९॥ अग्रणी ~~ग्रा~~ ग्रामणीः श्रीमान्न्यायो नेता समी
रणः ॥ सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥४०॥ आवर्त्तनो निवृत्ता
त्मा संवृतः संप्रमर्द्दनः ॥ अहः संवर्त्तको वह्निरनिलो धरणीधरः ॥४१॥ सुप्र
सादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्त्ता सत्कृतः साधुर्जह्नुर्ना
रायणो नरः ॥४२॥ असंख्येयोप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ॥ सि
द्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥४३॥ वृषाही वृषभो विष्णुर्वृषप
र्वा वृषोदरः ॥ वर्द्धनो वर्द्धमानश्च विविक्तः श्रुतिसागरः ॥४४॥ सुभुजो दुर्द्धरो
वाग्मी महेन्द्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥४५॥

×अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥५०॥
×स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ॥ वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥५१॥ ×६×

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धस्पष्टाक्षरो मंत्रश्चन्द्रांशुर्भास्करद्युतिः ॥४५॥ अमृतांश्वद्भवो भानुः शशबिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥४६॥ भूतभव्यभवन्नाथः पवनः पावनोनलः ॥ कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥४७॥ युगादिकृद्युगावर्त्तो नैकमायो महाशनः ॥ अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् ॥४८॥ इष्टोविशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः ॥ क्रोधहा क्रोधकृत्कर्त्ता विश्वबाहुर्महीधरः ॥४९॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अनुकूलः शतावर्त्तः पद्मी पद्मनिभेक्षणः ॥५२॥ पद्मनाभोरविंदाक्षः पद्मगर्भः शरीरभृत् ॥ महर्द्धिरृद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥५३॥ अतुलः शरभो भीमः समयज्ञो हविर्हरिः ॥ सर्वलक्ष

वि॰स॰
५

णलक्षणो लक्ष्मीवान्समितिंजयः ॥५४॥ विक्षरो रोहितो मार्गो हेतुर्दामोदरः स
ह ॥ महीधरो महाभागो वेगवानमिताशनः ॥५५॥ उद्भवः क्षोभणो देवः श्रीग
र्भः परमेश्वरः ॥ करणं कारणं कर्त्ता विकर्त्ता गहनो गहः ॥५६॥ व्यवसायो व्य
वस्थानः संस्थानः स्थानदो ध्रुवः ॥ परर्द्धिः परमः स्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥५७
रामो विरामो विरजो मार्गो नेयो नयो नयः ॥ वीरः शक्तिमतां श्रेष्ठो धर्मो धर्म
विदुत्तमः ॥५८॥ वैकुण्ठः पुरुषः प्राणः प्राणः प्रणवः पृथुः ॥ हिरण्यगर्भः श
त्रुघ्नो व्याप्तो वायुरधोक्षजः ॥५९॥ ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥६०॥ विस्तारः स्थावरः स्थाणुः

राम:
५

प्रमाणंबीजमव्ययं॥ अर्थोऽनर्थोमहाकोशोमहाभोगोमहाधनः॥८६॥अनिर्विण्णः
स्थविष्ठोभूर्धर्मयूपो[illegible]महामखः॥नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः॥८
॥यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः॥सर्वदर्शीविमुक्तात्मा·सर्वज्ञोज्ञानमुत्त
मम॥८८॥सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत॥मनोहरोजितक्रोधोवीरबा
हुर्विदारणः॥८९॥स्वापनःस्ववशोव्यापीनैकात्मानैककर्मकृत॥वत्सरोवत्सलो
वत्सीरत्नगर्भोधनेश्वरः॥९०॥धर्मगुप्धर्मकृद्धर्मीसदसत्क्षरमक्षरम॥अवि
ज्ञातासहस्रांशुर्विधाताकृतलक्षणः॥९१॥गभस्तिनेमिःसत्वस्थःसिंहोभूतम
हेश्वरः॥आदिदेवोमहादेवोदेवेशोदेवभृद्गुरुः॥९२॥उत्तरोगोपतिर्गोप्ताज्ञान

वि०स गम्यः पुरातनः ॥ शरीरभूतभृद्भोक्ता कपींद्रो भूरिदक्षिणः ॥ ८७ ॥ सोमपोमृतपः सोमः
९ पुरुजित्पुरुसत्तमः ॥ विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः ॥ ८८ ॥ जीवो वि
नयिता साक्षी मुकुंदोमितविक्रमः ॥ अंभोनिधिरनंतात्मा महोदधिशयोन्तकः ॥
८९ ॥ अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ॥ आनंदो नंदनो नंदः सत्यधर्मा
त्रिविक्रमः ॥ ९० ॥ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रिदशा
ध्यक्षो महाशृंगः कृतांतकृत् ॥ ९१ ॥ महावराहो गोविंदः सुषेणः कनकांगदी ॥
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ९२ ॥ वेधाः स्वांगोजितः कृष्णो दृढः संकर्ष
णोच्युतः ॥ वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ९३ ॥ भगवान्भगहानंदनः
वनमाली हलायुधः ॥ आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ९४ ॥ सु(९

धन्वा खंडपरशुर्दारुणो द्रविणःप्रदः॥ दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः॥७५॥ त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्॥ संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्॥७६॥ शुभांगः शान्तिदः स्रष्टा कुमुदः कुवलेशयः॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥७७॥ अनिवर्त्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः॥ श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः॥७८॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः॥ श्रीधरः श्रीकरः श्रेयः श्रीमांल्लोकत्रयाश्रयः॥७९॥ स्वक्षः स्वंगः शतानन्दो नंदिर्ज्योतिर्गणेश्वरः॥ विजितात्मा विधेयात्मा सत्कीर्त्तिश्छिन्नसंशयः॥८०॥ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः॥ भूशयो भूषणो भूतिर्विशोकः शोकनाशनः॥८१॥ अर्चिष्मानर्चि

घः कुंभो विशुद्धात्मा विशोधनः ॥ अनिरुद्धोप्रतिरथः प्रद्युम्नोमितविक्रमः ॥ ८२ ॥
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ॥ त्रिलोकात्मा त्रिलोकेशः केशवः के
शिहा हरिः ॥ ८३ ॥ कामदेवः कामपालः कामी कांतः कृतागमः ॥ अनिर्द्देश्यवपु
र्विष्णुर्वीरोनंतो धनंजयः ॥ ८४ ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ॥ ब्र
ह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८५ ॥ महाक्रमो महाकर्मा महाते
जो महोरगः ॥ महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ८६ ॥ स्तव्यस्तवप्रिय
स्तोत्रं स्तुति स्तोता रणप्रियः ॥ पूर्णः पूरयिता पुण्यः पुण्यकीर्त्तिरनामयः ॥ ८७ ॥ रामः
मनोजवोतीर्थकरो वसुरेता वसुप्रदः ॥ वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८८

सद्गतिःसत्कृतिःसत्तासद्भूतिःसत्परायणः॥शूरसेनोयदुश्रेष्ठःसन्निवासःसु
यामुनः॥८१॥भूतावासोवासुदेवःसर्वासुनिलयोनलः॥दर्प्पहादर्प्पदोदृ
दृ प्तोदुर्द्धरोथापराजितः॥८२॥विश्वमूर्त्तिर्महामूर्त्तिर्दीप्तमूर्त्तिरमूर्त्तिमान्॥
अनेकमूर्त्तिरव्यक्तःशतमूर्त्तिःशताननः॥८३॥एकोनैकःसवःकःकिंय
त्तत्पदमनुत्तमम्॥लोकबंधुर्लोकनाथोमाधवोभक्तवत्सलः॥८४॥सुव
वर्णो वर्णोविन्दुर्हेमांगोवराङ्गश्चन्दनांगदी॥वीरहाविषमःशून्योघृताशीरच
लश्चलः॥८५॥अमानीमानदोमान्योलोकस्वामीत्रिलोकधृक्॥सुमेधा
मेधजोधन्यःसत्यमेधाधराधरः॥८६॥तेजोवृषोद्युतिधरःसर्वशस्त्रभृतांव

वि.स. रः॥प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः॥२५॥चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यू
८ हश्चतुर्गतिः॥चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥२६॥समावर्त्तोनि
वृत्तात्मा दुर्जयो दुरतिक्रमः॥दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥२७॥
शुभांगो लोकसारंगः सुतंतुस्तंतुवर्द्धनः॥इन्द्रकर्मा महाकर्मा कृतकर्मा
कृतागमः॥२८॥उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः॥अर्को वाजसनः
शृंगो जयंतः सर्वविज्जयी॥२९॥सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः॥
महाह्रदो महागर्त्तो महाभूतो महानिधिः॥३०॥कुमुदः कुंदरः कुंदः पर्जन्यः प रा.मः
वनोनिलः॥अमृतांशोमृतवपुः सर्वज्ञः सर्वतोमुखः॥३१॥सुलभः सुव्रतः ८

श्री१

सिद्धः शत्रुजित्शत्रुतापनः ॥ न्यग्रोधोदुम्बरोश्वत्थश्चाणूरान्ध्रनिषूदनः ॥१०२॥ सहस्रार्चिः
सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥ अमूर्त्तिरनघोचिन्त्यो भयकृद्भयनाशनः ॥१०३॥ अ
णुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशो
वंशवर्द्धनः ॥१०४॥ भारभृत्कथितो योगी योगीशः सर्वकामदः ॥ आश्रमः श्र
मणः क्षामः सुपर्णो वायुवाहनः ॥१०५॥ धनुर्धरो धनुर्वेदो दण्डो दमयिता द
मः ॥ अपराजितः सर्वसहो नियन्ता नियमो यमः ॥१०६॥ सत्ववान्सात्विकः स
त्यः सत्यधर्मपरायणः ॥ अभिप्रायः प्रियार्होर्हः प्रियकृत्प्रीतिवर्धनः ॥१०७॥ वि
हायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनः सूर्यः सविता रविलो
चनः ॥१०८॥ अनन्तो हुतभुग्भोक्ता सुखदो नैकजोग्रजः ॥ अनिर्विण्णः सदामर्षी

लोकाधिष्ठानमद्भुतः ॥१०९॥ सनात्सनातनतमः कपिलः कपिरव्ययः ॥ स्वस्तिदः स्वस्ति
कृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षिणः ॥११०॥ अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशा-
सनः ॥ शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥१११॥ अक्रूरः पेशलो दक्षो दक्षि ॥११२॥
णः क्षमिणां वरः ॥ विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ उत्तारणो दुष्कृति
हा पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः संतो जीवनः पर्य्यवस्थितः ॥११३॥ अ
नंतरूपोनंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रो गभीरात्मा विदिशो व्यादिशो दि
शः ॥११४॥ अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मा
दिर्भीमो भीमपराक्रमः ॥११५ आधारनिलयो धाता पुष्पहासः प्रजागरः ॥ ऊ
र्द्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥११६॥ प्रमाणं प्राणनिलयः प्राण

भृत्प्राणजीवनः॥ तत्वंतत्वविदेकात्मा जन्ममृत्युजरातिगः॥११७॥ भूर्भुवःस्वस्तरुस्तारःस
विताप्रपितामहः॥ यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः॥११८ यज्ञकृद्यज्ञभृद्यज्ञी यज्ञ
भुक्यज्ञसाधनः॥ यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च॥११९॥ आत्मयोनिः स्वयं
जातो वैखानः सामगायनः॥ देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः॥१२०
॥ शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः॥ रथांगपाणिरक्षोभ्यः सर्वप्रह
रणायुधः॥१२१॥ ॐ नमः॥ इतीदं कीर्त्तनीयस्य केशवस्य महात्मनः॥ नाम्नांस
हस्रं दिव्यानामशेषेण प्रकीर्त्तितम्॥१२२॥ य इदं शृणुयान्नित्यं यश्चापि प
रिकीर्त्तयेत्॥ नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः॥१२३॥ वेदांतगो
ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्॥ वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवा

विन· प्नुयात् ।।११७।। धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।। कामानवाप्नुयात्कामी
१० प्रजार्थी चाप्नुयात्प्रजाम् ।।११८।। भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।।
सहस्रं वासुदेवस्य· नाम्नामेतत्प्रकीर्त्तयेत् ।।११९।। यशः प्राप्नोति विपुलं ज्ञातिप्राधा
न्य·मेव च ।। अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् । न भयं क्वचिदाप्नोति
वीर्यं तेजश्च विंदति ।। भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ।।१२१।। रोगार्त्तो
मुच्यते रोगाद्बद्धो मुच्येत बंधनात् । भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ।।
१२२ ।। दुर्गाण्यतितरत्याशुः पुरुषः पुरुषोत्तमम् ।। स्तुवन्नामसहस्रेण नित्यं भक्ति रामः
समन्वितः ।।१२३।। वासुदेवाश्रयो मर्त्त्यो वासुदेवपरायणः ।। सर्वपापविशुद्धा १०

त्मा याति ब्रह्मसनातनम्॥११४॥न वासुदेवभक्तानामशुभंविद्यते क्वचित्।जन्ममृत्युज
राव्याधिभयंनैवोपजायते॥११५॥इमंस्तवमधीयानः श्रद्धाभक्तिसमन्वितः॥युज्ये
तात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः॥११६॥नक्रोधोनचमात्सर्यंनलो
भोनाशुभामतिः॥भवन्तिकृतपुण्यानांभक्तानांपुरुषोत्तमे॥११७॥द्यौःसचन्द्रार्कनक्ष
त्रंखंदिशोभूर्महोदधिः॥वासुदेवस्यवीर्येणविधृतानिमहात्मनः॥११८॥स
सुरासुरगंधर्वंसयक्षोरगराक्षसम्॥जगद्वशेवर्त्ततेदंकृष्णस्यसचराचरं॥११९
इन्द्रियाणिमनोबुद्धिःसत्वंतेजोबलंधृतिः॥वासुदेवात्मकान्याहुःक्षेत्रंक्षेत्र
ज्ञएवच॥१२०॥सर्वागमानामाचारःप्रथमंपरिकल्पते॥आचारप्रभवोधर्मोध

वि॰स॰
११

र्मस्य प्रभुरच्युतः॥१२१ ऋषयः पितरो देवा महाभूतानि धातवः॥ जंगमाजंगमं
चेदं जगन्नारायणोद्भवम्॥१२२ योगो ज्ञानं तथा सांख्यं विद्या शिल्पादि कर्म
च॥१२३॥ वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥१२४॥ एको विष्णुर्म
हद्भूतं पृथग्भूतान्यनेकशः॥ त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः।
१२४॥ इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितं॥ पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं
सुखानि च॥१२५॥ विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम्॥ भजंति ये पुष्कराक्षं
न ते यांति पराभवम्॥१२६ न ते यांति पराभवमिति॥ ॥इति श्रीमहाभारते
दानपर्वणि श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं संपूर्णं शुभमस्तु॥१७६५॥ ॥

रामः
११

४२४१

ॐ फ्रं स्वं स्वं

कमलनयनधारी दैत्यसंहारकारी गिरि [illegible] करधारी हैं तेया तु स्मर [illegible] जनक
हृदयमोदी गोजकन्या विनोदी त्रयनिमध्य रहस्सी देव की अर्मवासी

ॐ क्रीं हुं उं क्रीं

नं· ४१ ताराकुल स्तोत्रादि

ग्रंथी [illegible]

ता·स·
१

ॐ श्रीमहागणपतये नमः ॥ कैलासशिखरासीनं देवदे
वं महेश्वरं ॥ भवानी रहसि प्रीत्या पृच्छए ह्वं न्महेश्वरं ॥ १ ॥
देव्युवाच ॥ कथमीशान सर्वज्ञ लभंते सिद्धिमुत्तमां ॥ सा
धकाः सर्वदा येन तन्मे कथययद्गुप्रभो ॥ २ ॥ ईश्वर उवाच ॥
विना पूजां विना ध्यानं विना जापं विना बलिं ॥ लभते येन
कल्याणि तन्मे निगदतः शृणु ॥ ३ ॥ नाम्नां सहस्रं तारायाः
कथयीख्याम्यशेषतः ॥ शृणु देवि सदा भक्त्या भक्तानां प
रमं हितं ॥ ४ ॥ विना पूजोपचारेणा विना जापेन यत्फलं ॥
तत्फलं सकलं देवि कथयीव्यामि ते शृणु ॥ ५ ॥ ॐ अस्य

श्री
१

श्रीतारादेव्या भक्तिफलसर्वस्वनामःस्तोत्रस्य ॥ अक्षोभ्यऋषिः
वृहतीछंदः श्रीतारा एकजटा नीलसरस्वती देवता हूं बीजं फट्
शक्तिः ह्रीं कीलकं सर्वकामार्थसिध्यर्थे जपे विनियोगः ॥ ॐ ता
र रात्रिर्महारात्रिः कालरात्रिः कपालिनी ॥ कालिका कामदा
मायामहामायामहोत्सवा ॥१॥ महादानरता यज्ञा यज्ञोत्स
वविभूषिता ॥ चंद्रवक्त्रा चकोराक्षी चारुनेत्रा सुलोचना ॥२॥
त्रिनेत्रा पद्मपत्राक्षी कुरंगाक्षी मनोहरा ॥ ब्राह्मी नारायणी ज्यो
त्स्ना चारुकेशी सुलोचना ॥३॥ वाराही वारुणी विद्या महाविद्या
महेश्वरी ॥ पिंगाकुंचितकेशा च महायशोस्वरूपिणी ॥४॥ गौ
री चंपकवर्णाभा क्षमांगी कुलपूजिता ॥ सर्वानंदस्वरूपा च

ता·स·
2

सर्वसंकटतारिणी ॥२०॥ नित्या नित्यमयी नेत्रा भद्रा नीलसरस्वती ॥
गायत्री सुचरित्रा च कौलव्रतपरायणा ॥२१॥ हिरण्यगर्भा भूगर्भा
विश्वगर्भा यशस्विनी ॥ हिमवत्तनया दिव्या दिव्यांवरविभूषणा ॥२२॥
जगन्माता जगद्धात्री जगतामुपकारिणी ॥ ऐन्द्री सौम्या तथा या
म्या वारुणी वायवी तथा ॥ आग्नेयी नैरृती चैव ईशानी चंडकौ
शिका ॥ सुमेरुतनया वंद्या सर्वेषामुपकारिणी ॥२४॥ ललज्जा
सरोजाक्षी मुंडस्रजविभूषणा ॥ सर्वानंदमयी सर्वा सर्वानंदस्व
रूपिणी ॥२५॥ धृतिर्मेधा तथा लक्ष्मीः श्रद्धा पन्नगधारिणी ॥ रु
क्मिणी जानकी दुर्गा सत्या सत्यवती रती ॥२६॥ कामाक्षा मोक्ष
दानंता नारसिंही सरस्वती ॥ महादेवरता चंडी चंडदोर्दंडखंडिनी ॥२७॥
दीर्घकेशी सुकेशी च पिंगकेशी महत्कचा ॥ भवानी भवपत्नी च

श्री
2

मवभीतिहराश्रुवीः॥१८॥पौरंदरी तथा विष्णोर्जाया माहेश्वरीप
रा॥सर्वेषांजननी नित्या वाग्रौगी दैत्यनाशिनी॥१९॥घोररूपा
महेशानी कामिनी वरवर्णिनी॥महाविद्या महामाया महामे
धा महोत्सवा॥२०॥विरूपा विश्वरूपा च मृडजानी मृडवल्लभा॥
महाप्रभापद्मशभीमामधुकैटभनाशिनी॥२१॥कोटिचंद्रप्रती
काशा शतसूर्य्यसमप्रभा॥जह्नुकन्या मनोज्ञा च पार्वती हरव
ल्लभा॥२२॥कामरूपा महेशानी नित्योत्साह मनस्विनी॥वैकुं
ठनाथपत्नी च तथा शंकरवल्लभा॥२३॥काश्यपी कमलाव
त्सा कंजपत्रायतेक्षणा॥माहेश्वरी वृषारूढा पूर्णेंदुसंनिभा
नना॥२४॥मासामानवती धन्या कन्या हिमगिरेःसुता॥पद
लापद्मपत्राक्षी नागयज्ञोपवीतिनी॥२५॥महाशंखधराकां

ता कमनीया नगात्मजा ॥ ब्रह्माणी वैष्णवी शंभोर्जाया गंगा जलेश्वरी ॥२६॥ भागीरथी मनोबुद्धिर्नित्या नरमयी सदा ॥ हराप्रियाक्षरिस्मृता हरपत्नी तपस्विनी ॥ महाव्याधिहरा देवी शुभा सुरानन्दिनी ॥ यशस्विनी वाङ्कली धात्री हस्ते पुस्तकधारिणी ॥२८॥ वाकेडा चपलोत्तुंगा भस्रा दैत्यानकृन्तनी ॥ शांतिर्निद्रा महानिद्रा उग्रानिद्रा वैरेणुका ॥२९॥ कौमारी कुलजा कुन्ती कौलव्रतपरायणा ॥ नवदुर्गा सदाचारा द्रौपदी द्रुपदात्मजा ॥३०॥ स्तुष्टिः सर्गाद्यकालीना निशुम्भप्राणनाशिनी ॥ पद्मिनी वसुधा पृथ्वी रोहिणी विंध्यवासिनी ॥३१॥ शिवा शवा कूर्ममहाशक्तिः शांकरीमा शिववल्लभा ॥ दैत्यप्राणहरा धात्री दैत्यानामोदरप्रिया ॥३२॥ ब्राह्मी शांतिः

क्षेमंकरी पुष्टिर्वैद्याचारपरायणा ॥ श्रीविद्या भैरवी भव्या भार
ती भयनाशिनी ॥ ३३ ॥ तामसी तारणी तीक्ष्णा तीक्ष्णा दैत्यविना
शिनी ॥ दात्री दानपरा काली दुर्गा दैत्यविनाशिनी ॥ ३४ ॥ पद्मा प
द्मवती कृष्णा पुष्टा तुष्टा तथोर्वशी ॥ वज्रिणी वज्रहस्ता च तथा
नारायणी शिवा ॥ ३५ ॥ खड्गिनी खड्गहस्ता च कर्त्री खर्परधार
णी ॥ देवांगना देवमाया देवकन्या पुलोमजा ॥ ३६ ॥ सुखिनी
सुखदात्री च सर्वसौख्यविवर्द्धिनी ॥ शीला शीलवती सूक्ष्मा
सूक्ष्माकारा वरप्रदा ॥ ३७ ॥ वैराग्या वरदा वाणी ज्ञानिनी ज्ञान
दामला ॥ उग्रकाली महाकाली भद्रकाली च दक्षिणा ॥ ३८ ॥
भगवक्षसम्भूता भार्गवी भगवल्लभा ॥ शूलिनी शूलहस्ता
च मयूरवरवाहना ॥ ३९ ॥ महामांसरता रक्ता रक्तखर्परधा

ष्टिनी॥ रत्नांबरधरा रामा स्मरती भुरनाथिका॥४०॥ परमानं
दहा ज्येष्ठा योगिनी गणसेविता॥ अवाणीं वृवती सत्या सत्यभा
मा नगात्मजा॥४१॥ सैहा सैहस्वना हंसा सैहदैत्यविनाशिनी॥
कुमारी कौशिकी विद्या कालदैत्यःविनाशिनी॥४२॥ शंभुपत्नी
शंभुरता शंभुजाया महेश्वरी॥ शिवपत्नी शिवरता शिवजाया शि
कांतथा॥४३॥ हरपत्नी हररता हरजाया वशूलिनी॥ मदनांत
ककांता वै मदनांतकवल्लभा॥४४॥ गिरिजा गिरिकन्या च गिरि
शा गिरिवल्लभा॥ भूता भव्या भवस्वरूपा पाविनी पारपालिनी॥४५॥
अव्यक्ता व्यक्तरूपा वैद्या स्वेच्छप्रवर्द्धिनी॥ अभुता गभुतमाला
प्राताहावा सर्वेश्वरी॥४६॥ अपर्णा निर्धेः स्वभुकृता धारित्री च प्रति
ष्ठिता॥ उद्भवा क्षोभिणी क्षेमा श्रीगर्भा परमेश्वरी॥४७॥ कराला

रामच

पुष्टदेहा च कात्यायनी कंजलोचना॥ शारदा पाकमूला प्रीता विमला
नंदवर्द्धिनी॥४८॥ कपर्द्दिनी कल्पलता शुभनानंदवर्द्धिनी॥ उदीराणि
ह्रषरा भव्या शुरसेना शुरेश्वरी॥४९॥ श्रीमती शिशिरानेता शि
प्रिया वल्लकन्यका॥ शुरमान्या शुरश्रेष्ठा ज्येष्ठा श्रीरोश्वरी स्थि
रा॥५०॥ तमोघ्नी ध्वांतहंत्री च प्रयतात्मा पतिव्रता॥ प्रद्योतिनी
रथारूढा सर्वलोकप्रकाशिनी॥५०॥ मेधाविनी महावीर्या हं
सी संसारतारिणी॥ प्ररातः प्राशिना मांसाशि हारिणी दैत्यनाशि
नी॥ डाकिनी शाकिनी शीला वरखड्गधारिणी॥ कौमुदीकु
मुदा कुंदा कौलिका कुलजात्मजा॥५१॥ गर्विता गुरा संपन्नान
गजा खगवाहिनी॥ वंद्यानना महोत्साह वाराह मूर्द्धज शोभिता॥५२॥
मनोज्ञा माधवी मान्या मानिनी या महद्गुणा॥ ज्येष्ठा श्रेष्ठा मघा

पुष्या ऽानस्ता पूर्वफाल्गुनी ॥५४॥ रक्तबीजारिहंत्री च रक्तबीजवि
नाशिनी ॥ चंडमुंडविहंत्री च चंडमुंडविनाशिनी ॥५५॥ कश्री हंत्री शु
कश्री च विमला मलवाहिनी ॥ निर्मलांभःस्वरी भीमा महिषासुर
घातिनी ॥५६॥ कालिंदी यमुना च्छ्राप्लुवती कालिका तथा ॥ कौ
शल्या कौमुदी माद्री हंधती वाप्यहंधती ॥५७॥ पुरारिगृहतारी
हूर्ला हूर्ला हृत्पापशमक्लिन्नी ॥ सु हूर्ली वंशवहना वालवंशसमप्र
भा ॥ पद्मा रेवती रमणी विश्वा विचित्रस्थानविभूषिता ॥ वीणावी
णावती विद्या यशोदा च यशस्विनी ॥५८॥ नवचूर्णसमुद्भूता
नवचूर्णोत्सवोत्सवा ॥ नवचूर्णजामीला माला भूषणभू
षिता ॥५९॥ नवचूर्णसमग्रीवा ॥ नवचूर्णसमुत्का ॥ नवचूर्णा
त्मिका चूर्णा चूर्णराजविभूषिता ॥६०॥ नवचूर्णगजयोपेता

नवखण्डोपशोभिता ॥ नवखण्डाधिपा सीता प्रेतमंडलमध्य-
गा ॥ ६१ ॥ कलो गा स्याप्रदीपा स्वकुलमार्गजवार्द्धिनी ॥ श्मशा-
न भैरवी काल भैरवी भैरवाप्रिया ॥ ६२ ॥ उग्रानंद भैरवी ध्यान
भैरवी उग्र भैरवी ॥ श्रीमाया भैरवी सौम्य भैरवी लोक भैर-
वी ॥ ६३ ॥ श्रीविद्या भैरवी नीति भैरवी उग्रा भैरवी ॥ संमोह
भैरवी पुष्टि भैरवी तुष्टि भैरवी ॥ ६५ ॥ इच्छा स्थिति भैरवी च
भैरवी स्थिति भैरवी ॥ षडक्षरिकान्यासगा हिता षडक्षरिकान्यव-
ध्यमा ॥ ६६ ॥ उग्रानंद सुंदरी वीर सुंदरी स्थिति सुंदरी ॥ श्रीवज्र
सुंदरी ध्यान सुंदरी उग्र सुंदरी ॥ ६७ ॥ श्रीमाया सुंदरी सौम्या
सुंदरी लोक सुंदरी ॥ श्रीविद्या सुंदरी नीति सुंदरी उग्रा सुंदरी ॥ ६८ ॥

मल्लिकाहारहसिका मल्लिकाहारशोभिता ॥ नवचंपकवर्णाभा
नागकेशरशोभिता ॥ ६९ ॥ जपाकुसुमसंकाशा जपाकुसुमशो-
भिता ॥ प्रियाप्रियंकरी विश्वा दीनवेदाविनाशिनी ॥७०॥ ज्ञानेश्व-
री ज्ञानदात्री ज्ञाना नानंदप्रदायिनी ॥७१॥ ताम्बोरवसंपन्ना ताम्बूलशी-
लसमन्विता ॥७२॥ रूपयौवनसंपन्ना रूपयौवनशोभिता ॥७३॥ ता-
म्रयाम्रावती ताम्बोरवंशुदरी ॥७४॥ लसत्तारांपातप्रख्याता-
ठककवचशोभिता ॥ हृत्कमलस्थिता देवी हृत्पद्मस्थोपरिस्थिता ॥७५॥
हृत्पद्मध्यानिलया हृत्पद्मध्याननिवासिनी ॥ कुमुद्वती कुमुद्दनी
कुमुदाकरशोभिता ॥७६॥ कौसुंभवस्त्रहाराढ्या कौसुंभाहृता मस्त-
का ॥ स्वयंभूकुसुमराशिका मग्ना ध्यानवतीसहा ॥७७॥ शुक्रप्रिया श्री

स्वयंभुकुसुमसैका ॥२॥ स्वयंभुकुसुमप्रियारिणी

शुक्लरक्ता शुक्लसंज्ञा नतत्परा ॥ हर्षा वर्षा सुपर्वा च निष्पर्वा पापनाशिनी ॥१६॥ मध्यमा मोहसंपन्ना मध्यमा मोदधारिणी ॥ सर्वाश्रया सर्वगम्या नंदकेदलधारिणी ॥१७॥ नारीपुष्पसमग्रा च नारीपुष्पसमन्विका ॥ नारीपुष्पोत्सवा नारी नारीपुष्परता मृगी ॥१८॥ चतुर्भुजा दशभुजा ह्यष्टादशभुजान्विता ॥ द्विभुजा षड्भुजा ह्यष्टारपंकजोपरिसंस्थिता ॥१९॥ कौवेरी कौरवी कौल्या कुलकेकुध्वा कृपालिनी ॥ विपरीतकदलीजंघा रंभोरू रामवल्लभा ॥२०॥ निष्प्राचारा निष्प्रामूर्त्तिर्निष्प्राचंद्रसमप्रभा ॥ चांद्री चंद्रकला चंद्रा चारुचंद्रसमप्रभा ॥२१॥ श्रोतस्वनी श्रोतवती सर्वदुर्गतिनाशिनी ॥ सर्वाधारा सर्वमयी सर्वानंदप्रवर्द्धिनी ॥२२॥ सर्वचक्रेश्वरी सर्वा सर्वमंत्रमयी सदा ॥ सहस्रानयनप्राणा सहस्रानयनप्रिया ॥ सह

लाक्षीबीजसुमनाःसदैभा सर्वभूषिका॥ षष्ठिका षष्ठ्कंद्रस्था षड्व-
र्गफलदायिनी॥८४॥ षट्विंशत्पद्ममध्यस्था षट्विंशद्दलमध्य-
गा॥ हकारवर्णनिलया हकाराक्षरभूषिता॥८५॥ हारिणी हा-
रवनिता हारहीरकभूषिता॥ ह्रींकारबीजसहिता ह्रींकाररू-
पशोभिता॥८६॥ कंदर्पस्य कला कुल्या कौलिनी कुलतर्पिता॥
केतकीकुसुमप्राणा केतकीदलभूषिता॥८७॥ केतकीकुसुमास-
क्ता केतकीपादभूषिता॥ कर्पूरपूर्णवदना कलानाथसमप्रभा॥८८॥
कालकेलिप्रिया कीर्ति कंदर्पकुसुमोत्सुका॥ कादंबिनी कामग-
तीः कुंजरेश्वरगामिनी॥८९॥ खर्वा खर्वजनप्रख्या लोचना खग-
भूषिता॥ खद्योतइवदुर्लक्षा खद्योतइवचंचला॥९०॥ गयागया-
हायत्रामश्रीता गीतवाद्यप्रियागतिः॥ गतोश्वरी गतोन्या च गता

॥९१॥
गुह्यागमा गूढा॥ गेयाढ्या गेयासंपत्तिर्गेयादात्री गेयात्मिका॥
गुर्वी गुरुतरा गौरी गाणपत्यफलप्रदा॥९२॥ घर्मांशुरहिता
घर्मा घर्मविंदुविनाशिनी॥ घर्घरा घोरवदना घोरदैत्यविना
शिनी॥९३॥ घोषा घोषवती घुष्या घोरपत्नी घनालया॥
चर्चरी चारुनयना चारुवक्त्री चतुर्भुजा॥९४॥ चतुर्वेदमयी चं
द्री चंद्रस्था चतुरानना॥ चलच्चकोरनयना चलत्खञ्जनलो
चना॥९५॥ चलद्भोजेनयना चलद्भोजशोभिता॥ छात्री
छत्रप्रिया छत्रा छत्रचामरशोभिता॥९६॥ छिन्नमा छदीं छिन्न
शिरा छिन्ननासा छलान्विता॥ छला छलाढ्या छलसंस्था छलह
ता छलच्छिद्रा॥९७॥ छकारवर्णनिलया छकाराढ्या छलप्रिया॥

ता·स·
८

छद्मिनी छद्मनिरता छद्मा छद्मनिवासिनी॥ जगन्नाथप्रिया
जीवा जगन्नाथरता जया॥ जीर्णा जीमूतवनिता जीमूतैरपि शो
भिता॥९९॥ जामातृवरदा जंभा जमलार्जुनधारिणी॥ जवान्वि
ता जन्मरता जन्मारातिवरप्रदा॥१००॥ जिता जयश्री जयदा जयदा
त्री वरप्रदा॥ झर्झरी झिल्लिकातङ्कध्वनी झरी झर्झरी का तथा॥१०१॥
ञकारकारिणी टीत्कीकारिणी टङ्कधारिणी॥ ठक्कुरा ठोड्
मरुका डाल्का डीडमरुप्रिया॥१०२॥ ढक्कारवाद्या ढकारी तुलसी
तालभञ्जिका॥ तुला तौलिनी कातीर्णा तारा तारापाला का तथा॥३॥
तन्त्रविज्ञा तन्त्ररता तन्त्रविद्या वतन्त्रदा॥ तान्त्रिका तन्त्रविद्यावत
न्त्रसारा वतन्त्रपा॥१०४॥ तन्त्रधात्री तन्त्रकारी तन्त्रराज्ञा वरतोत्तरा॥

जय

श्री
८

दानदात्री दानवर्त्ता दानसम्मानतोषिता॥ दानवैःसेविता दान्ता दामोदरपरायणा॥ दधिप्रियवरदा कृष्टा दानवे
दधिमर्दिनी

नीथा।

तेजप्रभावातिगम्या तेजसारफलप्रदा॥५॥तपस्यातोलि
नीतोर्त्तातोनातोतिलसीतुषा॥तुषारकरपूर्णास्यातुषा
रकरमण्डिता॥६॥तुहिनाभ्रसमानास्यात्तुहिनाभ्रसम
प्रभा॥तुषारकरतुल्याङ्गीतुषारकरसुन्दरी॥७॥तुषारधा
मतुल्यास्यातुषाराभ्रसमानना॥तुषाराद्रिसुतातार्क्ष्या
तालस्थातालवर्जिता॥८॥तारस्वरेणसहितातारस्वरवि
भूषिता॥थकारकूटनिलयाथकाराक्षरमालिनी॥९॥
दयावतीदीनरतादुःखदारिद्र्यनाशिनी॥दौर्भाग्यदुःख
दलिनीदौर्भाग्यपदनाशिनी॥१०॥दुहितादीनबन्धुश्चदा
नवेन्द्रविनाशिनी॥दीर्घनेत्रादीर्घकचादीर्घनासाचदी

ता·स·
१

र्घिका ॥११॥ दारिद्रदुःखसमनी दुष्टासुरनिषुदिनी ॥ दैत्यिका दैत्यहा दीना दैत्येन्द्रविनाशिनी ॥१२॥ धनधान्यप्रदा धन्या धनेश्वरधनप्रदा ॥ धर्मिता धर्मिका धर्मा धर्मप्रवर्द्धिनी ॥१३॥ धनेश्वरी धर्मरात्री धर्मानंदप्रवर्द्धिनी ॥ धनाध्यक्षा धनश्रीता धनाढ्या धनतोषिता ॥१४॥ धीरा धैर्यवती हृष्या धवला भोजसंनिभा ॥ धारित्री धारिणी धात्री धरेशा धवलास्यदा ॥१५॥ धर्मिका धर्मसहिता धर्मनिंदकवर्जिता ॥ नवीना नीरजा निहा निम्ननाभी नगेश्वरी ॥१६॥ नूतना भोजनयना नवीना भोजसुंदरी ॥ नागरी नागराजेष्टा नागराजसुता नगा ॥१७॥ नागराजगतिर्नाग नागमाल्यविभूषणा ॥ ना

वर्धी२

श्री
१

। ऽ
नागराजप्रिया नागा नागाराध्या शुभालया

गेश्वरी नागरूढा नागराजकुलेश्वरी॥८॥नवीनीन्दुक
लानांदीनद्दिकेश्वरवल्लभा॥नीरजा नीरजाक्षी वं नीर
जद्वंद्वलोचना॥९॥नीरजस्रस्ता नीरवा नीति निर्मल
देहिनी॥नागयज्ञोपवीताढ्या नागयज्ञोपवीतिका॥१०॥
नागकेसरसंतुष्टा नागकेसरमालिनी॥नवीनकेत
कीकुंदमकरंदसुभूषिता॥११॥नायका नायकप्रीता
नायकश्रीतितोषिता॥नायकप्रेमसहिता नायकप्रे
मभूषिता॥१२॥नायकानेद्वनिलया नायकानेद्वका
रता॥नर्मकर्मरता नित्या नर्मकर्मपरायणा॥१३॥न
र्मकर्मज्ञीयानामी नर्मधर्मपरायणा॥नर्मप्रीता नर्म

थ्या

मंदार स्रग
भूषिता

श्री

रतानर्मेधर्मैकपालिका॥२४॥नर्मकर्मैकसहितानर्मकर्मैकतो
षिता॥नरनारीगुणाश्रीतानरनारीवरप्रदा॥२५॥नारायणा
प्रियानित्यानिष्कवर्णानिकारहा॥पुष्पप्रियापुष्परतापौष्पी
पानपरायणा॥२६॥पौष्पीप्रियासुपुष्पेज्यापुष्पदामवि
भूषिता॥पुराणदापूर्णिमापुराणापुराणकोटिफलप्रदा॥२७॥
पुराणागमविद्याख्यापुराणागमतोषिता॥पुराणागमगो
प्याख्यापुराणागमगोपिता॥२८॥पुराणागोचरापूर्वापूर्वा प॰
श्रोढविनाशिनी॥प्रह्लादहृदयाह्लादगेहिनीपुराणचाटि
ती॥२९॥फल्गुनीफल्गुनप्रीताफल्गुनप्रेमधारिणी॥फ
ल्गुनफलप्रदावैवफल्गाराजविभूषिता॥३०॥फल्गुणाकारा

हा१

फलिता प्रीता फलिता ~~[illegible]~~ विमुखिता ॥ फली शाकृत सर्वांगाभ्य

षणा फलिता वाहिनी ॥ ३१ ॥ फलिता प्रीता फलिता रता फलिता केक

ला धारिणी ॥ फलेश्वरी फलासक्ता फलभूषणा भूषिता ॥ ३२ ॥

फकाररूप सर्वांगी फल्गुनावेदवह्निनी ॥ बाहुदेवरतावि

द्या विद्याविद्यानकारिणी ॥ ३३ ॥ वीणावती वलाकीराणीवा

लपीयूषलोचना ॥ वलावत्सुमती विद्याविद्याहारविभूषि

ता ॥ ३४ ॥ विद्यावती वैद्यवती व्रीडावैवस्वतीरता ॥ वाराणीवि

लासकारिणी वरांगस्थावरानना ॥ ३५ ॥ विह्वलोर्वंशस्थल

स्थावरा वाग्वती बिंध्यवासिनी ॥ वानीरतरुसंस्थावदानीर

कुसुमोत्सुका ॥ ३६ ॥ भीतिहा भयहा भानोरुग्जालतमप्रभा ॥

५

सो विं भा

श्री

६१

भार्गवेस्वा भृगोःहस्या भार्गवजाद्विवेदिता ॥३७॥ भीतिहा भय
संपन्ना भीमाकारा मञ्जुहरी ॥ मायाधरी मानरता मानसंमा
नतत्परा ॥३८॥ माधवानन्ददा माध्वी मन्दिरा मन्दिरेश्वरा ॥
महोत्साहप्रलोपेता महती महदद्भुता ॥३९॥ मन्दिरा मोदिन
लिनामदृशा मञ्जनेरता ॥ यज्ञे [illegible] यज्ञा विद्या यज्ञाप्तानन्द
वर्द्धिनी ॥४०॥ यज्ञाः कर्पूरधवला यज्ञो रामविभूषिता ॥ यज्ञ
राजस्वसा यज्ञोन्मार्गानन्दविवर्द्धिनी ॥४१॥ यादन्नानन्दकारिता
यादवानन्दवर्द्धिनी ॥ यज्ञप्रीता यज्ञमयी यज्ञकर्मविभूषिता ॥४२॥
रामप्रिया रामरता रामतोषणतत्परा ॥ राज्ञी राजकुलेश्वा
वराजराजेश्वरी रमा ॥४३॥ रामरामा रमरामा रम्या रामानन्द

श्रीबोधसिंहासीनाश्रीववक्षस्थले स्थिता ५

प्रग्रथिनी॥रजनीकरपूर्णास्यारक्तोत्पलविलोचना॥४४॥ली
गली प्रेमसंतुष्टा लागली प्रतापपुञ्जिया॥लीलाहास्यरता बलेल
नालीलालीलालावृतीलया॥४५॥लेकेश्वरपराप्रीता लेकेश
वरदायिनी॥लवंगकुसुमप्रीता लवंगीकुसुमस्रजा॥४६॥
ब्राताविवश्वरूहिता विवस्वप्रेमधारिणी॥नारराधाचार
लाम्राल्याधारराधाश्रीःशारदुता॥४७॥षट्कोणचक्रमध्य
स्थासंपदाहूतिविक्षोभिता॥षेमात्रूपवातत्थाराचईश्वरीश्व ६३।६
रवदप्रभा॥४८॥उग्रावेवतथावेग्राकारकारीक्ष्मस्वरोङ्
वा॥लंकारवर्णाकूटस्थाल्पकारस्वरभूषिता॥४९॥राप
वावेषातथावोष्यापौकारा हारधारिणी॥पेसापःका

रवनिता सर्वांगमङ्गोपिता॥ ५०॥ ॐ॥ यइदंपठतिस्तोत्रंप्र
त्यहंभक्तितत्परः॥ दिवारात्रौ वृसंध्यायां समयेवमहेश्वरि॥
५१॥ स्तवमात्रस्यपाठेनराजाकिंकरतामियात्॥ सर्वांगमेधुरू
ज्यः स्यात्सर्वतंत्रेस्वयंहरः॥ ५२॥ शिवस्यानेवसंध्यायांश्रून्या
गारेचतुष्पथे॥ यःपठेच्छृणुया[illegible]पि स योगी नात्र संशयः॥ ५३॥
पापिनामापिसेत्पक्षिअसंग[illegible]रवैरिमाः॥ गन्धाद्यानिता
निकल्याणिनान्यानितुकहावनः॥ ५४॥ हरेर्नामैनेगस्तो
यात्रस्यकोतुलसीदलं॥ नान्यचिंताप्रकर्तव्या नान्यपिंसक
हावनः॥ सिंदूरकरवीराद्यैः पुष्पैर्लोहितकैः शिवां॥ योर्चे
येद्भक्तिभावेन तस्यासाध्यंनकिंचन॥ ५५॥ वातस्तंभजल

स्तंभं गतिस्तेभो विवस्वतः ॥ वह्नेः शैत्यं करोत्येव स्तवस्यास्य प्र
कीर्त्तनात् ॥५७॥ श्रियमाकर्षयेत्तूर्णं अरीन्मर्दयते हठात् ।
मोहयेद्राजराजानं देवानपि वशं नयेत् ॥५८॥ यः पठेच्छृणु
याद्वापि एकचित्तेन सर्वदा ॥ सदीर्घायुः सुखी धामी वाणी
तस्य वशंकरी ॥५९॥ सर्वतीर्थाभिषेकेन गयाश्राद्धेन यत्फ
लं ॥ तत्फलं सकलं देवि यः पठेदेकचित्ततः ॥६०॥ येषामारा
धने श्रद्धा येव साभित्रयतः ॥ तेषां हृतार्थी सर्वत्र गतिर्देवी
पहालये ॥६१॥ अरण्ये क्षालतामच्छोष्ठिलाइडेन ताडयेता ।
जलावस्ते लानमल्लुत्यगच्छेत्तापिकोपट ॥६२॥ अष्टम्यां च
चतुर्दश्यां नवम्यां शनिवासरे ॥ सिद्धौतौ मंगलैरागौः अम

वास्यांव योर्वयेत॥६३॥ वर्षप्राप्यचद्वेभितस्थस्युः सर्वासिद्धयः॥
मृतवत्साच या नारी सौभाग्यपरिपीडिता॥६४॥ वंध्यावा काकवंध्या
वा मृतप्रजाच योगना॥ धनधान्यविहीनाच रोगग्रस्ताकाकुलाच
या॥६५॥ तामिरेतन्महाभागे भूर्जपत्रे लिखापयेत॥ सम्यग्भुजे
ववग्रीयात्सर्वसौख्यवती भवेत॥६६॥ स्वेवं पुमानपिप्रायो दुःखे
न परिपीडितः॥ सभायां व्यसने घोरे विवादे शत्रुसंकटे॥ वातुरं
गतथायुद्धे सर्वत्र परिपीडिते॥ सारस्तात्तस्य कल्याणि संक्षयं
याति दूरतः॥६७॥ पूजनीयाप्रयत्नेनश्रून्यागारे शिवालये॥
बिल्ववृक्षतटे देवि सर्वदाकुलमंडले॥६९॥ सर्वदारासर्वसंपूते
भक्तो दुग्धसतंडुलैः॥ स्वपत्रपत्रिकासंपूज्ये नैवेद्यैश्चयथाविर्तः॥७०॥
निवाहितेव यद्द्रव्यैर्मोक्तव्यं चाविधानतः॥ तन्नवैदृश्यते मोहाद्गौ

तुष्यन्ति देवताः॥७१॥ अनेनैवावधानेन योर्च्चयेत्परमेश्वरं॥
सभूमिवलये देवि साम्राज्यश्रीर्न संशयः॥७२॥ महाशंखेन
कल्याणि सर्वकार्य्यं जपादिकं॥ कुलसर्वस्वकस्यैव प्रभावो
वर्णितो मया॥७३॥ न शक्यते मया ख्यातुं वर्षकोटिशतैरपि॥
किंचिन्मयापि वा पल्यो कथितं परमेश्वरि॥७४॥ जन्मांतरस
हस्रेशा वर्णितुं नैव शक्यते॥ कुलीनाय प्रदातव्यं ताराभक्ति
पराय च॥७५॥ अनन्यगतये देवि वैष्णवाय विशेषतः॥ कु
लीनाय महेशाय गतिश्रद्धापराय च॥७६॥ महात्मने सदा
देयं परिक्षीतगुणाय च॥ नाभक्ताय प्रदातव्यं पथ्यातरपं
य च॥७७॥ न देयं देवदेवेशि गोप्यं सर्वागमे सदा॥ पठनीय

सौरव

म.

सत्यं देवि सर्वविस्त्यात्सत्यं सर्वदा ॥७२॥ यः स्तोत्रं कुलनायकं प्रति
दिनं भक्त्या पठेन्मानवः स स्यात् द्वित्तवयेषु नेष्वरस्स मो विद्याम
देवी कल्पद्रुः ॥ सौंदर्येण समृद्धिमानमनसिजः कात्यायनी तद्यु
ति मानत्या श्रीकर एव भक्त्यै विभवे भूमिपतिर्नान्यथा ॥७३॥
॥ ॥ इति श्रीरुद्रयामले हरगौरीसंवादे भक्तिकुलसर्वस्वना
मस्तोत्रं संपूर्णं ॥ ॥ देव्युवाच ॥ तारारहजोः श्रुता नाथ भावा
स्य सकला स्तुतिः ॥ सांप्रतं श्रोतुमिच्छामि कवचं मन्त्रविग्रहं ॥१॥
त्रैलोक्यमोहनं नाम सर्वापद्विनिवारकं ॥ रैव स्वचिते नाथ
कृपया मे प्रकाशय ॥२॥ भैरव उवाच ॥ देवदानवगंधर्वपू
जितेश्राणावल्लभे ॥ त्रैलोक्यमोहनं नाम कवचं श्रूयतां परं ॥३॥

घोक्षं वै
र्त कथ्याति

सर्वविद्यामयं देवि सर्वमन्त्रमयं ध्रुवं ॥ सर्वरक्षाकरं सर्वसिद्धि
विद्याऽदायकं ॥४॥ वेदव्यासोपि यद्धृत्वा सर्वज्ञः पठनाद्यतः ॥
यद्धृत्वा पठनादीशस्त्रोलोक्यविजयीऽजयः ॥५॥ धनाधिपः कु
वेरोपि देवाधीशाम्रचीपतिः ॥ पठनाद्धारणात्तस्य यतः सर्वे
दिगीश्वराः ॥६॥ सर्वैश्वर्ययुताः सन्तः सर्वैश्वर्यमवाप्नुयुः ॥ य
स्य प्रसादादीशोहं भैरवाणां सुरेश्वरि ॥७॥ क्रोधाधिपो महा
भीमो देवेशोऽत्र स्थितप्रभः ॥ न दद्यात्परशिष्येभ्यो दद्याच्छिष्ये
भ्य एव वा ॥८॥ अन्यभक्तेभ्योपि पुत्रेभ्यो दत्वा मृत्युमवाप्नुयात् ॥
त्रैलोक्यमोहनस्यास्य कवचस्य ऋषिः शिवः ॥९॥ छन्दो विराट्
देवता च साग्रेताराप्रकीर्तिता ॥ चतुर्वर्गेषु विद्यानां विनियो

ता·क
२५

गः प्रकीर्त्तितः॥ ॐ ह्रीं स्त्रीं मे शिरः पातु हूं फट् पातु ललाटं ह्रैं॥
सार्द्धपंचाक्षरी तारा पाया श्रेत्रयुगं मम॥ १॥ ॐ ह्रीं स्त्रीं हूं श्रो
ती पाया श्रमः पातु च नासिकां॥ तारा षडक्षरी पायाद्वदनं
ष्ठऽम्रुषरा॥ २॥ ह्रीं स्त्रीं हूं फट् वदनं जिह्वां पायान्महेश्व
री॥ ह्रीं स्त्रीं हूं गलं पातु सापि नीलसरस्वती॥ ३॥ स्त्रीं स्कंधौ
पातु नियतं तारैकाक्षररूपिणी॥ हूं घटं मे सदा पातु बीजै
काक्षररूपिणी॥ ४॥ ऐं ह्रीं स्त्रीं हूं च फट् पायात् श्रीतारा मे
भुजद्वयं॥ हूं ह्रीं स्त्रीं हूं च फट् पायात् श्रीतारा मे स्तनद्वयं॥ ५॥
श्रीं ह्रीं स्त्रीं हूं च फट् पायात् श्रीतारा हृदयं मम॥ हूं ह्रीं स्त्रीं हूं
च फट् बीजं तारा पृष्ठं सदावतु॥ स्त्रीं ह्रीं स्त्रीं हूं च फट् पायात्पा

श्री
२५

श्रीं कामस्वरूपिणी॥ ॐ ह्रीं स्त्रीं हूं नमः पायात्कुब्जी महाष
ड्डहारी॥७॥ ऐं सौं ॐ ऐं क्लीं फट् स्वाहा कटिदेश्मो सदावतु॥
रुपष्ठाम्हरी महाविद्यासाम्हा व्रह्मस्वरूपिणी॥८॥ ख्फ्रें हो
ॐ ऐं श्रीं ह्रीं साग्रुह्यदेश्मो सदावतु॥ सह्मासरी बोग्रताराम्र
लविद्यास्वरूपिणी॥९॥ ॐ ह्रीं तां हूं नमस्ताराये सकलप
हततः॥ डुस्तरं तारय्य पदं तारावज्रतावहृद्य॥ स्वाहेति वमहा
विद्याजाउनी सर्वदावतु॥ ऐं सौं ॐ ऐं क्लीं फट् स्वाहा जंघे
पातु पराम्बिका॥११॥ ॐ ह्रीं स्त्रीं हूं वफट् तारा हंसा घेता न
वाहरी॥ महोग्रतारा पादौ मे नित्यं पातु महेश्वरी॥१२॥ ऐं
ह्रीं श्रीं हसौः सहौ वदवद वाग्वादिनीतिवा॥ कामबीजगेयं

ता॰क॰
२६

ऐं ह्रीं श्रीं ह्सौः स्हौः वदवद वाग्वादिनि ऐं ग्लौं ऐं क्लीं ऐं क्लीं नीलसरस्वति ऐं ऐं ऐं काहि कौं स्वाहा - ३।

नीलसरस्वती स्वरूपश्लोकाः ॥४॥ ऐं ऐं ऐं काहि कुलं रीं स्वाहेति
व पार्वती ॥ वक्त्रस्य स्त्राक्षिपिमयी पातु नाराखिलेवपुः ॥५॥ ह्रो
क्रों वामाक्षिपुकूट श्रीसरस्वत्यनलप्रिया ॥ कूर्चं चैता पातु यो
र्व मूलविद्या दक्षासरी ॥६॥ तारो माया वधूः कूर्चं कालिकास
कला ततः ॥ उग्रतारे भगः कामः परा लक्ष्मीस्त्रिवाङ्क्रोधो ॥७॥ सा
महाषोडशी प्रोक्ता तारादेव्या मयानघ ॥ विधिवक्त्रहस्ताद्स्य
मस्तुः हस्तु पर्यन्त यैता ॥८॥ एषा विद्या मया ते प्रातं त्रोदिया
मलेडुखा ॥ सा प्रतं कथितं तुभ्यं कवचागतया प्रिये ॥ इति ते क
थितं देवि दुर्लभं गुह्यतरं प्रिये ॥ त्रैलोक्यमोहनं नाम कवचं मं
त्रविग्रहं ॥ ब्रह्मविद्यामयं भद्रे केवलं ब्रह्मरूपिता ॥ मंत्राव

ॐ ह्रीं स्त्रीं हूं ग्लौं क्लीं ॐ ग्नतारे ऐं स्त्रीं ह्रीं श्रीं हूं क्रौं

श्री
२६

वास्प

ग्रामएवैतत्कवचं मन्त्ररूपोदितं ॥ ४१ ॥ य इदं मम भक्तो विधिव
त्कवचं प्रपठेद्यदि ॥ त्रिसकृद्वा यथाज्ञानं भैरवस्तेन साक्षा
द्भवेत् ॥ ४२ ॥ सर्वपापविनिर्मुक्तः कुलकोटिसमुद्धरेत् ॥ यः
स्यात्सर्वविद्याप्रहारिका रिजपादितु ॥ ४३ ॥ शतमष्टोत्त
रं जप्त्वा पुरश्चर्याविधिः स्मृतः ॥ शतमष्टोत्तरं जप्त्वा भवेद्
सिद्धिर्देहः ॥ ४४ ॥ त्रैलोक्यविवरे श्रीरोगराजानां यथा प्र
हः ॥ गद्यपद्यमयी वाणी भवेत् गंगाप्रवाहवत् ॥ पुष्पाञ्ज
ल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् ॥ पंचवर्षसहस्राणां पू
जायाः फलमाप्नुयात् ॥ ४६ ॥ भूर्जे विलिख्य गुटिकां स्वर्णस्था
धारयेद्यदि ॥ पुरुषो दक्षिणे वाहौ योषिद्वामभुजे तथा ॥ ४७ ॥

वकुभग्रवती नारीउत्पसो धनपुत्रवान्॥ सर्वसिद्धीश्वरोभू
त्वा विहरेद्भैरवो यथा॥ स्नातजात्रं प्राप्पुण्यराशिः॥ ब्रह्मास्त्रो
घातिभैरवी॥ मात्यानिकुञ्जमान्येव भवेत् तेसुखदानिया॥
तस्य गेहाविरल्ल श्रीर्वाणी वक्रे वसेद्ध्रुवं॥ इदं कवचमज्ञात्वा
तारां यो भजते धमः॥ स्वल्पायुःनिर्धनो मूर्खो भवत्येव न सं
शयः॥ ४०॥ सत्ता साये प्रातभजन समये यातु ममत्र कृपा
तत्वं मातः सकलजन विद्रजानन्ते॥ त्वद्दृस्यासमानमन्यो
न पदिय्यादृग म्मो हन्ते [illegible] न दयाहृदेहदृकृलातसक
लामीह मयी तो॥ ४१॥ ॥ इति श्रीभैरवतंत्रे त्रैलोक्यवि
जयं नाम कवचं सम्पूर्णं॥ ऽथ लीत्यावकं ज्याल ज्वालामि

ह्रीं॰

भास्वच्छ्रितामक्ष्मसेंस्थोसाधुह्रोंसुखवीं ॥१॥ अवेंदुस्थपादेन
केठेनिपीड्यःस्थितोवामकेनांघ्रिणांपीड्यःमाना ॥ ॥ हृद
हृद्यैवमानोदरीमेघवर्णांसमस्तुंगपीनस्तनाभोगरम्या ॥
जवारावैरागपूर्णतांगिनेत्रालल्लैजिह्वयादंष्ट्रयुग्माभिभूतास्यां ॥२॥
ललद्वीपिचर्मावृतांगीस्थितास्याज्जटाजूटमध्येस्थितेन्दीव
राजी ॥ ॥ स्थिबोहेश भास्वत्त्रिपुंथगामि सर्पजटाजूटमध्येस्थि
तास्तोम्यमूर्ति ॥३॥ मितकेशावक्रारिरश्छिन्नेसम्यकेग
लौलोहितामानवामुंडमाला ॥ दधानवपवाशतातास्वट्वान
सखड्गयुग्धिंछिन्नमुंडावलिव्योमितांगी ॥४॥ महास्ट.क

समंसोकरापाद्यों सत्वस्फुरत्पाशिनाथास्येतौ महासि।
धृतेवामऋषिस्फुरस्फुरहस्तनीलस्फुरनीलपंकेरुहधार
यंतौ।। प्रकुरेसवऊश्येरघस्ताद्ध्यानंस्तताकर्ष्यैको
वामपार्श्वेकिपालोनागवार्त्तेसेसारजाआतिष्ठरां
स्फुरखेर्टकाषायास्वऊयेतौ।। ह्रीं।। विचित्रोस्थिमालां
करालेकेपालेलेलाटेचपंशोन्वितेधारस्येतौ।। घूना
भाहिवधेजटाजूटमुसौर्णभारागरागोभासखंडलौ
वा।। स्फुरस्फुरमरोचिमहाकायनागस्फुरश्चासकेयूर

द्धवर्णाभनागोद्धसत्कंकणो नस्फुरन्नीलसत्क्षेत नागाभिरामो ॥ २

शोभाभिरामो ॥ शरीरे रा दुर्वादलश्यामलौमैः कृते वा रूप्यज्ञोप
वीते दधानो ॥ ८ ॥ दधानो वक्रं दामनागेन सम्यक् कृते वा रुका
ष्ठ यस्त्रं पवित्रं ॥ महापाद लाभेन नागेन वत्तौ विभूषो वपोद
द्ध येसं दधानं ॥ विरंचितया मीदशी वा रुरूपामये याम दीर्घा
म पा संसारं ॥ कुरंगेशिखामौलिप्रभा रंजितोद्भिन्नतामेषदो
सं पदाभीष्टदात्री ॥ १० ॥ यदीयप्रसादादिदं विघ्नजातं जनःश्रा
द्धया नोदते सम्यगेव ॥ स देवस्तवं यः पठेदेकचित्तो हि सायं स्तस्य
न्तौ क्रो भवेत्तत्र नूनं ॥ न दारिद्र्यपापं वने रोदुर्मतिः स्याद्ध्येमेनापि ग्रे २
मोहे तथा धर्मकामो ॥ १२ ॥ इति श्रीगंधर्वतंत्रे उग्रतारास्तवः ॥
ॐ जयजयजगज्जननि निजजन्यमानजननि जनावननवतित्रि

राज्ञित सृष्टिस्थितिप्रलयकलाकलापिनी सकलकलुषजल
प्रतिकूलिनी प्रेतहृदयसमर्पितपादघोरतरस्फुटतरावकटाट्ट
हासिनी परमपदब्रह्मसंविन्मितसंमतप्रणतजनप्रतिपादित
प्रणातितते परमात्मजीवात्मगते परमेऽस्मदाद्यनेकप्रकटसं
कटहरणातत्परे स्वीकृतकर्त्रीखड्गखर्परेन्दीवरकरे सश्वद्वर्द्ध
मानकूर्च्चबीजोत्पन्नतनो तारे रिणासंतोषकारिणि तदपारसं
सारसागरोत्तारणतरणीकृतचरणारविन्दे यढं हारूढं हारक
ङ्कं ये बे ये खर्वगर्वे खर्वापर्वगे खर्वमूर्त्ते सत्कोऽवेयसंवोहित
स्फुटजटाजूटतटे विघ्नकट एकजटे उग्रउत्कटजै विष्टपिकजन
जाड्योत्पाटके रक्तपालमालिकें विके महामाये नीलकाये

नीलसरस्वति महोग्रतारे त्राहि मां सर्वतः त्रासादितनमोनम
स्ते॥ इति श्रीमत्स्यसूक्ते एकजटोपनिषत्स्तोत्रं॥ शून्यागारे
श्मशाने यदि जपति जडस्त्वेकलिंगे तडागे गंगागर्भे गिरौ वाप्य
विरमलमतिः सर्वदा भक्तियुक्तो॥ विद्या श्री नीलवर्णा भुवन
जनपतिः सर्वशास्त्रार्थवेत्ता देहान्ते योगमुख्यः परमसुखप
दं प्राप्य निर्वाणमेति॥१॥ पीठे वा नानागारे रम्ये वास्तव्येनाद्वि
जन्मना॥ शाकेग्निवसुकालाब्दः मासे पौषे तु शोभने॥ पक्षे
तु शुक्ले द्वितीयायां श्रीकाले समाश्रिके॥२॥ शुभमस्तु॥ न तारं
सदृशो देव न तारं सदृशो मनुः॥ न यन्त्रसदृशी पूजा न नरः स
दृशो बलिः॥ श्रीतारिणीचरणारविंदे समर्प्यपत्रं॥ शुभं

गकृतनारु [illegible] यज्ञोदग्रीतं [illegible] ॥ दधानाथे [illegible]
तस्यकृहत
शोभाभिरामो ॥ श्रीरैतार्द्वर्दाहलवपामलौ [illegible] सुवं
वारुकाटयल्रजे पवित्रौ ॥ दो ॥ मरापाटलो मेन

रुमसान

१८ ख ॥ नामसि [illegible]

वस्तोभिमानादपमानतश्चेद्विधीयतेपेक्षतारकवेरंग ॥ हेलाहतांनेकना [illegible]
शूलोहरीन्द्रकोशविकाशितहानिः ॥

४२४२

॥ ॥ द्वादिनपिण्डदानविधिः ॥ ॥

श्री ५ को सरकार

नं.१८

श्रीगणेशायनमः ॥ ॥अथदशाहदिनपिण्डदानविधिः ॥ ॥असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पु
मान् ॥ प्रथमेहनि यो दद्यात्स दशाहं समापयेत् ॥ अथ कर्त्ता जलाशयसमीपे शुचौ देशे गाढभूमिं प
रिकल्प्य पिण्डस्थानादेशान्यां पिण्डपाकस्थानं कुर्यात् ॥ अन्यावोह्यपि पृथक्पाकेन कार्यः ॥ दक्षि
णप्रवाहे कैवर्त्यादिः कार्यो ॥ अथ अपसव्येन स्नानानन्तरमुदकदानम्· तत्रार्द्रवासाँचम्य· कृतोप
रिस्थापितपाषाणोह्रस्नातापसव्यो दक्षिणाभिमुखः कुशहस्तः कुशतिलजलान्यादाय· अद्यामुकगो
त्रामुकप्रेत एषतिलतोयाञ्जलिस्ते मया दीयते तेनवोपतिष्ठताम्· इतिवाक्येन· एकस्मिन्नेव पाषा
णोपरि दशाहदिनपर्यन्तं दद्यात्· पाषाणाधिपर्यवोनकर्त्तव्यः · स्त्रीप्रेतायांतु· अद्येहामुकगोत्रे ऽ
मुकप्रेते एषतिलतोयाञ्जलिस्ते मयादीयते तेनवोपतिष्ठताम्· इतिवाक्येन· ॥ ॥अथप्रथमपिण्ड
दानप्रयोगः ॥ दीपं प्रज्वाल्य· कर्त्ता कुशहस्तः सोत्तरीय आचम्य कृतापसव्यो दक्षिणाभिमुखः
पातितवामजानुर्वेदिकायां दक्षिणाग्रान्कुशानास्तीर्य· कुशतिलजलान्यादाय· अद्यामुक
गोत्रामुकप्रेत पिण्डस्थाने ऽदमवनेजनन्ते मया दीयते तेनओपतिष्ठताम्· इत्यास्तरणकुशोप
रिपितृतीर्थेनावनेजनं दद्यात्· स्त्रीप्रेतायांतु· अद्येहामुकगोत्रे ऽमुकप्रेते पिण्डस्थाने ऽ

श्रा

दमवनेजनं तेमयादीयतेतवोपतिष्ठताम्· इतिवाक्येनदद्यात्· ततस्तिलघृतयुतंपिण्डं कृत्वाति
लजलसहितमादाय· अद्यामुकगोत्रामुकप्रेत एषशिरःपूरकप्रथमपिण्डस्तेमयादीयतेतवो
पतिष्ठताम्· स्त्रीप्रेतायांतु· अद्यामुकगोत्रेऽमुकप्रेते एषशिरःपूरकप्रथमपिण्डस्तेमयादीयते
तवोपतिष्ठताम्· प्रत्यवनेजनस्थानोपरिपिण्डंदद्यात्· ततः· अद्यामुकगोत्रामुकप्रेत इदंपि
ण्डप्रत्यवनेजनं तेमयादीयतेतवोपतिष्ठताम्· स्त्रीप्रेतायांतु· अद्यामुकगोत्रेऽमुकप्रेते इदं॰
पिण्डोपरिप्रत्यवनेजनंदद्यात्· ततः प्रेतमुद्दिश्य तूष्णीमेवोशीरचन्दनोर्णासूत्रभृङ्गरा
जपत्रपूगीफलपुष्पाक्षतैः पिण्डमभ्यर्च्य कुशादिकमादाय· अद्यामुकगोत्रामुकप्रेत एता
निपिण्डस्योशीरचन्दनोर्णासूत्रभृङ्गराजपत्रपूगीफलपुष्पाक्षतधूपदीपनैवेद्यानिते
मयादीयन्तेतवोपतिष्ठन्ताम्· स्त्रीप्रेतायांतु· अद्यामुकगोत्रेऽमुकप्रेते एतानि॰ इत्युक्त्वा ततः·
अथाञ्जलिदानम्· अद्यामुकगोत्रामुकप्रेत एष तिलतोयाञ्जलिस्तेमयादीयतेतवोपतिष्ठ
ताम्· स्त्रीप्रेतायांतु· अद्यामुकगोत्रेऽमुकप्रेते एष॰ इत्येकंतिलतोयाञ्जलिंपिण्डोपरिदद्या
त्· अथपुटपात्रम्· अद्यामुकगोत्रामुकप्रेत इदंसतिलतोयपूर्णपुटपात्रंतेमयादीयतेत

स्त्रीपक्षेतु· दद्यासि   स्त्रीपक्षेतु· पातयासि

णोपतिष्ठताम्· स्त्रीप्रेतायांतु· अद्यामुकगोत्रेऽमुकप्रेतेऽदं०ऽस्यैकं सतिलतोयपूर्णघटपात्रं दद्या
त्· तत्रस्त्रिकाष्ठिकयोः घटपात्रमहवेनीरं क्षीरं चा ददाय· अद्यामुकगोत्रामुकप्रेतऽस्त्रिकाष्ठि
कास्थितनीरक्षीरयुतघटपात्रं तेमयादीयते तवोपतिष्ठताम्· स्त्रीप्रेतायांतु· अद्यामुकगो
त्रेऽमुकप्रेतेस्मै०ऽमुत्सृजेत्· प्रार्थना· श्मशानानलदग्धोसि परित्यक्तोसि बान्धवैः· इ
दं नीरमिदं क्षीरमत्र स्नाहि ऽदं पिबऽति पठेत्· ततः सतिलकुशीतलजलपूर्णघटं कृत्वा· अ
द्यामुकगोत्र अमुकप्रेत एष सतिलकुशीतलजलोपेतो घटस्ते मयादीयते तवोपतिष्ठताम्·
स्त्रीप्रेतायांतु· अद्यामुकगोत्रेऽमुकप्रेते एष०ऽमुष्यै कुशीतलजलोपेतः सर्वोपस्करसं
स्त्रीपक्षेतु· प्रेताये युतः· एष घटो मयादत्तः प्रेतायमुपतिष्ठताम्· अनादिनिधनो देवः शंखचक्रगदाधर·
अक्षय्य पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव॥ अथ दक्षिणा· सद्येन· कुशतिलजलसहितं लो
हमादाय· अद्यामुकगोत्रस्यामुकप्रेतस्य कृतैतच्छिद्रः पूरकप्रथमपिण्डदानप्रतिष्ठार्थ
मिदं लोहं पलपरिमितं यमदैवतं दक्षिणात्वेन दातुमहमुत्सृजे॥ तत्सर्वं जले क्षिपेत्॥
इति प्रथमदिनकृत्यम्· ॥अथ द्वितीयादिनकृत्यम्· ॥पूर्वदिनकृतदेशं गत्वा सर्वं पूर्ववदि

२

धाय· शिरोघस्त्, ·कर्णाक्षिनासिकापूरको द्वितीयः पिण्डः ·द्वे अञ्जली ·द्वे सजलपुटपात्रे· तृतीयादि
ने· गलांसभुजवक्षपूरकस्तृतीयः पिण्डः ·त्रयो ऽञ्जलयः ·त्रीणिपुटपात्राणि। चतुर्थदिने नाभिलि
ङ्ग गुदपूरकश्चतुर्थः पिण्डः ·चत्वारस्तिलतोयाञ्जलयः ·चत्वारि पुटपात्राणि· पंचमदिने· जा
नुजंघापादपूरकः पञ्चम पिण्डः ·पंचतिलतोयाञ्जलयः ·पंचपुटपात्राणि· षष्ठदिने सर्वम
र्मपूरकः षष्ठः पिण्डः ·षट्तिलतोयाञ्जलयः ·षट्पुटपात्राणि ·सप्तमदिने· सर्वनाडिपूरकः
सप्तमपिण्डः ·सप्ततिलतोयाञ्जलयः ·सप्तपुटपात्राणि· अष्टमदिने· दन्तलोमादिपूरकोऽष्ट
मः पिण्डः ·अष्टौ तिलतोयाञ्जलयः ·अष्टौ पुटपात्राणि· नवमदिने· वीर्यपूरको नवम
पिण्डः ·नवतिलतोयाञ्जलयः ·नवपुटपात्राणि· नवमदिने वाससां प्रक्षालनाय दानम्·
कर्तुर्दशमदिने वा· दशमदिने· पूर्णतातृप्ताक्षुद्विपर्ययहेतुको दशमपिण्डः ·दशतिल
तोयाञ्जलयः ·दशपुटपात्राणि· प्रथमदिनमारभ्य दशाहदिनपर्यन्तं वस्त्रं नो व्यन्यस्रो
ने कर्तव्यः ·स्वगिलभेदने सुवर्णरजताभ्यां· मृण्मयपाकभाण्डानां त्यागः ·ततः पुत्रा
णां यथा चारमन्येषामपि प्रेतकनीयसां सपिण्डानां नखलोमानि वापयित्वा तिलतै

श्री प्रेतादकुम्भ

लेनांऽस्थिसंचयं पञ्चत्वे नशिरःश्रोन्मृ अयत्नात्वा प्रेतस्य पृष्ठवासांसि आश्रितेभ्यो दद्यात्. आचम्य. वासो प्रेतमहतं नवप्राणनं वा अहतम प्रेतोपरि धाय. गोहिरण्य तोरो वनदधिहव्यां गोमृत्तिकादेर्यथालाभं स्पर्शं कृत्वा ब्राह्मणो जलं क्षत्रियो वाहनायुधम्. वैश्यः प्रतोदप्रग्रहौ शूद्रो यष्टिं संस्पृश्य ब्राह्मणानां स्वस्ति वाचयित्वा सर्वेन त्रैवर्ण ओरत्न. अग्निनिर्दिने ब्राह्मणानां पंचगव्यप्राशनमिति ॥ स्थिरत्वार्थेन पिण्डेन प्रेतस्य पञ्चतसदा ॥ द्वितीयेन तु कर्णाक्षिनासिकान्तं समासतः ॥१॥ गलांशभुजवक्षांसि तृतीयेन तथा क्रमात् ॥ चतुर्थेन तु पिण्डेन नाभिलिंगगुदानि च ॥२॥ जानुजंघे तथा पादौ पंचमेन विधीयते ॥ सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ॥३॥ दन्तलोमाद्यष्टमेन वीर्यं तु नवमेन च ॥ दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥४॥ पिण्डस्तु पंचपंचाशत्तोयस्याञ्जलयः क्रमात् ॥ तावन्ति तोयपात्राणि संपूर्णानि तिलैः सह ॥५॥ इति ॥ ॥ दशाहदिनपर्यन्तो पिप्पलादिवृक्षे जलपूर्णघटं कृत्वाऽधश्छिद्रं शिक्ये धारयेत् ॥ अपसव्येन. कुशतिलजलान्यादाय. अद्यामुकगोत्रस्यामुकप्रेतस्य पापगणन्पक्षज श्रमविनाशनार्थमिदमाकाशगाधिकरणीकमघादि

स्त्रीप्रेतायान्तु· अद्यामुकगोत्राया अमुकप्रेतायाः पा मन्त्रा नय०

दशादिनं यावत्तेमयादीयते तवोपतिष्ठताम्· ऽस्तुत्सृजेत्· ॥ अथ सायङ्काले दीपदानविधिः ॥ ॥ सायंकाले गोमयोपलिप्तत्रिकाष्ठिकोपरि दीपपानीयंपुष्पं च स्थाप्य यावद्दशो चाल्ते दद्यात्· तत्र वाक्यं। अपसव्येन कुशतिलजलान्यादाय· अद्यामुकगोत्रामुकप्रेतन एष दीपस्तेमयादीयते तवोपतिष्ठताम्· अद्यामुकगोत्रामुकप्रेतन इदं पानीयं ते तवोपतिष्ठताम्· अद्यामुकगोत्रामुकप्रेतन इदं पुष्पं ते मयादीयते तवोपतिष्ठताम्· स्त्रीप्रेतायान्तु· अद्यामुकगोत्रे ऽमुकप्रेते एष दीप० अद्यामुकगोत्रे ऽमुकप्रेते इदं पानीयं० अद्यामुकगोत्रे ऽमुकप्रेते इदं पुष्पं० ऽस्तुत्सृजेत्· अनेनपञ्चप· इदं पिब· इदं परिधेहि· ॥ अथ कर्णशयनस्थलसमीपे जलपूर्णघटोपरितिलतैलेन वा दशाहपर्यन्तमहर्निशं दीपं प्रज्वालयेत् ॥ तत्र वाक्यं· दक्षिणाभिमुखोपसव्येन कुशतिलजलान्यादाय· अद्यामुकगोत्रस्यामुकप्रेतस्य यमदुर्गमार्गमहाघोरान्धतमसः सन्तरणार्थं मयादिदशादिनं यावत् घटोपरिस्थ एष दीपस्ते मयादीयते तवोपतिष्ठताम्· स्त्रीप्रेतायान्तु· अद्यामुकगोत्राया अमुकप्रेतायाः यमदुर्गमार्ग० ऽस्तुत्सृजेत्· ॥ ॥ ॥ ॥ ॥

कर्णभोजनसमये काकवलिदानं ॥ पुटपात्रेन्नं निधाय· हस्ते जलं गृहीत्वा· इमं मन्त्रं पठेत्·

पूर्वं शवं स्नापयित्वा चन्दनपीतांवरादि परिधाप्य चितायां उदक्शिरसं प्रेतं निधाय · दत्तीकुंडनादिकं कृत्वा स्नात्वा च ३

काकोसि यमदूतोसि गृहाण बलिमुत्तमम् ॥ यमद्वारपथे घोरे नमाप्त्या पितुमर्हसि ॥१॥ यमाय धर्मराजाय मृत्यवे चान्तकाय च ॥ दक्षिणान्दिशमाश्रित्य प्रेतान्ते बलिमाहर ॥२॥ इति शुभम् ॥ ॥ अथाग्निदानमंत्रः ॥ ॐ दक्षिणहस्तेन दीपं गृहीत्वा वामहस्तेन इन्धनसम्पुटं गृहीत्वा इमं मन्त्रं पठन् त्रिः प्रदक्षिणीकृत्यापसव्यं कृत्वा मुखे वह्निं क्षिपेत् · अनेन मंत्रेण · कृत्वा तु दुष्कृतं कर्म जानता वाप्यजानता ॥ मृत्युकालवशं प्राप्य नरं पंचत्वमागतं ॥१॥ धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ॥ दहेयं सर्वगात्राणि दिव्यान् लोकान्स गच्छतु ॥२॥ अथार्द्धशरीरदग्धे होममंत्राः ॥ सघृतेन्धनसम्पुटं गृहीत्वा वह्नौ प्रक्षिपेत् · तन्मन्त्राः ॥ अस्मात्वमभिजातोसि त्वदयं जायतां पुनः ॥ असौ स्वर्गाय लोकाय स्वाहा ज्वलति पावके ॥१॥ इति मंत्रेण सप्तधा पठन् प्रज्वेत्कोमाकृतिं दद्यात् ॥ ॥ ॥

अथ चितायां पिण्डदानविधिः ॥ दाहानन्तरं स्नानं कृत्वापसव्यो दक्षिणाभिमुखः षट्पिण्डान् दद्यात् · अथावनेजनं दद्यात् · अमुकगोत्रामुकप्रेत मृतस्थाने इदमवनेजनं ते मया दीयते तवोपतिष्ठताम् · स्त्रीप्रेतायां तु · अमुकगोत्रे ऽमुकप्रेते मृतस्थाने ० एवं · द्वारस्थाने · चत्वरे · विश्रामे · काष्ठचयनस्थाने · संचयनस्थाने · इति षट्स्थाने ऽवनेजनं दद्यात् · ततः सघृतदुग्धतैलमु

ष्टि मासादयावनेजनोपरि दद्यात्॥ अथामुकगोत्रामुकप्रेत मत्र स्थाने प्रथमपिण्डस्ते मया दीयते
तवोपतिष्ठताम्. श्रीप्रेतायास्तु. अथामुकगो२मुकप्रेतमृतस्थाने० ९ चं. द्वारस्थाने. चत्वरस्था
ने. विश्रामस्थाने. काष्ठचयनस्थाने. संचयनस्थाने. इति षट् अवनेजनस्थानेषु प्रत्ये
कषट्पिण्डान् दद्यात्. ॥ मृतस्थाने शवो नाम तेन नाम्ना प्रदीयते॥ तेन भूमिर्भवेत्तुष्टा तदधि
ष्ठात्र देवता॥१॥ द्वारदेशे भवेत्पान्थस्तेन नाम्ना प्रदीयते॥ तेन दत्तेन तुष्यन्ति गृहवास्त्वधिदेवताः॥२॥
चत्वरे खेचरो नाम तेन नाम्ना प्रदीयते॥ तेन तत्रोपघाताय भूतकोटिः पलायते॥३॥ विश्रामे भू
तसंज्ञोयं तेन नाम्ना प्रदीयते॥ पिशाचा राक्षसा यक्षा ये चान्ये दिग्निवासिनः॥४॥ तस्य होत
व्यदेहस्य नैवायोग्यत्वकारकाः॥ चितामोक्षप्रभृति प्रेतत्वमुपजायते॥५॥ चितायां साध
कं नाम वदन्त्येके खगेश्वर॥ केपितं प्रेतमेवाहुर्ये था कल्पविदस्तथा॥६॥ तदाहि तत्र तत्रापि
प्रेतनाम्ना प्रदीयते॥ इत्येवं पंचपिंडैर्हि शवस्याहुतियोग्यता॥७॥ अन्यथा चोपघाताय पूर्वोक्ता

४२३४ ~~ने. ५४~~

॥ ॥अथरेव्याकवच॥ ॥

श्रीगणेशाय नमः॥ ॥मार्कण्डेय उवाच॥ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह॥१॥ ॥ब्रह्मोवाच॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने॥२॥ प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी॥ तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम्॥३॥ पंचमं स्कन्दमातेति षष्टं कात्यायनीति च॥ सप्तमं कालरात्री च महागौरीति चाष्टमम्॥४॥ नवमं सिद्धिदात्री च नवदुर्गा प्रकीर्तिताः॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना॥५॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो

रणे॥ विषमेदुर्गमेचैवभयार्त्ताशरणंगता॥६॥ नतेषांजायतेकिंचिदशुभंरणशंक
टे॥ नापदंतस्यपश्यामिशोकदुःखभयंनहि॥७॥ यैस्तुभक्त्यास्मृतानूनंतेषांवृ
द्धिःप्रजायते॥ प्रेतसंस्थातुचामुण्डावाराहीमहिषासना॥८॥ ऐन्द्रीगजसमारूढा
वैष्णवीगरुडासना॥ माहेश्वरीवृषारूढाकौमारीशिखिवाहना॥९॥ लक्ष्मीपद्मा॰
सनादेवीपद्महस्ताहरिप्रिया॥ श्वेतरूपधरादेवीईश्वरीवृषवाहना॥१०॥ ब्राह्मीहंसस
मारूढासर्वाभरणभूषिता॥ नानाभरणशोभाढ्यानानारत्नोपशोभिताः॥११॥ दृश्यन्तेरथ
मारूढादेव्याःक्रोधसमाकुला॥ शंखंचक्रंगदांशक्तींहलंचमुसलायुधम्॥१२॥ खे

श्रीदेवी
॥२॥

टकं तोमरं चैवपरशुं पाशमेवच ॥ कुन्तायुधं त्रीशूलं चशारंगायुधमुत्तमम॥१३॥
दैत्यानांदेहनाशायभक्तानामभयायच ॥ धारयंत्यायुधानित्यंदेवानांचहिता
यवै॥१४॥ नमस्तेस्तुमहारौद्रेमहाघोरपराक्रमे ॥ महामायेमहोत्साहेमहाभय
विनाशिनी ॥ त्राहिमांदेविदुःप्रेक्षेशत्रूणांभयवर्द्धिनी ॥१५॥ प्राच्यांरक्षतुमामै
न्द्रीआग्नेयामग्नीदेवता ॥ दक्षिणेरक्षवाराही नैरित्यांखड्गधारिणी ॥१६॥ प्रती
च्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी ॥ उदीच्यांरक्षकौमारी ऐशान्यांशूलधारि
णी॥१७॥ ऊर्ध्वंब्रह्माणिमेरक्षेदधस्ताद्वैष्णवीतथा ॥ एवंदशदिशोरक्षेच्चामु

कव
॥२॥

ण्डाशववाहना॥१८॥जयामेचाग्रतपातुविजयापातुपृष्टतः॥अजितावामपार्श्वे
तुदक्षिणेचापराजिता॥१९॥शिखामेद्योतिनीरक्षेदुमामूर्ध्निव्यवस्थिता॥माला
धरीललाटेचभ्रुवौरक्षेद्यशस्विनी॥२०॥त्रिणेत्राचभ्रुवोर्मध्येयमघंटाचनाशि
के॥शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी॥२१॥कपोलौकालिकारक्षेत्क
र्णमूलेतुशांकरी॥नाशिकायांसुगन्धायउत्तरोष्ठेचचर्चिका॥२२॥अधरे
चामृतकलाजिह्वायांचसरस्वती॥दन्तानरक्षतुकौमारीकंठमध्येतुचण्डिका
॥२३॥घण्टिकांचित्रघण्टाचमहामायाचतालुके॥कामाक्षीचिबुकंरक्षेद्वा

चंमेसर्वमङ्गला॥२४॥ग्रीवायांभद्रकालीचपृष्ठवंशेधनुर्धरी॥नीलग्रीवाबहिः
कण्ठेनलिकांनलकूवरी॥२५॥स्कन्धयोर्खड्गिनीरक्षेद्बाहुमेवज्रधारिणी॥ह
स्तयोर्दण्डिनीरक्षेदम्बिकाचाङ्गुलीस्तथा॥२६॥नखान्शूलेश्वरीरक्षेत्कुक्षौर
क्षेन्नलेश्वरी॥स्तनौरक्षेन्महादेवीमनःशोकविनाशिनी॥२७॥हृदयेललितादेवी
उदरेशूलधारिणी॥नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा॥२८॥पूतनाकामि
नीमेढ्रंगुदेमहिषवाहिनी॥कट्यांभगवतीरक्षेज्जानुनीविंध्यवासिनी॥२९॥जं
घेमहावलारक्षेत्सर्वकामप्रदायिनी॥गुल्फयोर्नारसिंहीचपादपृष्ठेचतेजसी

॥३०॥ पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी ॥ दंष्ट्राकरालिनी रक्षेत्केशांश्चैवोर्द्ध्वकेशिनी ॥३१॥ रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा ॥ रक्तमज्जावसामांसेन्वस्थिमध्येस्व पार्वती ॥३२॥ अंत्राणि कालरात्री च पित्तं च मुकुटेश्वरी ॥ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥३३॥ ज्वालामुखी नखाज्वालामभेद्या सर्वसंधिषु ॥ शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ॥३४॥ अहंकारं मनो बुद्धिं रक्षमे धर्मधारिणी ॥ प्राणापानौ तथा व्यानौ उदानञ्च समानकं ॥३५॥ वज्रहस्ता च मे रक्षेत्प्राणां कल्याणशोभने ॥ रसे रूपे च गन्धे

च शब्दस्पर्शे च योगिनी ॥३६॥ सत्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ आयुर
क्षतु वाराही धर्मं रक्षतु वैष्णवी ॥३७॥ यशः कीर्तीं च लक्ष्मीश्च धनं विद्यां च चक्रि
णी ॥ गोत्रमिन्द्राणि मे रक्षेत्पशून्मे रक्ष चंडीके ॥३८॥ पुत्रान् रक्षेन्महालक्ष्मी भा
र्यां रक्षतु भैरवी ॥ पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ॥३९॥ राजद्वारे महाल
क्ष्मी विजया सर्वत स्थिता ॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥४०॥ त
त्सर्वं रक्ष मे देवी जयन्ती पापनाशिनी ॥ पदमेकं न गच्छेत्तु यदिच्छेच्छुभमात्मनः
॥४१॥ कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥ तत्र तत्रार्थलाभश्च विजयः

सर्वकामिकः॥४२॥यंयंचिन्तयतेकामंतंतंप्राप्नोतिनिश्चितम्॥ परमैश्वर्य
मतुलंप्राप्स्यतेभूतलेपुमान्॥४३॥निर्भयोजायतेमर्त्यः संग्रामेष्वपराजि
तः॥त्रैलोक्येतुभवेत्पूज्यः कवचेनावृतःपुमान्॥४४॥ इदंतुदेव्याःकवचं
देवानामपिदुर्लभम्॥यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्रद्धयान्वितः॥४५॥
देवीकलाभवेत्तस्यत्रैलोक्येष्वपराजितः॥ जीवेद्वर्षशतंसाग्रमपमृत्यु
विवर्जितः॥४६॥नश्यन्तिव्याधयःसर्वेलूताविस्फोटकादयः॥ स्थावरं
जंगमंवापिकृत्रिमंचापियद्विषम्॥४७॥अभिचाराणिसर्वाणिमंत्रयं

श्रीदेवी
॥५॥

चाशिभूतले ॥ भूचराः खेचराश्चैव कुलजाश्चोपदेशिकाः ॥४८॥ सहजाकुल
जा मालाडाकिनी शाकिनी तथा ॥ अंतरीक्षेचरा घोरा डाकिन्यश्च महाब
लाः ॥४९॥ ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥ ब्रंह्मराक्षसवेतालाः कु
ष्माण्डभैरवादयः ॥५०॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ मानो
न्नतिर्भवेद्राज्यं तेजोवृद्धिकरं परम् ॥५१॥ यशसा वर्द्धते सोपि कीर्तिमण्डित
भूतले ॥ जपेत्सप्तसतिं चण्डीं कृत्वा तु कवचं पुरा ॥५२॥ यावद्भू[illegible]ण्डलं ध
त्ते सशैलवनकाननम् ॥ यावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रकीम् ॥

कव
॥५॥

श्रीदेवी
॥६॥

५३॥ देहान्तेपरमंस्थानंयत्सुरैरपिदुर्लभम॥ प्राप्नोतिपुरुषोनित्यंमहामाया
प्रसादतः॥५४॥ इतिश्रीहरिहरब्रंह्मविरचितंदेव्याकवचंसम्पूर्णम॥ ॥

कव
॥६॥

॥ इतिश्रीलकवच ॥

४२३५

~~बौ. पूक~~

इन्द्राक्षी स्तोत्रंम्

श्री ५ को सरकार
वाल्मीकि ... पुस्तकालय

इ॰स्तो॰ श्रीगणेशायनमः ॐअस्यश्रीइन्द्राक्षीस्तोत्रमंत्रस्यपुरन्दरऋषिरनुष्टुप्छन्दः श्रीइन्द्राक्षीदे
१ वतालक्ष्मीवीजंभुवनेश्वरीशक्तिर्माहेश्वरीकीलकमिंद्राक्षीप्रसादसिद्ध्यर्थेजपेविनियोगः शि
रसिपुरन्दरऋषयेनमः मुखेअनुष्टुप्छन्दसेनमः हृदिइन्द्राक्षीदेवतायेनमः गुह्येश्रींबी॰
जायनमः पादयोर्ह्रींशक्तयेनमः सर्वाङ्गेक्लींकीलकायनमः इतिऋष्यादिन्यासः अथक
रन्यासः ॐश्रीइन्द्राक्षीअङ्गुष्ठाभ्यान्नमः ॐह्रींमहालक्ष्मीतर्जनीभ्यान्नमः ॐक्लींमाहे
श्वरीमध्यमाभ्यान्नमः ॐश्रींअम्बुजाक्षीअनामिकाभ्यान्नमः ॐह्रींकात्यायनीकनिष्ठि॰
काभ्यान्नमः ॐक्लींमाहेश्वरीकरतलकरपृष्ठाभ्यान्नमः इतिकरन्यासः अथाङ्ग राम:
न्यासः ॐश्रींइन्द्राक्षीहृदयायनमः ॐह्रींमहालक्ष्मीशिरसेस्वाहा ॐक्लींमाहेश्वरीशि॰ १
खायैवौषट् ॐश्रींअम्बुजाक्षीकवचायहुं ॐह्रींकात्यायनीनेत्रत्रयायवौषट् ॐक्लींको

मारीअस्त्रायफट्   इतिहृदयादिन्यासः   अथदिग्बंधनम्   ब्राह्मीमेपूर्वतःपातुमा
हेश्वर्य्यग्निकोणके   कौमारीयाम्यदिक्पातुनैरृत्यांवैष्णवीतथा   वाराहीपश्चिमेपातुना
रसिंहीचवायवीम्   उदीच्यांकालरात्रीचईशान्यानुसरस्वती   भैरवीचोर्द्धतःपायादधस्ता
द्विन्ध्यवासिनी   अथध्यानम्   इन्द्राक्षींद्विभुजांदेवींनानालङ्काराभूषिताम्   प्रसन्न
वदनांध्यायेत्पीनवस्त्रद्वयान्विताम्   वामहस्तेवज्रधरांदक्षिणेचवरप्रदाम्   प्रसन्नव
दनाम्भोजामप्सरोगणसेविताम्   देवींसुसौम्यवदनांपाशाङ्कुशवरप्रदाम्   त्रैलोक्य
मोहिनींदुर्गामिन्द्राणीनामकीर्त्तितां   एवंध्यात्वाततोदेवींवाञ्छितार्थस्यसिद्धये   पूजनी
याप्रयत्नेनस्तोत्रपाठपुरस्सरम्   इन्द्रउवाच   इन्द्राक्षीनामसादेवीदैवतैःसमुदाहृ
ता   गौरीशाकंभरीदेवीदुर्गानाम्नीतिविश्रुता १ कात्यायनीमहाकालीचन्द्रघण्टाम

२·स्तो· ह्रातपा सावित्रीसाचगायत्रीब्रह्माणीब्रह्मवादिनी २ नारायणीभद्रकालीरुद्राणीकृ
२ ष्णपिंगला अग्निज्वालारौद्रमुखीकालरात्रीतपस्विनी ३ मेघस्वनासहस्राक्षीविकटां
गीजलोदरी महोदरीमुक्तकेशीघोररूपामहाबला ४ अजिताभद्रदानन्तारोगहर्त्रीशिव
प्रिया शिवदूतीकरालाक्षीप्रत्यक्षपरमेश्वरी ५ इन्द्राक्षीचेन्द्ररूपाचइन्द्रशक्तिपराय
णा सदासंमोहिनीदेवीसुन्दरीभुवनेश्वरी ६ वाराहीनारसिंहीचभीमाभैरवनादिनी
श्रुतिःस्मृतिर्धृतिर्मेधाविद्यालक्ष्मीसरस्वती ७ अनन्ताविजयापूर्णामानस्तोकापराजि
ता भवानीपार्वतीदुर्गाहैमवत्यम्बिकाशिवा ८ एतैर्नामपदैर्दिव्यैस्तुताशक्रेणधीम
ता ज्वरमृत्युभयंघोरंहरन्तिज्वरनाशिनी ९ चौरव्याघ्रभयंनत्रमनसापिनचिन्तयेत् राम:
आयुरारोग्यमैश्वर्यंज्ञानंवित्तंयशोबलम् १० त्रिसंध्यंयःपठेन्मर्त्योलभतेनात्रसंशयः २

इं·स्तो· शतमावर्त्तयेद्यस्तुमुच्यतेव्याधिबन्धनात् ११ आवर्त्तयेत्सहस्रन्तुलभतेवाञ्छितंफलम्
३ श्री राजानंव[illegible]माप्नोतिषण्मासान्नात्रसंशयः १२ अष्टम्याञ्चचतुर्द्दश्यामिदंस्तोत्रंपठेन्नरः पठ
नस्तस्यनश्यन्तिविघ्नसंघातकारकाः १३ रक्तवस्त्रैश्चपुष्पैश्चरक्तचन्दनचर्च्चितैः धूपैर्दीपैश्च
नैवेद्यैःप्रसन्नाभवतिध्रुवम् १४ प्रातरुत्थायपठनात्षण्मासात्सिद्धिमेतिनरः सन्ध्यासुपा
स्थित्यसर्वकामार्थसिद्धये १५ नाभिमात्रजलेस्थित्वासहस्रपरिसंख्यया जपेत्स्तोत्रमिदं
मन्त्रंवाचासिद्धिर्भवेद्ध्रुवम् १६ कारागृहेयदाबद्धोमध्यरात्रेतदाजपेत् पठेन्मासत्रये
णैवमुच्यतेनात्रसंशयः ७ अनेनविधिनाभक्त्यामंत्रसिद्धिप्रजायते सन्तुष्टाचभवेद्दे रामः
वीप्रत्यक्षंसंप्रजायते १८ इतिश्रीइन्द्राक्षीस्तोत्रंसंपूर्णम् अथमूलमंत्रः ३
ॐ ह्रींश्रींइन्द्राक्षीह्रींश्रींऐंस्वाहा शुभम्

४२३६ ~~नं ५५७~~

रुद्रषडङ्गस्तुतिविधानम्

श्रीः ॥ रत्नैः कल्पितमासनं हिमजलैः स्नानंच दिव्याम्बरं नानारत्नविभूषितं मृगमदामोदांकितं चन्दनं ॥
जातीचंपकबिल्वपत्ररचितं पुष्पंच धूपं तथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यतां ॥१॥ सौ
वर्णे मणिखंड रत्नैरचिते पात्रे घृतं पायसं भक्ष्यं पंचविधं पयोदधियुतं रम्भाफलं पानसम् ॥ शा
कानामयुतं जलं रुचिकरं कर्पूरखंडोज्वलं ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥२॥
छत्रं चामरयोर्युगं व्यजनकं चादर्श ॥ रुद्रपूजा ॥ कं निर्मलं वीणाभेरिमृदङ्गकाहलकला गीतं च
नृत्यं तथा ॥ साष्टांगं प्रणतिस्तुतिर्बहुविधा चैतत्समस्तं मया संकल्पेन समर्पितं तव विभो पूजां
गृहाण प्रभो ॥३॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोगर
चना निद्रा समाधिस्थितिः ॥ संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करो
मि तत्तदखिलं शंभो तवाराधनम् ॥४॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मान
सं वापराधम् ॥ विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शंभो ॥ ॥ शुभम् ॥ ॥

ष·सू·
१

श्रीगणेशायनमः अथषडङ्ग·सूक्तं सहस्तोमाऋचंज्ञात्वा गायत्रीत्रिष्टुभंजपेत् ज्ञात्वागणे
शात्वंजपेत्पुरुषसूक्तकं १ ईशसूक्तंजनोज्ञात्वास्वरसूक्तंपुनर्जपेत् नमस्तेघोऽश्वंज्ञात्वान्यासं
कुर्याद्विधानतः २ षट्पृक्षीनीलसूक्तंचपुनर्योऽष्टाऋक्कृपेत् ॐयतेह्येनमस्मेनत्वंविह्वयमेव
च ३ मीढुष्टमंचचत्वारिवयंसोमाष्टकंजपेत् विश्वतश्चक्षुऋक्कृत्वावाजश्चमेहृदयंततः
४ ऽअग्नाविष्णूद्वयंज्ञात्वाईमामेचैवमंजपेत् यतोयतऋचंज्ञात्वाजपेद्विश्वानिदेवच ५ नम
स्तेह्रेचऋक्कृत्वापयःपृथिव्यामयिसप्तिच विष्णोरराटकंचैवततोग्निर्देवतापुनः ६ द्यौः
शान्तिश्चततोज्ञात्वास्वर्वोमित्रस्यानिच ऋचंवाचंत्रयंज्ञात्वाअपाम्केनेद्वयंजपेत् ७
ईमारुद्राद्वियोऽस्त्वांरूपायेनसंजपेत् तच्चक्षुरितिऋक्कृत्वात्वस्मिनश्चापिसंजपेत्

रामः
१

८ मनोजूतिर्कैचंत्र स्वाननो रुद्रस्य गायत्री एकादशमहारुद्रैरतिरुद्रईजीरितः नवहोमसंख्या
रुद्रसंख्याहोमे प्रतिमन्त्रक्रमेण होमः ॥१२१॥ मुख्य पक्षः दशांशहोमः कनिष्ठपक्षः शतां
शहोमः एवं महारुद्रेतिरुद्रेपि मन्तव्ये आहुतिसंख्यामाह रुद्रसंख्याफलं देवि पृच्छसि यग
होमम एकादश्यादिपारायणं यथावत्कथयामि ते १ संकल्पपूर्वं संपूज्य न्यासांके शुभमन्त्रमाकृ
ते· स्नात्वा पंचामृतेनैव ध्यानपूर्वं शिवं जपेत् २ बालग्रहोपशान्त्यर्थमेकावृत्तिं तु कारयेत्. उ
पसर्गोपशान्त्यर्थं त्रिरावृत्तिं पठेन्नरः ३ ग्रहोपशान्त्यै कर्तव्यं पंचावृत्तिं वरानने महाभये समुत्
पन्ने सप्तावृत्तिं तु धारयेत् ४ नवावृत्त्यैच्छांतिर्वाजपेयफलं लभेत् राजवश्यविभूत्यै च रु
द्रावृत्तिं तु धारयेत् ५ रुद्रैस्त्रिभिः कामसिद्धिर्वैरिहानिश्च जायते रुद्रैः पंचभिः शत्रूंश्च वशनया

स्त्रीवश्यमाप्नुयात् ६ रुद्रैः सप्तभिः सौख्यं स्याच्छ्रीयमाप्नोति मानवः नवरुद्रैः पुत्रपौत्रधन
धान्यसमन्वितः ७ राजभीतिविनाशाय वैरस्योच्चाटनाय च धर्मार्थकाममोक्षाणां साधनाय
ततः परं ८ अल्पमृत्युविनाशाय तथारोग्ययशः श्रिये राजतुष्टिप्रदेयाय महारुद्रैकसंख्यया
९ त्रिभिश्चैव महारुद्रैरसाध्यसाधनाय च पंचभिश्च महारुद्रै राज्यकामः प्रसाध्यते १० सप्तभिश्च
महारुद्रैः सप्तलोकाः प्रसाध्यते नवभिश्च महारुद्रैः पुनर्जन्म न जायते ११ अतिरुद्रैकसंख्येन दे
वत्वं प्राप्नुयान्नरः शाकिन्यादिभये प्राप्ते एकावृत्तिर्जपेन्नरः १२ भूतप्रेतपिशाचानां भये च द्वि
रावृत्तितः ग्रहदोषदशायां च पंचावृत्तिं न संशयः १३ ज्वरातिसारदोषादौ वातपित्तकफा
दिषु सर्वरोगोपशान्त्यर्थं सप्तावृत्त्या न संशयः १४ सर्वार्थसाधनायैव नवावृत्तिं पठेन्नरः अ

साध्यरोगनाशाय मनोंभीप्सितकर्मणे १५ अल्पमृत्युविनाशाय तथारिष्याथवेष्टनः सर्वशांन्तिभवेन्नवग्रहस्थानशांशयः १६ ॐ अद्येत्यादि अमुकगोत्रस्यामुकशर्म्मणो यजमानस्यायुरारोग्यैश्वर्यधनरोनरहर्षविजयोदयपूर्वकसाऽस्यदुःखदुर्भिक्षदौर्मनस्यदौर्भाग्योपसर्गमहामारीवातोल्कापातनिर्घातभूकम्पादिसूचितदोषोपशमनार्थं दुःस्वप्नसुस्वप्नतावाप्तिपूर्वकवालग्रहदशान्तर्दशादुष्टग्रहगोचरदोषोपशान्त्यर्थं वाह्याभ्यान्तरज्वरापस्मारातिसारादिपीडोपशमनार्थं नानाविधविस्फोटकादिरोगोपशान्त्यर्थं अकालमृत्युनिवारणार्थं मनसेप्सितयशुभफलप्राप्त्यर्थं शत्रुपराजयपरसदुर्गयुद्धविजययशमारिपुक्षयश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं समस्तफलंवाप्तये नानाविधकल्पारोगोत्पत्तिसमस्तरोगोपशान्त्यर्थं रुद्राध्यायस्य परमोहि

प.स्व: ऋषिः योसादित्यः पुरुषः सर्व्वरूपो देवता गायत्र्यनुष्टुप्पंक्तिश्छंदांसि अविछिंनजलधारयासि
३ ञ्चेयरिपंचाश्वत्थानपूर्वकशान्तिश्रीयमंवैरविघ्नकायनानानामदुर्म्मांसांश्रातरणामेभिश्चंदन
पुष्पाक्षतपुंगीफलवासोभिस्त्वामहंवृणो ॐ वृतोस्मीति प्रतिवचनं यथाविहितंकर्म्मकुरु ॐ
करवाणीति प्रतिवचनं अपसर्पन्तुयेभूतायेभूताभुविसंस्थिताः येभूताविघ्नकर्त्तारःतेन
श्यन्तुशिवाज्ञया अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम् सर्वेषामविरोधेनाशिवकर्म
समारभेत् अथदिग्बन्धनं ईश्वरायनमः पूर्वे आग्ने श्वरायनमः आग्नेये यमेश्वरायनमो
दक्षिणे निरृते श्वरायनमो निरृतये वरुणेश्वरायनमः पश्चिमे वायवेश्वरायनमो वायव्ये रामः
सोमेश्वरायनमोउदीच्यां ईशानेश्वरायनमईशाने आकाशेश्वरायनमः ऊर्द्ध्वायां अनंतेश्वरा ३

यनमः पृथिव्याम् सर्वेश्वरायनमः सर्वेदिशाः ॐनमोभगवतेरुद्रायेतिदशाक्षरमंत्रेणप्राणाया
मत्रयंकुर्यात् पूरक ३६ १२ कुंभक १२ २४ रेचक ६ १२ १८ अथहृदयादिन्यासः सहस्रोमाः १
यज्जाग्रत २ हृदयायनमः सहस्रशीर्षा १६ शिरसे अद्भ्यःसंभृतः ६ शिखायै आशुःशिशा
नः १० कवचाय नमस्ते १६ अस्त्रायईति ध्यायेन्नित्यंगिरीशंरजतगिरिनिभंचारुचंद्रावतं
सं रत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नं पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्र
कीर्तिवसानं विश्वाद्यंविश्वबंद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं १ शुद्धस्फटिकसं
काशंत्रिनेत्रंपंचवक्त्रकं गंगाधरंदशभुजंसर्वाभरणभूषितं २ नीलग्रीवंशशांकांकंनागय
ज्ञोपवीतिनं गजचर्मपरिधानंव्याघ्रचर्मोत्तरीयकं ३ दिव्यसिंहासनासीनंदिव्यभोगसमन्वि

ष.स्तु. ४ नं शिवं देवताना समायुक्तं उमादेहार्द्धधारिणं ४ स्कंदपुराणोक्तस्तुतिः पुलस्त्य उवाच देवाधि
देवदेवाय त्र्यंवकाय कपर्द्दिने त्रिपुरघ्नाय शर्वाय नमोन्धकनिषूदने १ विरूपायातिरूपाय बहु
रूपाय शंभवे कालांजकाय कालाय कालिनागेश्वराय च २ नमो वृसिरोहवे व्रह्मरूपा नमोनमः
नमस्ते भगनेत्रघ्न भास्करामिततेजसे ३ नमो ईशाय गणेश पूजा पूर्वक शिवपूजां कृत्वा ॐ नमः
शिवायेति जलस्नानं नमः। शंभवाय मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवा
य च शिवतराय च ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदया अथावाहनं
महादेव क्रियते तव तुष्टये आवाहनेन देवेश मम शांतिप्रदो भव आचमनं मयादत्तं चेतपाद्यं पुष्प
गंधसमन्वितं गृहाण देवदेवेश प्रसंनो वरदो भव अर्घं शिवेन वचसा अर्घोसि त्वमुपाकांतवा रामः ४

द्यैनानेनवैद्यभो गृहाणत्वंमयादत्तंप्रसन्नोभवशंकरः आचमनीयं अमृतोचम् आचमनीयंमः
यादत्तंमयाविश्वेश्वरस्पद्वे गृहाणपरमेशानतुष्टोभवमयार्घ्यवे स्नानीयं अमोयः स्नानीयंचमहा
देवदीयतेमवतुष्टये मयादत्तंहिदेवेशगृहाणपरमेश्वरः पुनराचमनीयं अमोयः पुनराचमनीयं
चदीयतेमवतुष्टये गृहाणदेवदेवेशप्रसन्नोभववैद्यभो यज्ञोपवीतं नमोस्तु यज्ञोपवीतंसोवर्णम
यादत्तंचशंकर गृहाणपरमातुष्ट्यतुष्टोभवशंकरः वस्त्रं प्रस्तुत्वं स्नत्वामोमयादत्तंमोनीयंसु
शोभनं गृहाणत्वंसुरश्रेष्ठंममआयुःप्रदोभवः गंधं विद्रुपस्वतुः सुगंधंचंदनंमयादत्तंचवैद्यभो
भक्त्यापरमयाशंभोसुगंधंकुरुमांप्रभो पुष्पं याते पुष्पमस्तुइदंशंभोमयादत्तंसुशोभनं गृहाण
देवदेवेशममकांतिप्रदोभव अक्षता परीते अक्षताश्चमहादेवदीयतेमवशांतये अक्षतांच

पं.वि. प्रदानेनममशांतिप्रदोभव धूपं अवनस्पत्युः धूपंविशिष्टं परमं दिव्यो वधिविजृंभितं गृहाणप
५ रमेशानममशांत्यर्थमेवच दीपं नमस्ते दीपं हि परमं शोभोद्भुतं प्रज्वलितं मया दत्तं गृहाणदेवे
शममज्ञानप्रदोभव दीपावलिमयादत्तं गृहाणपरमेश्वरः आरार्तिक प्रदानेनममतेजप्रदोभव
नैवेद्यं मानः फलपुष्पादिनैवेद्यं तांबूलादिकमेणाच गृहाणत्वं हि देवेशममभोगार्थमेवच
अथपंचामृतस्नानं आप्यायस्वेतिगोतमऋषिः पयोदेवतागायत्रीछंदः दोर्ध्वकेईस्नाना
क्षीरस्नानेविनियोगः ॐ पयः पृथिव्यां गोक्षीरधामदेवेशगोक्षीरेणमयाकृतं स्नपनं देवदे
वेश गृह्णाणपरमेश्वर ततः क्षीरस्नानानंतरं शुद्धोदस्नानं आपोअस्मांमातरेतिप्रजापति रुम्:
ऋषिस्त्रिष्टुप्छंदः आपोदेवताशुद्धोदकस्नानेविनियोगः आपोऽअस्मान्मातरः शुन्धयन्तु घृ ५
तेनः ओषधीजुपयोऽदिव्यन्तरिक्षेपयोधाः पयस्वतिप्रदिशः संतुमह्यम्. ३

मेनतोघृतस्यः पुनन्तु विश्वतः स्वाहा ब्रह्मवरुणादेवीसह दाभ्यः शुचिनापूतममिद्राक्षातयसोम
रसितान्त्वासिवासंसगंधांपरिदधेभद्रंवर्णमुष्यम् पुनः पूजां कृत्वा ॐ भूर्भुवः स्वरिति पूजां
विसर्ज्जयेत् एवंसर्वत्र दधिक्राव्णाइतिवामदेवऋषिर्दधिर्देवताअनुष्टुप्छन्दः पूर्ववक्त्रेतत्पु
रुषायदधिस्नानेविनियोगः दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः सुरभीनोमुखाकर
त्प्रणआयूंषितारिषत् दध्नाचैवमहादेवस्नपनंक्रियतेमया गृहाणेवमयादत्तंसुप्रसं
नोभवाव्यये ॐ घृतंमिमिक्षेतिगृत्समदऋषिः घृतोदेवतात्रिष्टुप्छन्दः पश्चिमवक्त्रेसद्यो
जाताय घृतस्नानेविनियोगः घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रितोघृतम्वस्यधाम· अनुष्व
धमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यम् सर्पिषाचमहादेवस्नापनंक्रियतेमया गृहा

णाश्चद्वयाहृतंनवश्रीस्वर्णमेवच मधुवातेतिगोतमऋषिर्मधुर्देवतागायत्रीछंदोहस्तिगावक्रे
अश्वोरथमधुस्नानेविनियोगः मधुवाताऋतायतेमधुक्षरन्तिसिन्धवः माध्वीर्नःसन्त्वोषधीः
इदंमधुमयाहृतंनवस्तुष्वर्णमेवच गृहाणत्वांहिदेवेशमयाआनीतप्रतीछभव अपाꣳरस:
मित्यस्यइन्द्राबृहस्पतिऋषिस्त्रुष्टुप्छंदः महाशिवोदेवताउत्तरवस्त्रेवासदेवायशर्करस्ना
नेविनियोगः अपाꣳरसमुद्वयसꣳसमाहितम्· अपाꣳरसस्योगृह्णाम्युत्तममुपयामगृही
तोसीन्द्रायत्वाजुष्टꣳ·गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् सितयादेवदेवेशस्नपनंक्रिय
तेमया गृहाणाश्चद्वयाहृतंसुप्रसंनोभवप्रभो एवंपंचामृतेनैवस्नापनीयोवृषध्वजः उपचा
रंचषोडशाकंततःकुर्याच्चबुद्धिमान्· षडंङ्ग·मंत्राणपवंश्रीमहारुद्रलिंगोपार्जआक्लिंनजलधारः

[illegible]

४२३७

~~नं ४५~~

गजेन्द्र मोक्ष स्तोत्रम्

करोतिश्यामलांभूमिंहरिन्मरकताश्मभिः॥४॥ ४

भा॰ १

श्रीगणेशायनमः॥श्रीशुकउवाच॥आसीद्गिरिवरोराजंस्त्रिकूटइतिविश्रुतः॥क्षीरोदेना
वृतःश्रीमान्योजनायुतमुच्छ्रितः॥१॥तावताविस्तृतःपर्यक्त्रिभिःशृंगैःपयोनिधिम्॥दि
शःखंरोचयन्नास्तेरौप्यायसहिरण्मयैः॥२॥अन्यैश्चककुभःसर्वारत्नधातुविचित्रितैः॥
नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसां॥३॥सचावनिज्यमानांघ्रिःसमंतात्पयऊर्मिभिः
॥सिद्धचारणगंधर्वविद्याधरमहोरगैः॥किन्नरैरप्सरोभिश्चक्रीडद्भिर्जुष्टकंदरः॥५॥यत्रसं
गीतसन्नादैर्नदद्गुहममर्षया॥अभिगर्जंतिहरयःश्लाघिनःपरशंकया॥६॥नानारण्यप
शुव्रातसंकुलद्रोण्यलंकृतः॥चित्रद्रुमसुरोद्यानकलकंठविहंगमः॥७॥सरित्सरोभिरच्छो
दैःपुलिनैर्मणिवालुकैः॥देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः॥८॥तस्यद्रोण्यांभ
गवतोवरुणस्यमहात्मनः॥उद्यानमृतुमन्नामआक्रीडंसुरयोषिताम्॥९॥सर्वतोलंकृ

हरिः १

तं दिव्यैर्नित्यपुष्पफलद्रुमैः ॥ मंदारैः पारिजातैश्च पाटलाशोकचंपकैः ॥१०॥ चूतैः प्रियालैः
पनसैराम्रैराम्रातकैरपि ॥ क्रमुकैर्नारिकेलैश्च खर्जूरैर्बीजपूरकैः ॥११॥ मधुकैः शालतालैश्च तमा
लैरसनार्जुनैः ॥ अरिष्टोडुंबरप्लक्षैर्वटैः किंशुकचंदनैः ॥१२॥ पिचुमंदैः कोविदारैः सरलैः सुरदा
रुभिः ॥ द्राक्षेक्षुरंभाजंबूभिर्वदर्यक्षाभयामलैः ॥१३॥ विल्वैः कपित्थैर्जंबीरैर्दंतीभल्लातकादि
भिः ॥ यस्यैकं कांचनं शृंगं सेवते वै दिवाकरः ॥१४॥ अपरं राजतं शृंगं सेवते वै निशाकरः ॥ तृतीयं
ब्रह्मसदनं प्रकृष्टं शृंगमुत्तमं ॥१५॥ न तत्कृतघ्नाः पश्यंति न नृशंसा न नास्तिकाः ॥ न तप्ततपसो
लोके ये च पापकृतो जनाः ॥१६॥ तस्मिन्सरः सुविपुलं लसत्कांचनपंकजं ॥ कुमुदोत्पलकह्लार
शतपत्रश्रियार्जितं ॥१७॥ मत्तषट्पदनिर्घुष्टं शकुंतैश्च कलस्वनैः ॥ हंसकारंडवार्किरौंच
क्राह्वैः सारसैरपि ॥१८॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजिताम् ॥ मत्स्यकच्छपसंचारच

भाः लत्पद्मरजःपयः॥१९॥ कदंववेतसनलनीपवञ्जुलकैर्वृतम्॥ कुंदैः कुरवकाऽशोकैः शिरी
२ षैः कुटजेङ्गुदैः॥२०॥ कुब्जकैः स्वर्णयूथीभिर्नागपुन्नागजातिभिः॥ मल्लिकाशतपत्रैश्च मा
धवीजालकादिभिः॥२१॥ शोभितंतीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः॥२१॥ तत्रैकदात द्गि
रिकाननाश्रयः करेणुभिर्वारणयूथपश्चरन्॥ सकणटकां कीचकवेणुवेत्रवद्विशालगुल्मं
प्ररुजन्वनस्पतीन्॥२२॥ यद्गन्धमात्राद्धरयो गजेन्द्रा व्याघ्रादयो व्यालमृगाः सखड्गाः॥ महोर
गाश्चापि भयाद्द्रवन्ति सगौरकृष्णाः सरभाश्चमर्यः॥२३॥ वृका वराहा महिषर्क्षशल्या गोपुच्छशा
लावृकमर्कटाश्च॥ अन्यत्र क्षुद्रा हरिणाः शशादयश्चरन्त्यभीता यदनुग्रहेण॥२४॥ सघर्म
तप्तः करिभिः करेणुभिर्वृतो मदच्युत्करभैरनुद्रुतः॥ गिरिं गरिम्णा परितः प्रकंपयन्निषे हरिः
व्यमाणोऽलिकुलैर्मदाशनैः॥२५॥ सरोऽनिलं पङ्कजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्ष २

जै २

रा:॥वृतःस्वयूथेनतृषार्दितेनतत्सरोवराऽभ्यासमथाऽगमद्द्रुतम्॥२६॥विगाह्यतस्मिन्नमृता
म्बुनिर्म्मलंहेमारविन्दोत्पलरेणुवासितम्॥पपौनिकामंनिँपुष्करोद्धृतमात्मानमद्भिःस्नप
यन्गतक्लमः॥२७॥स्वपुष्करेणोद्धृतशीकरांवुभिर्निपाययन्संस्नपयन्यथागृही॥घृणी
करेणुःकलभांश्चदुर्मदोनाचष्टकृच्छ्रंकृपणोऽजमायया॥२८॥तंतत्रकश्चिन्नृपदैवचोदि
तोग्राहोवलीयँश्चरणेरुषाऽग्रहीत्॥यदृच्छयैवंव्यसनंगतोगजोयथावलंसोतिवलोविच
क्रमे॥२९॥तथातुरंयूथपतिंकरेणवोविकृष्यमाणंतरसावलीयसा॥विचुक्रुशुर्दीनधियोऽ
परेगजाःपार्ष्णिग्रहास्तारयितुंनचाशकन्॥३०॥नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंत
रतोवहिर्मिथः॥समाःसहस्रंव्यगमन्महीपतेसप्राणयोश्चित्रममंसतामराः॥३१॥ततोगजेंद्र
स्यमनोवलौजसांकालेनदीर्घेणमहानभूद्व्ययः॥विकृष्यमाणस्यजलेऽवसीदतोविपर्ययोभूऽ

त्मकलं जलौकसः॥३२॥ इत्थं गजेंद्रः स यदाप संकटं प्राणस्य देही विवशो यदृच्छया॥ अपारयन्ना
त्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत॥३३॥ न मामिमे ज्ञातय आतुरं गजाः कुतः क
रिण्यः प्रभवंति मोचितुम्॥ ग्राहेण पाशेन विधातुरावृतोप्यहं च तं यामि परं परायणं॥३४॥
यः कश्चनेशो वलिनोंतकोरगात्प्रचंडवेगादभिधावतो भृशम्॥ भीतं प्रपन्नं परिपाति यद्भया
न्मृत्युः प्रधावत्यरणं तमीमहि॥३५॥ इति श्रीमद्भागवते महापुराणे अष्टमस्कंधे गजेंद्रोपाख्या
ने नाम द्वितीयोध्यायः॥२॥ बादरायणिरुवाच॥ एवं व्यवसितो बुद्ध्या समाधाय मनो हृदि॥ जजा
प परमं जाप्यं प्राक्जन्मन्यनुशिक्षितम्॥१॥ गजेंद्र उवाच॥ ओं नमो भगवते तस्मै यत एतच्चि
दात्मकम्॥ पुरुषायादिवीजाय परेशायाभिधीमहि॥२॥ यस्मिन्निदं यतश्चेदं येनेदं य इ
दं स्वयम्॥ योस्मात्परस्माच्च परस्तं प्रपद्ये स्वयंभुवम्॥३॥ यः स्वात्मनीदं निजमाययार्पितं क्व

चिद्विभातंक्वचतत्तिरोहितम॥अविद्धदृक्साक्ष्युभयंतदीक्षतेसआत्ममूलोऽवतुमांपरात्प
रः॥४॥कालेनपंचत्वमितेषुकृत्स्नशोलोकेषुपालेषुचसर्वहेतुषु॥तमस्तदासीद्गहनंगभीरं
यस्तस्यपारेऽभिविराजतेविभुः॥५॥नयस्यदेवाऋषयःपदंविदुर्जन्तुःपुनःकोऽर्हतिगन्तुमीरितु
म्॥यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययाऽनुक्रमणःसमावतु॥६॥दिदृक्षवोयस्यपदं
सुमङ्गलंविमुक्तसङ्गामुनयःसुसाधवः॥चरन्त्यलोकव्रतमव्रणंवनेभूतात्मभूताःसुहृदः
समेगतिः॥७॥नविद्यतेयस्यचजन्मकर्मवाननामरूपेगुणदोषएववा॥तथापिलोका
प्ययसंभवाययःस्वमाययातान्यनुकालमृच्छति॥८॥तस्मैनमःपरेशायब्रह्मणेऽनन्तश
क्तये॥अरूपायोरुरूपायनमआश्चर्यकर्मणे॥९॥नमआत्मप्रदीपायसाक्षिणेपरमात्मने
॥नमोगिरांविदूरायमनसश्चेतसामपि॥१०॥सत्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिता॥नमः

कैवल्यनाथायनिर्वाणसुखसंविदे।।११।।नमःशान्तायघोरायमूढायगुणधर्मिणे।।निर्विशेषा
यसाम्यायनमोज्ञानघनायच।।१२।।क्षेत्रज्ञायनमस्तुभ्यंसर्वाध्यक्षायसाक्षिणे।।पुरुषायात्म
मूलायमूलप्रकृतयेनमः।।१३।।सर्वेन्द्रियगुणद्रष्ट्रेसर्वप्रत्ययहेतवे।।असताच्छाययोक्ताय
सदाभासायतेनमः।।१४।।नमोनमस्तेऽखिलकारणायनिष्कारणायाऽद्भुतकारणाय।।सर्वा
गमाम्नायमहार्णवायनमोऽपवर्गायपरायणाय।।१५।।गुणारणिछन्नचिदूष्मपायतत्क्षो
भविस्फूर्जितमानसाय।।नैष्कर्म्यभावेनविवर्जितागमस्वयंप्रकाशायनमस्करोमि।।
१६।।मादृक्प्रपन्नपशुपाशविमोक्षणायमुक्तायभूरिकरुणायनमोलयाय।।स्वांशेनस
र्वतनुभृन्मनसिप्रतीतप्रत्यग्दृशेभगवतेबृहतेनमस्ते।।१७।।आत्मात्मजाप्तगृहवित्तज
नेषुसक्तैर्दुष्प्रापणायगुणसङ्गविवर्जिताय।।मुक्तात्मभिःस्वहृदयेपरिभावितायज्ञाना

त्मनेभगवतेनमईश्वराय॥१८॥यंधर्मकामार्थविमुक्तिकामाभजंतइष्टांगतिमाप्नुवन्ति
॥किंचाशिषोरात्यपिदेहमव्ययंकरोतुमेऽदभ्रदयोविमोक्षणम्॥१९॥एकांतिनोयस्यन
कंचनार्थंवांछंतियेवैभगवत्प्रपन्नाः॥अत्यद्भुततच्चरितंसुमंगलंगायन्तआनन्दसमु
द्रमग्नाः॥२०॥तमक्षरंब्रह्मपरंपरेशमव्यक्तमाध्यात्मिकयोगगम्यम्॥अतीन्द्रियंसुक्ष्ममि
वाऽतिदूरमनन्तमाद्यंपरिपूर्णमीडे॥२१॥यस्यब्रह्मादयोदेवावेदालोकाश्चराचराः॥नाम
रूपविभेदेनफल्ग्व्याचकलयाकृताः॥२२॥यथाऽर्चिषोऽग्नेसवितुर्गभस्तयोनिर्यान्तिसं
यान्त्यऽसकृत्स्वरोचिषः॥तथायतोऽयंगुणसंप्रवाहोबुद्धिर्मनःखानिशरीरसर्गाः॥२३॥
सवैनदेवोऽसुरमर्त्यतिर्यङ्नस्त्रीनषण्ढोनपुमान्नजन्तुः॥नायंगुणःकर्मनसन्नचाऽसन्निषे
धशेषोजयतादशेषः॥२४॥जिजीविषेनाऽहमिहाऽमुयाकिमन्तर्बहिश्चावृतयेभयोन्या॥२

दा

भाः
५

च्छामिकालेननयस्यविप्लवस्तस्यात्मलोकावरणस्यमोक्षम्॥२५॥सोहंविश्वसृजंविश्वमवि
श्वंविश्ववेदसम्।विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदम्॥२६॥योगरन्धितकर्माणोहृदि
योगविभाविते।योगिनोयंप्रपश्यन्तियोगेशंतंनतोस्म्यहम्॥२७॥नमोनमस्तुभ्यमसह्यवेगशक्ति
त्रयायाऽखिलधीगुणाय।प्रपन्नपालायदुरन्तशक्तयेकदिन्द्रियाणामनवाप्यवर्त्मने॥२८॥ना
यंवेदस्वमात्मानंयच्छक्त्याहंधियाहतम्।तंदुरत्ययमाहात्म्यंभगवंतमितोस्म्यहम्॥२९॥श्री
शुकउवाच॥एवंगजेन्द्रमुपवर्णितनिर्विशेषंब्रह्मादयोविविधलिंगभिदाभिमानाः।नैते
यदोपसस्रुपुर्निखिलात्मकत्वात्तत्राखिलामरमयोहरिराविरासीत्॥३०॥तंतद्वदार्तमुपल
भ्यजगन्निवासस्तोत्रंनिशम्यदिविजैःसहसंस्तुवद्भिः।छन्दोमयेनगरुडेनसमुह्यमानश्च
क्रायुधोऽभ्यगमदाशुयतोगजेन्द्रः॥३१॥सोन्तःसरस्युरुबलेनगृहीतआर्तोदृष्ट्वागरुत्मति

हरिः
५

हरिं खउपात्तचक्रम्॥ उत्क्षिप्यसांवुजकरंगिरमाहकृच्छ्रान्नारायणाखिलगुरोभगवन्नम
स्ते॥३१॥ तंवीक्ष्यपीडितमजःसहसावतीर्य्यसग्राहमाशुसरसःकृपयोज्जहार॥ ग्राहाद्विपाटि
तमुखादरिणागजेन्द्रंसंपश्यतांहरिरमूमुचदुस्रियाणाम्॥३३॥ ॥१०१॥ ॥इतिश्रीभागव
तेमहापुराणेऽष्टमस्कन्धेगजेन्द्रमोक्षणंनामतृतीयोध्यायः॥ ३ ॥श्रीशुकउवाच॥ तदा
देवर्षिगन्धर्वाब्रह्मेशानपुरोगमाः॥ मुमुचुःकुसुमासारंशंसंतःकर्म्मतद्धरेः॥१॥ नेदुर्दुन्दुभ
योदिव्यागन्धर्वानन्नृतुर्जगुः॥ ऋषयश्चारणाःसिद्धास्तुष्टुवुःपुरुषोत्तमम्॥२॥ योसौग्राहः
सवैसद्यःपरमाश्चर्य्यरूपधृक्॥ मुक्तोदेवलशापेनहूहूगन्धर्वसत्तमः॥३॥ प्रणम्यशिरसाधी
शमुत्तमश्लोकमव्ययम्॥ अगायतयशोधामकीर्तन्यगुणसत्कथम्॥४॥ सोऽनुकंपितईशेन
परिक्रम्यप्रणम्यतम्॥ लोकस्यपश्यतोलोकंस्वमगान्मुक्तकिल्बिषः॥५॥ गजेन्द्रोभगवत्स्पर्शा

द्विमुक्तोऽज्ञानबन्धनात्॥ प्राप्तो भगवतो रूपं पीतवासाश्चतुर्भुजः॥६॥ स वै पूर्वमभूद्राजा पा
ण्ड्यो द्रविडसत्तमः॥ इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः॥७॥ स एकदाराधनकाल आ
त्मवान्गृहीतमौनव्रत ईश्वरं हरिम्॥ जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाच
लाश्रमः॥८॥ यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः॥ तं वीक्ष्य तूष्णी
मकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह॥९॥ तस्मा इमं शापमदादसाधुरयं दुरा
न४ त्माकृतबुद्धिरद्य॥ विप्रावमन्ता विशतां तमोऽन्धं यथा गजस्तब्धमतिः स एव॥१०॥ श्रीशुक उ
वाच॥ एवं शप्त्वा गतोऽगस्त्यो भगवान्सानुगः॥ इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारय
न्॥११॥ आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम्॥ हर्यर्चनानुभावेन यद्गजत्वेऽप्य
नुस्मृतिः॥१२॥ एवं विमोक्ष्य गजयूथपमब्जनाभस्तेनापि पार्षदगतिं गमितेन युक्तः॥ गंध

हरिः
६

र्वसिद्धविबुधैरुपगीयमानकर्माऽद्भुतं स्वभवनं गरुडासनोऽगात् ॥१३॥ एतन्महाराज त
वेरितो मया कृष्णाऽनुभावो गजराजमोक्षणम् ॥ स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्नना
शं कुरुवर्य शृण्वताम् ॥१४॥ यथानुकीर्त्तयन्त्येतच्छ्रेयस्कामा द्विजातयः ॥ शुचयः प्रातरुत्था
य दुःस्वप्नाद्युपशान्तये ॥१५॥ इदमाह हरिः प्रीतो गजेन्द्रं कुरुसत्तम ॥ शृण्वतां सर्वभूता
नां सर्वभूतमयो विभुः ॥१६॥ ॥श्रीभगवानुवाच॥ ये मां त्वां च सरश्चेदं गिरिकन्दरकान
नम् ॥ वेत्रकीचकवेणूनां गुल्मानि सुरपादपान् ॥१७॥ शृंगाणीमानि धिष्ण्यानि ब्रह्म
णो मे शिवस्य च ॥ क्षीरोदं मे प्रियं धाम श्वेतद्वीपं च भास्वरम् ॥१८॥ श्रीवत्सं कौस्तुभं मा
लां गदां कौमोदकीं मम ॥ सुदर्शनं पाञ्चजन्यं सुपर्णं पतगेश्वरम् ॥१९॥ शेषं च मत्कलां
सूक्ष्मां श्रियं देवीं मदाश्रयाम् ॥ ब्रह्माणं नारदमृषिं भवं प्रह्लादमेव च ॥२०॥ मत्स्यकूर्मवरा

द

भा: हाद्यैरवतारैः कृतानिमे॥कर्माण्यनंतपुण्यानि सूर्यं सोमंहुताशनम्॥२१॥प्रणवं सत्यमव्यक्तं
गोविप्रान्धर्ममव्ययम्॥दाक्षायणीर्द्धर्मपत्नीः सोमकश्यपयोरपि॥२२॥गंगां सरस्वतीं नन्दां का
लिन्दीं सितवारणम्॥ध्रुवं ब्रह्मऋषीन्सप्तपुण्यश्लोकांश्च मानवान्॥२३॥उत्थायायऽपररात्रां
ते प्रयताः सुसमाहिताः॥स्मरंति मम रूपाणि मुच्यंते ह्येनसोऽखिलात्॥२४॥ये माँ स्तुवन्त्यने
नांग प्रतिबुध्य निशात्यये॥तेषां प्राणात्यये चाहं ददामि विमलां मतिम्॥२५॥श्रीशुक उवा
च॥इत्यादिश्य हृषीकेशः प्रध्माय जलजोत्तमम्॥हर्षयन्विबुधानीकमारुरोह खगाधिपम्
॥२६॥इति श्रीभागवते महापुराणेऽष्टमस्कन्धे गजेन्द्रमोक्षणं चतुर्थोध्यायः॥४॥श्रीशाके
१७१२ श्रीसंम्वत् १८४७ नेपाली ९१० चैत्रवदि १३ रोज १ लिखितम् श्रीगजेन्द्रमोक्षणं हरिः
नाम पुस्तकम् समाप्तम् संम्पूर्णम्॥राम कृष्णाय नमः॥गोविन्दाय नमः॥शुभम्॥

४२३३ ~~नं. ५५~~

कालिकासहस्रनाम स्तोत्रम्

श्री ५ को सरकार
[illegible]

का.
१

श्रीगणेशाय नमः ॥ अथ महत्वनाम ॥ कैलाशशिखरे रम्ये नानादेवगणावृते ॥ नानावृक्षलताकीर्णे ना
नापक्षिरवैर्युते ॥१॥ चतुर्मण्डलसंयुक्ते शृंगारमंडपे स्थिते ॥ समाधौ संस्थितं शान्तं क्रीडन्तं योगिनीप्रियं ॥
२॥ तत्र मौनधरं दृष्ट्वा देवी पृच्छति शंकरं ॥ श्रीदेव्युवाच ॥ किं त्वया जप्यते नाथ किं त्वया स्मर्यते सदा ॥३॥ सृष्टि
कुत्र विलीनास्ति पुनः कुत्र प्रजायते ॥ ब्रह्माण्डकारणं किं तत् किमाद्यं कारणं महत् ॥४॥ मनोरथमयी सिद्धिर्वा
सिद्धिः कथ्या शिवा ॥ भुक्तीया कल्पनासिद्धिः कोटिसिद्धिः परं त्वकां ॥५॥ ज्ञाक्रियानादृष्टाकं चराचरभुवनाश्रयः
महेशजालसिद्धादिजालानां रचनाकथा ॥६॥ अणिमादेव चरत्वं च परकायप्रवेशनं ॥ नवीनसृष्टिकरणं स
मुद्रशोषणं तथा ॥७॥ अमायां चन्द्रसंदर्शो दिवा चन्द्रप्रकाशनं ॥ चन्द्रादृकं चादृष्टिस्तम्भनं तथा सूर्यादृकं शिवा ॥
गजलेशलमथन्नं च वज्रोवह्निमयपत्वकं ॥ ब्रह्मविद्यादिनिर्माणसिन्धारणं करणं चणं ॥८॥ पादुका गुटिका
यक्षीवेतालापंचकं तथा ॥ स्वापणां तथा गुप्तिस्तथैव च विलासनां ॥१०॥ महामधुमतीसिद्धिः कथ्यापघावना

रामः
१

शिवाज्ञया भोगवन्ति सिद्धिर्यावत्यः सन्ति सिद्धयः ॥ १ ॥ केन मंत्रेण जपता कलौ पापसमाकुले । आयुष्यैश्वर्य
रहिते कथं भवति नहृदा ॥ २ ॥ श्रीशिव उवाच । विना मंत्रं विना स्तोत्रं विनैव जपता प्रिये । विना ध्यानं विना यंत्रं विना
पूजां विना प्रिये ॥ ३ ॥ विना बलिं विना न्यासं भूतशुद्धिं विना प्रिये । विना केशादिभिर्देवि देहदुःखादिभिर्वि
ना ॥ ४ ॥ सिद्धिराशु भवेद्येन तन्ते देव कथ्यते मया । शृण्व ब्रह्माण्डगोलेषु पंचाशत्कुन्मसध्यगो ॥ ५ ॥ यं च स्वर्गस्थ
थिता नाना सर्वाजे कालिका स्थिता । अनन्तकोटिब्रह्माण्ड राजहन्त्री एकेशिवा ॥ ६ ॥ दात्या व्यष्टि न्यालयं कृत्वा कृ
त्स्नवर्णं विधाय च । महानिर्गुणरूपा तु वाचातीता परा कला ॥ ७ ॥ क्रीडया स्वस्वरूपं तु भर्तारं तु प्रकल्पयेत् ॥ स्व
दृशं भवकार्यार्थं छायायाहृत्य तदा मया ॥ ८ ॥ छायाशक्तिश्च सा जाता तया कालो विनिर्मितः ॥ स्वनिर्विंमतं दृष्टं जा
ता ज्ञानाविधा तु सा ॥ ९ ॥ स्वेच्छया तु किं विशिष्टं ज्ञानं विज्ञानकं परम् । शक्तिया विधा जाता नानारूपा इच्छाता महेश्वरि
१० ब्रह्माण्डगोलं देवेशि राजहन्त्री स्थितं च यत् ॥ साकृपा स्या पश्यामास स्वस्वस्थानकर्मणा च ॥ ११ ॥ अतः वेद

का. स्वेछया देवी सा कामरूपपरायणा ॥ महेछा कथ्यते देवी यथा वदस्व दारया ॥२२॥ प्रभुणात्तत्समये देवी शिवं परशु
२ णोत्तरां ॥ तादृच्छां निर्गुणां शान्तां सच्चिदानन्दविग्रहां ॥२३॥ कामपत्नं सुन्दरां सुलक्षं सर्वदेवस्तुतं वरां ॥ आदिनाः
थं शरणानीतं कात्यायनीं संस्तुनीमीश्वरां ॥२४॥ अथवा परात्परं देवं कामरूपपरायणां ॥ स्तुत्वा र्थं मा गता नन्देवगणवर्का
मरस्यो गराज्ञा ॥२५॥ पा॥ यक्षिणी किंनरी मर्त्या सर्वे रूपा धारिणी लोकमाता ॥ श्री सनन्माय पद्मा ब्राह्मी सुन्दरी ब्राणाव
क्षमो ॥२६॥ धासे लोकसुन्दरी ब्राणस्वामिनि ब्राणरंजिनी ॥ किमागतं भवत्याद्य ममभाग्याणी वो महानाम ॥२७॥
उक्ता सोन धरां शंभु सृजयस्य कारोगणाः ॥ गंधर्वा ऊचुः संहारानारिनं देव त्वं का विश्वजनप्रियः ॥२८॥ दानाद्दृ
रां भकार्यार्थ सुघुज्ञो सि महादभो ॥ मैरपा हम्बमिनन्देवं गलार्थं प्रणातानां ॥२९॥ शवयोगो नावकालेन समा
त्मे प्रगायन स्तुगाधारं भकालो हिवर्तने स्तुढुं शंकर ॥३०॥ इत्युक्ता ते कोटयः सखि तस्या प्रपश्य विन्दुन ॥ ब्रह्मा रामः
णी वैष्णविनाच्च माहेश्वरी कोटिकोटयः ॥३१॥ भवकामरूपानन्ददर्शनार्थं समुद्भवा ॥ तं जाता नाच्चा गता दैवचा २

चास्माकं मोक्षसागरः ॥३४॥ निहत्वा कामिनं नान्यं मोक्षं महेश्वर ॥ कारणैर्दृश्यतेस्माभिर्महन्मोक्षार्थका
रकाः ॥३५॥ एवमेव तु चास्माभि कर्तव्यं भर्तृशासनम् ॥३६॥ एवं श्रुत्वा महादेवो ध्यानावस्थितमानसः ॥३७॥ ध्यानं
हित्वाथ मायानु प्रोवाच कालिकां प्रति ॥ भैरव उवाच ॥ कालिकालिहृण्डमाले प्रिये भैरवनादिनि ॥३८॥
शिवाहपधरे क्रूरे घोरदंष्ट्रे भयानके ॥ त्रैलोक्यभक्षणकरी तुन्दर्पः शक्तिनेत्रन ॥३९॥ धात्तुन्दरीवीक्षणां क
र्मकार्यं कालप्रियो ज्ञिवा ॥ ध्यानं तु च महादेवी नाः गच्छन्ति गृहं प्रति ॥४०॥ नवरूपं महाकालि महाकाल
प्रियंकरी ॥४१॥ नासां तु न्दरं रूपं त्रैलोक्यप्रियकारकं ॥४२॥ एवं मायाप्रभाविष्टो महाकालो वदतान्त्राविर्दद
कालवचः श्रुत्वा कालं प्राह कालिका ॥४३॥ मायया छाद्य चास्मानं निजश्रीरूपधारणी ॥४४॥ नः प्रभृति श्री
मात्वं भविष्यन्ति युगे युगे ॥४५॥ त्वा यो घो तं यो देवि दिवावहित्रि स्वरूपणां ॥ तो श्रीरूपमासाद्य क्रीडन्ती
च परस्परं ॥४६॥ अज्ञानं चैव सर्वेषां भविष्यन्ति युगे युगे ॥ एवं ज्ञात्वा प्रदत्तानु पुनः प्रोवाच कालिका ॥४७॥

विपरीतरतिं कृत्वा चिन्तयन्ति भजन्ति ये तेषां वरप्रदास्यामि तत्र नित्यं वसाम्यहं ॥४३॥ इस्तुत्वा कालिकावि
धानत्रैवा नरध्यायन्नात्रं शास्त्रिरवर्वषट् हन्नवस्तुर्द्देकोटय ॥४४॥ दर्शनार्थं नपश्ये देशावैकुत्वगनाद्य
यामि नमामि प्रभपादे देवि हाहा मामि विद्यामना ॥४५॥ किं करोमि क गच्छामि इत्येवं भ्रमसंकुलो ॥ नदाकाल्या
कृतानात्मनि मचिन्ता परः शिव ॥४६॥ धांपं तत्र प्रमाद रुद्रकुकाल्याद् नाम्नि मन्त्रं ॥ पंचशाननदर्म्य पूर्व्ववः
तेशानगोचरां ॥४७॥ श्रीचक्रराज प्रमादरचनाभ्या मनस्यर ॥४८॥ नमन्तिधाम्यमारात्रे लोकं चक्रमध्य
गां ॥४९॥ तवकपारं दर्शनार्थं कोटगुं दगुं गंगना ॥ नक्रमामि विद्यादेवि महाश्री चक्रनायिका ॥५०॥ श्रीत्वाविन्दो
परं हृद्यं भ्रदर्शु मनोहरां ॥ रूपं तानं महेशानि तात्रिपुरसुन्दरा ॥५१॥ रूपं द्वा महादेवो राजराजेश्वरो हयन्
ता ॥ मस्याकदाद्यमात्रेतान स्यारूपधरः शिव ॥५२॥ विनाशंगारसंभुक्ता नदाताना महेश्वरा ॥५३॥ विना कालं
दानो देवि जगत्स्यावरं जंगमां ॥५४॥ यतीनश्चंगारो नदाकि त्वं क्वापि नास्ति महेश्वरी ॥ तुन्दर्य प्रार्थिता कालीकुट्टा

त्रोवाच कालिकां ॥ ३ ॥ त्वं वै यां नेत्रकेशेषु ममां श्रोत्रं भविष्यति ॥ सर्वाङ्गव्यापकं देवेशि मम मां शक्तिरूपि
णि ये ॥ ४ ॥ सा त्वं व्यापकतत्त्वात्तद्व्योमे नैव तिष्ठति तद्वक्राणां महेशानि सततं तिष्ठति तिष्ठन्ति ॥ ५
॥ शक्तिलकुं भितातानि न्याहमत्र सुरेशानि चेत् भविष्यति मलिनात्मा तन्त्र सुरेशानि ॥ ६ ॥ घोरसत्तां
शिष्यत्वा ध्यानपरा काली चिन्तनतत्परा ॥ ७ ॥ नरा काली त्वन्तायुक्तास्तान्त्यजेत् महेश्वरि ॥ ८ ॥ वरं ब्रूहि वरं ब्रूहि
वरं ब्रूहि तत्सन्तोषा ~~सुर्तुकाचा~~ मम शक्तिं परां देहि वरोवं चापि तेन मया ॥ ९ ॥ तं तोष्टुं नायं कथयते न श
क्तिर्भविष्यति कालुवाच मम नाम सहस्रञ्च मया दृष्टं विशिष्टितं ॥ १० ॥ सत्यरूपं कारणं त्वं महासत्त्वा
त्मानायकं वरहानाभिधं नाम सहस्रार्द्धं हरणायकं ॥ ११ ॥ तत्सत्त्वं महामायेन च शक्तिर्भविष्यति ॥ अतः प्र
भृति श्रीविद्यातन्त्राय पारतन्त्र्यतां ॥ १२ ॥ तदेव नाम सहस्रं सुन्दरी शक्तिदायकं कथ्यते परया भक्त्या साध
यत्वं महेश्वरि ॥ १३ ॥ मधेमांसेल व्याप्रकैः शैवैरक्षैश्च व्याप्रयोगतर्पयेत् स्तुतये त्काली विपरीतरतीचरेत् ॥

।८३। विपरीतरतो देवि कालीनिष्ठमिमं पठेत्। साधकः कथुकतुष्यात्तु मैथुनात्तु विराजते ।८४। भावेन वी
आपकाविद्या सम्प्रशान्तस्यासिन्नी पञ्चमीरसाधनं सुदृढीरस्फालनं नाशिन्या ।८५। पूजिता बलिप
दृष्टा नाशिता च स्यादि चण्डिकाकामानन्दपरस्तोत्रपाठनात्सुखमानसा ।८६। चन्द्रसानन्दपरमानन्दे
सुनानन्दनोषिणी कोपिना हृदयास्ता तां देवाशिस्त्रविपर्यया ।८७। विपरीतारतादेशोऽविपरीतरतानु
रासक्षरणा तु द्रा च ब्रह्मसाक्षात्समाला त्रयप्रिया ।८८। पावलिवेद्रहस्तो युक्ताकेशो दिगम्बराविभूषितः । हाथ्याःस्य
नानन्दीवेद्यापासुङ्कपराजयतां ।८९। यपठेत्सहस्रनामास्यमेधासोत्रासनामकांयपादिव्याष्टके:
।९। प्रथमस्तंत्रासराणमात्रनः ।९०। मन्त्रवानेन महाकाली ब्रह्मसत्रावरणमात्रनः । कथ्यते नामसाहस्रं सावधान
मनाः शृणु ।९१। सर्वसाधारस्मेधासस्यनाम साहस्रकस्य च महाकालऋषिर्वीरुष्णिक् छन्दः श्रीकाली
कादेवता ह्रीं बीजं कालीमायाबीजं हूं शक्तिः कालीकाबीजं कीलकं परकारीं ।९२। ओं काल

कावरणनादि स्वेष्टार्थेविनियोग॥ कीलकेन षडंगानि षड्दीर्घायेन कारयेत्॥१८ ध्यानं च पूर्ववंकृत्वा साध
येत्स्वेष्टसाधनं॥ ॐ अस्य श्रीमाद्याद्यहाकालीहृदयककाराद्यसहस्रनामस्तोत्रस्य महाकालऋषिरुष्णिक्छ
न्दः॥ श्रीदक्षिणकालिका देवता ह्रीं बीजं हूं शक्तिः क्रीं कीलकं श्रीदक्षिणकालिकावरदानादिस्वेष्टार्थेजपेवि
नियोगः॥ ऋष्यादिन्यासः॥ ॐ महाकालभैरवऋषये नमः॥ शिरसि॥ उष्णिक्छन्दसे नमो मुखे॥ श्रीदक्षिणकालि
देवतायै नमो हृदि॥ ह्रीं बीजाय नमो गुह्ये॥ हूं शक्तये नमो पादयोः॥ क्रीं कीलकाय नमः सर्वाङ्गे॥ इति अङ्गन्यासः॥
अथ करन्यासः॥ क्रां अंगुष्ठाभ्यां नमः॥ क्रीं तर्जनीभ्यां नमः॥ क्रूं मध्यमाभ्यां वषट्॥ क्रैं अनामिकाभ्यां नमः॥
क्रौं कनिष्ठिकाभ्यां वौषट्॥ क्रः करतलकरपृष्ठाभ्यां फट्॥ अथ देहन्यासः॥ क्रां हृदयाय नमः॥ क्रीं शिरसे स्वा
हा॥ क्रूं शिखायै वषट्॥ क्रैं कवचाय हुं॥ क्रौं नेत्रत्रयाय वौषट्॥ क्रः अस्त्राय फट्॥ अथ ध्यानं॥ सद्यश्छिन्नशिरः॥
कृपाणमभयं हस्तैर्वरं विभ्रतीं घोरास्यां शिरसां स्रजं सुरुचिरांमुन्मुक्तकेशावलीम्॥ सृक्कासृक्प्रवहां श्म

का.
५

शाननिलयांघ्रुन्मोः शवालंकृतीक्ष्णामाङ्गी कृतमेखलां शवकरैर्देवीं भजे कालिकाम्॥ ॐ क्रीं काली क्रूं करा
लीच कल्याणी कमला कला॥१०५॥ कलावती कला रत्याच कला भूज्या कलाग्निका॥ कला हृह्वा कला कुह्ला
कला काह्वा कला कला॥१०६॥ कला कोटिसमाभासा कला कोटिप्रभृतिना॥ कला मयी कला धारा कला पारा
कलागम्या॥१०७॥ कला राध्या कमलिनी ककरा कहराकरी॥ ककारवर्णसर्वाङ्गी कला कोटिविभूषिता॥१०८॥
ककार कोटिगुणिता ककार कोटिभूषणा॥ ककारवर्णहृदया ककारमंत्रमंडिता॥१०९॥ ककारवर्णमुकुटा कका
रवर्णभूषणा॥ ककककवर्णरूपा ककवाह्वपरायणा॥११०॥ ककवीरास्फालरता कमला करपूजिता॥ कमला
करनाथाच कमला करूपधृका॥१११॥ कमला कराभिदृस्या कमला करपारगा॥ कमला करमध्यस्था कमला करतो
तोषिता॥११२॥ कथंकारपरालापा कथंकारपरायणा॥ कथंकारपदान्तस्था कथंकारपदार्थभूः॥११३॥ कमलाक्षी
कमलजा कमलाक्षप्रपूजिता॥ कमलाक्षवरोद्युक्ता ककारा कर्बुराक्षरा॥११४॥ करतारा करच्छिन्ना करश्यामा

रमः
५

करार्णवा। करवृंस्मा कररंगा करोदरा करवृजिना।७८। करनीया करामश्री करन्यासा करप्रिया करद्योरणा करकञा
करकोकरकांतरा।७९। करकाचलहर्षा च करकाचलशोभिनी। करकाचलपूर्वी च करकाचलनोभिरणी।८०॥
करकाचलगेहस्था करकाचलरक्षिणी। करकाचलसन्मान्या करकाचलशालिनी। करकाचलवेषाढ्या कर
काचलरंजिता।८१। करकाचलकान्तारा करकाचलमालिनी। करकाचलशोभाढ्या करकाचलरूपिणी।८२॥
करामलकसंस्था च करामलकसिद्धिदा। करामलकसंपूज्या करामलकतारिणी।८३। करामलककाली च कराम
लकलोचनी। करामलकमाला च करामलकशोभिनी।८४। करामलकवन्ध्या करामलकदायिनी। कञ्जनेत्रा
कंजगतिः कंजस्था कंजधारिणी।८५। कंजमालाप्रियकरा कंजरूपा च कंजजा। कंजजातिः कंजगतिः कंजहोम
परायणा।८६। कंजमंडलमध्यस्था कंजाभरणाभूषिता। कंजसन्माननिरता कंजोत्पत्तिपरायणा।८७। कंज
राशिसमाकारा कंजारण्यनिवासिनी।८८। करंजवृक्षमध्यस्था करंजवृक्षवासिनी।८९। करंजवृक्षभूषाढ्या करं

का॰
६

जारण्यवासिनी॥ करंजमालाभरणा करवालपरायणा॥९६॥ करवालप्रहृष्टाङ्गा करवालप्रियागतिः॥ कर
वालप्रियोत्कण्ठा करवालप्रहारिणी॥९७॥ करवालमयी कर्म्मा करवालप्रियंकरी॥ कबन्धमालाभरणा क
बन्धराशिमध्यगा॥९८॥ कबन्धकूटसंस्थाना कबंधानन्तभूषणा॥ कबन्धनादसंतुष्टा कबंधासनधारिणी
॥९९॥ कबंधगृहमध्यस्था कबन्धवनवासिनी॥ कबन्धकाञ्चिकारिणी कबन्धराशिभूषणा॥१००॥ कबन्धमा
लाजपदा कबन्धदेहवासिनी॥ कबन्धासनमान्या च कपालमालधारिणी॥१॥ कपालमालामध्यस्था कपाल
व्रततोषिता॥ कपालदीपसंतुष्टा कपालदीपरूपिणी॥२॥ कपालदीपवरदा कपालकज्जलस्थिता॥ कपाल
मालाजपदा कपालजपतोषिणी॥३॥ कपालसिद्धिसंतुष्टा कपालभोजनोद्यता॥ कपालव्रतसंस्थाना कपा
लकमलालया॥४॥ कवित्वामृतसारा च कवित्वामृतसागरा॥ कवित्वसिद्धिसंहृष्टा कवित्वदानकारिणी॥५॥
कविहृष्टा कविगतिः कविहृद्या कविप्रिया॥ कविब्रह्मानन्दरूपा कवित्वामृततोषिता॥६॥ कविमान

रामः
६

समंस्थाना कविकांक्षाप्रपूरिणी॥ कविकण्ठस्थिता कं ह्रीँ कं कं कं कविपूर्तिदा॥७॥ कङ्काला कङ्कालादानमानसा
कङ्कालप्रिया॥ कपालकङ्कालसमा कङ्कालेशप्रपूजिता॥८॥ कङ्कालागीतमध्यस्था कङ्कालानन्दरूपिणी॥
कङ्कालप्रियसन्तुष्टा कङ्कालप्रियतोषिणी॥९॥ कपालमालाभरणा कपालकरभूषणा॥ कपालकरभूषा
ढ्या कपालचक्रमंडिता॥१०॥ कपालकोटिनिलया कपालदुर्गकारिणी॥ कपालगिरिसंस्थाना कपालचल
वासिनी॥११॥ कपालपात्रसन्तुष्टा कपालार्घ्यपरायणा॥ कपालार्घ्यप्रीयमाणा कपालार्घ्यवरोद्यता॥१२॥ कपाल
चक्ररूपा च कपालरूपमात्रगा॥ कदली कदलीरूपा कदलीवनवासिनी॥१३॥ कदलीपुष्पसुप्रीता कदली
फलमानसा कदलीहोमसन्तुष्टा कदलीदर्शनोद्यता॥१४॥ कदलीगर्भमध्यस्था कदलीवनसुन्दरी॥ कदम्बपु
ष्पनिलया कदम्बवनमध्यगा॥१५॥ कदम्बकुसुमामोदा कदम्बवनतोषिणी॥ कदम्बपुष्पसंपूज्या कदम्बपुष्प
होमदा॥१६॥ कदम्बपुष्पमध्यस्था कदम्बफलभोजिनी॥ कदम्बकाननान्तस्था कदम्बाचलवासिनी॥१७॥ कः
च्छपा कच्छपाराध्या कच्छपासनसंस्थिता॥ कर्णपूरा कर्णनासा कर्णाढ्या कालभैरवी॥१८॥ कलप्रीता कलह

का.
७

दा कल्नहा कल्नहामृगा। कर्णपक्षी कर्णवार्त्ता कपत्नी कर्णसुन्दरी॥९॥ कर्णपीच्चाविनी कर्णमंजरी कपिकच्छु-
दा। कपिकच्छुविहपाद्या कपिकच्छुस्वरूपिणी॥१०॥ कस्तुरी मृगसंस्थाना कस्तूरी मृगरूपिणी। कस्तूरी मृगः
संजाता कस्तूरी मृगमध्यगा॥११॥ कस्तूरी रसनीलांगी कस्तूरी गन्धतोषिता। कस्तूरी पूजकप्राणा कस्तूरी पूज-
कप्रिया॥१२॥ कस्तूरी प्रेमसंतुष्टा कस्तूरी प्राणधारिणी। कस्तूरी पूजकानन्दा कस्तूरी गन्धरूपिणी
॥१३॥ कस्तूरी मालिकारूपा कस्तूरी पूजनप्रिया। कस्तूरी तिलकानन्दा कस्तूरी तिलकप्रिया॥१४॥ कस्तूरी हो-
मसंतुष्टा कस्तूरी तर्पणोद्यता। कस्तूरी मार्जनोद्युक्ता कस्तूरी चक्रपूजिता॥१५॥ कस्तूरी पुष्पसंपूज्या कस्तूरी चर्वः
णोद्यता। कस्तूरी गर्भमध्यस्था कस्तूरी वस्त्रधारिणी॥१६॥ कस्तूरी कामोदरता कस्तूरी वनवासिनी। कस्तूरी व-
नसंरक्षा कस्तूरी प्रेमधारिणी॥१७॥ कस्तूरी शक्तिनिलया कस्तूरी कुंडमध्यगा। कस्तूरी कुंडसंस्नाता कस्तूरी कुं-
डमज्जना॥१८॥ कस्तूर्यर्चनसंतुष्टा कस्तूरी जीवधारिणी। कस्तूरी परमामोदा कस्तूरी जीवनक्षमा॥१९॥ क-
स्तूरी जातिभावस्था कस्तूरी गन्धचुम्बना। कस्तूरी गंधसंमोहविराजितकपालभृत्॥२०॥ कस्तूरी मदनःस्था

रामः
७

मदनान्तःस्था कस्तूरीमदहर्षदा ॥ कस्तूरिकाविनानाभ्या कस्तूरिमृगमध्यगा ॥३१॥ कस्तूरीस्पर्शकप्राणा कस्तूरीनिन्दकान्तका ॥ कस्तूर्यामोदरसिका कस्तूरीक्रीडनोद्यता ॥३२॥ कस्तूरीदाननिरता कस्तूरीवरदायिनी ॥ कस्तूरीस्थापनाशक्ता कस्तूरीस्थानरंजिनी ॥३३॥ कस्तूरीकुशलप्रश्ना कस्तूरीस्तुतिवन्दिता ॥ कस्तूरीवन्दकाधारा कस्तूरीस्थानवासिनी ॥३४॥ कहरूपा कहाध्याच कहानन्दा कहात्मभूः ॥ कहपूज्या कहेत्याख्या कहहेया कहात्मिका ॥३५॥ कहमाला कराढ्यभूषा कहमंत्रजपोद्यता ॥ कहनामस्मृतिपरा कहनामपरायणा ॥३६॥ कहपारायणरता कहदेवी कहेश्वरी ॥ कहहेतुः कहानन्दा कहनादपरायणा ॥३७॥ कहमाता कहान्तःस्था कहमन्त्रा कहेश्वरा ॥ कहगोत्रा कहाराध्या कहध्यानपरायणा ॥३८॥ कहतंत्रा कहकहा कहाचार्यपरायणा कहाचारा कहगति ॥ कहतांडवकारिणी ॥ कहारण्या कहगतिः कहशक्तिपरायणा ॥ कहराज्यरता कर्मसाक्षिणी कर्मसुन्दरी ॥४०॥ कर्मविद्या कर्मगतिः कर्मतंत्रपरायणा ॥ कर्ममात्रा कर्मगात्रा कर्मधर्मपरायणा ॥४१॥ कर्मरेखामोहकरी कर्मकीर्तिपरायणा ॥४२॥ कर्मविद्या कर्मसारा धर्मधारा च कर्मभूः ॥ कर्मकारा कर्महारा कर्मको

गुकसुन्दरी॥४३॥कर्मकाली कर्मतारा कर्मछिन्ना च कर्मदा कर्मचांडालिनी कर्मवेदमाता च कर्मभूः॥४४॥कर्म
कांडरतानन्ता कर्मकांडानुमानिता कर्मकांडपरीणाहा कर्मठी कमठाकृतिः॥४५॥ कमठाराध्यहृदया कमठा
कण्ठसुन्दरी॥ कमठासनसंसेव्या कमठी कर्मतत्परा॥४६॥ करुणाकरकान्ता च करुणाकरवन्दिता॥ कठोर
करमाला च कठोरकुचधारिणी॥४७॥ कपर्दिनी कपटिनी कठिनी कङ्कभूषणा॥ करभोरुः कठिनदा करभा क
रभालया॥४८॥ कलभाषामयी कल्पा कल्पना कल्पदायिनी॥ कमलस्था कलामाला कमलास्या क्वणत्प्र
भा॥४९॥ ककुद्मिनी कष्टवती कक्षकक्षार्चिता कडा॥ कचार्चिता कचतनुः कचसुन्दरधारिणी॥५०॥ कठोरकु
चसंलग्ना कटिसूत्रविराजिता॥ कर्णभक्षप्रिया कन्दा कथा कन्दगतिः कलिः॥५१॥ कलिघ्नी कलिदूती च क
विनायकपूजिता॥ कणकक्षानियन्त्री च कश्चित्कविवरार्चिता॥५२॥ कर्त्री च कर्तृकाभूषा करिणी कर्ण
शत्रुपा॥ करणेशी करणादा करणावा कलानिधा॥५३॥ कलना कलनाधारा कारिका करका करा॥ कलज्ञे
या कर्कराशि कर्कराशिप्रपूजिता॥५४॥ कन्याराशि कन्यका च कन्यकाप्रियभाषिणी॥ कन्यकादानसं

ढेष्टा कन्यादान सन्तोषिणी ॥७५॥ कन्यादान करानन्दा कन्यादान गृहेहृदा ॥ कर्षणा कक्षदहना कम्भिना कम्भिना
सना ॥७६॥ करमालानन्द कर्त्री करमाला सन्तोषिना करमाला श्रयानन्दा करमाला समागमा ॥७७॥ करमा
लामिङ्गिरात्री करमाला करविप्रिया ॥ करविप्रिया कररमा करदान परायणा ॥७८॥ करनन्दा कलिगतिः कलिवृ
ज्या कलिसत्वा ॥ करानन्दा कविगतिः कविपूज्या कलिसत्व ॥७९॥ कलनादनिनादस्था कलदानवरप्रदा ॥
कलनादसमाजस्था कहोला च कहोलदा ॥८०॥ कहोलगेहसंस्था च कहोलवरदायिनी ॥ कहोलकविताधा
र कहोलऋषिमानिता ॥८१॥ कहोलमानसाराध्या कहोलवाक्यकारिणी ॥ कहोलगेहमध्यस्था कहोलव
रकारिणी ॥८२॥ कर्तृहया कर्तृमयी कर्तृमाता च कर्तरी ॥ कनीया कनकाराध्या कनीनकमयी कथा ॥ कनी
यानन्दनीलया कनकानन्दतोषिता ॥८३॥ कनीनककराकाष्ठा कथारी ककरी करा ॥ कारगस्था कारगतिः
कारबन्धपरायणा ॥८४॥ कारनाथप्रिया कराभा कथानेक सन्तोषिना ॥ कमनीया कमनका कमनीयपरविभ्रण
णा ॥८५॥ कमनीयसमाजस्था कमनीयव्रतप्रिया ॥ कमनीयगुणाराध्या कपिला कपिलेश्वरी ॥८६॥ कपिला

राध्यहृद्या कपिलाप्रियदायिनी ॥ कएईलँह्रीँस्वरूपा च कएईलँह्रीँवरप्रदा ॥६७॥ कएईलह्रीँसिद्धिदात्री क
एईलह्रीँस्वरूपिणी ॥ कएईलंह्रीँमंत्रवर्णा च कएईलंह्रीँप्रसूः कला ॥६८॥ कवर्गा च कपाटस्था कपाटोद्घाटन
